दिव्यस्तोत्रतरंगिणी

विषयसूचिका

स्तोत्राणि	पृष्ठ–संख्या
१. गणेशस्तोत्राणि	२ – २१
२. सरस्वतीस्तोत्राणि	२२ – ३५
३. सुब्रह्मण्यस्तोत्राणि	३६ – ४६
४. शिवस्तोत्राणि	४७ – १२२
५. देवीस्तोत्राणि	१२३ – १७४
६. रामस्तोत्राणि	१७५ – २०१
७. कृष्णस्तोत्राणि	२०२ – २३१
८. विष्णुस्तोत्राणि	२३२ – २७२
९. लक्ष्मीस्तोत्राणि	२७४ – २८३
१०. धर्मशास्तृस्तोत्राणि	२८४ – २९३
११. आंजनेयस्तोत्राणि	२९४ – ३०४

गणेशस्तोत्राणि

विषयसूचिका

		पृष्ठसंख्या
१.	गणपति स्तोत्रम्	२
२.	गणेशपञ्चरत्नम्	२
३.	गणेशभुजङ्गम्	३
४.	गणनायकाष्टकम्	५
५.	श्रीमहागणेश पञ्चरत्नस्तोत्रम्	६
६.	श्रीगणपति षोडशनामस्तोत्रम्	७
७.	सङ्कटनाश गणेशस्तोत्रम्	७
८.	श्री षोडशमहागणपतिस्तुतिमाला	८
९.	श्री गणेशाष्टकम्	११
१०.	मूषिकवाहनस्तोत्रं	१२
११.	श्रीगणेशभुजंगस्तोत्रम्	१५
१२.	मयूरेश्वरस्तोत्रम्	१७
१३.	ऋणहरगणेशस्तोत्रम्	१८
१४.	महागणपति मङ्गलमालिकास्तोत्रम्	२०
१५.	श्रीगणेशाष्टकम्	२१
१६.	गणपति द्वादशनामस्तोत्रम्	२३
१७.	गणेश प्रातःस्मरणम्	२४

***

१ . गणपतिस्तोत्रम्

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥

गजाननं भूतगणादिसेवितं
कपित्थजम्बूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं
नमामि विघ्नेश्वरपादपंकजम् ॥ २ ॥

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानां एकदन्तमुपास्महे ॥ ३ ॥

श्रीकान्तो मातुलो यस्य जननी सर्वमंगला ।
जनकश्शंकरोदेवः तं वन्दे कुंजराननम् ॥ ४ ॥

वक्रतुंड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ५ ॥

***

२. गणेशपंचरत्नस्तोत्रम्

(शंकराचार्यविरचितम्)

मुदाकरात्तमोदकं सदाविमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरक्षकम् ।
अनायकैकनायकं विनाशितेभदैत्यकं
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतरातिभीकरं नवोदितार्कभास्वरं
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्त लोकशंकरं निरस्तदैत्यकुंजरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिंचनार्तिमार्जनं चिरंतनोक्तिभाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।
प्रपंचनाशभीषणं धनंजयादिभूषणं
कपोलदानवारणं भजे पुराणवारणम् ॥ ४ ॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं
अचिन्त्यरूपमन्तहीनमन्तराय कृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

महागणेश पंचरत्नमादरेण योऽन्वहं
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरं ।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरत् ॥ ६ ॥

***

३. गणेशभुजंगम्

(श्री शंकराचार्यकृतम्)

रणत्क्षुद्रघण्टा निनादाभिरामं
चलत्ताण्डवोद्दण्डवत् पद्मतालम् ।

लसत्तुन्दिलांगोपरि व्यालहारं
गणाधीशमीशानसूनुं तमीडे ॥ १ ॥

ध्वनिध्वंसवीणालयोल्लासि वक्त्रं
स्फुरच्छुण्डदण्डोल्लसद् बीजपूरम् ।
गलद्दर्प सौगन्ध्य लोलालिमालं
गणाधीशमीशानसूनुं तमीडे ॥ २ ॥

प्रकाशज्जपारक्तरत्नप्रसून–
प्रवालप्रभातारुणज्योतिरेकम् ।
प्रलंबोदरं वक्रतुण्डैकदंतं
गणाधीशमीशानसूनुं तमीडे ॥ ३ ॥

विचित्रस्फुरद्रत्नमालाकिरीटं
किरीटोल्लसच्चंद्रेखाविभूषम् ।
विभूषैकभूषं भवध्वंसहेतुं
गणाधीशमीशानसूनुं तमीडे ॥ ४ ॥

उदञ्चद्भुजावल्लरीदृश्यमूलो–
च्चलद्भ्रूलताविभ्रमभ्राजदक्षम् ।
मरुत्सुंदरीचामरैस्सेव्यमानं
गणाधीशमीशानसूनुं तमीडे ॥ ५ ॥

स्फुरन्निष्ठुरालोलपिंगाक्षितारं
कृपाकोमलोदारलीलावतारम् ।
कलाबिंदुगं गीयते योगिवर्यैः
गणाधीशमीशानसूनुं तमीडे ॥ ६ ॥

यमेकाक्षरं निर्मलं निर्विकल्पं
गुणातीतमानन्दमाकारशून्यम् ।

परंपारमोंकारमाम्नायगर्भं
वदन्ति प्रगल्भं पुराणं तमीडे ॥ ७ ॥

चिदानन्द सान्द्राय शान्ताय तुभ्यं
नमो विश्वकर्त्रे च हर्त्रे च तुभ्यम् ।
नमोऽनन्तलीलाय कैवल्यभासे
नमोविश्वबीज प्रसीदेशसूनो ॥ ८ ॥

इमं सुस्तवं प्रातरुत्थाय भक्त्या
पठेद्यस्तु मर्त्यो लभेत्सर्वकामान्
गणेशप्रसादेन सिद्ध्यन्ति वाचो
गणेशे विभौ दुर्लभं किं प्रसन्ने ॥ ९ ॥

***

४. गणनायकाष्टकम्

एकदन्तं महाकायं तप्तकांचनसन्निभम् ।
लंबोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥ १ ॥

मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतिनम् ।
बालेन्दुविलसन्मौलिं वन्देऽहं गणनायकम् ॥ २ ॥

अम्बिकाहृदयानन्दं मातृभिः परिपालितम् ।
भक्तप्रियं मदोन्मत्तं वन्देऽहं गणनायकम् ॥ ३ ॥

चित्ररत्नविचित्रांगं चित्रमालाविभूषितम् ।
चित्ररूपधरं देवं वन्देऽहं गणनायकम् ॥ ४ ॥

गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितम् ।
पाशांकुशधरं देवं वन्देऽहं गणनायकम् ॥ ५ ॥

मूषिकोत्तममारुह्य देवासुरमहाहवे ।
योद्धुकामं महावीर्यं वन्देऽहं गणनायकम् ॥ ६ ॥

यक्षकिन्नरगन्धर्व सिद्धविद्याधरैस्सदा ।
स्तूयमानं महात्मानं वन्देऽहं गणनायकम् ॥ ७ ॥

सर्वविघ्नकरं देवं सर्वविघ्नविवर्जितम् ।
सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम् ॥ ८ ॥

गणाष्टकमिदं पुण्यं भक्तितो यः पठेन्नरः ।
विमुक्तस्सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ ९ ॥

***

५. श्रीमहागणेशपंचरत्नस्तोत्रम्

सरागलोकदुर्लभं विरागिलोकपूजितं
सुरासुरैर्नमस्कृतं जरापमृत्युनाशकम् ।
गिरागुरुं श्रियाहरिं जयन्ति यत्पदार्चकाः
नमामि तं गणाधिपं कृपापयःपयोनिधिम् ॥ १ ॥

गिरीन्द्रजामुखांबुज–प्रमोददान–भास्करं
करीन्द्रवक्त्र–मानताघसंघ–वारणोद्यतम् ।
सरीसृपेश–बद्धकुक्षि–माश्रयामि संततं
शरीरकान्ति–निर्जिताब्जबन्धु–बालसंततिम् ॥ २ ॥

शुकादिमौनिवन्दितं गकारवाच्यमक्षरं
प्रकाममिष्टदायिनं सकामनम्रपंक्तये ।
चकासतं चतुर्भुजैः विकासपद्म पूजितं
प्रकाशितात्मतत्वकं नमाम्यहं गणाधिपम् ॥ ३ ॥

नराधिपत्वदायकं स्वरादिलोकदायकं

ज्वरादिरोगवारकं निराकृतासुरव्रजम् ।
करांबुजोल्लसत्स्रृणिं विकारशून्यमानसैः
हृदा सदा विभावितं मुदा नमामि विघ्नपम् ॥ ४ ॥

श्रमापनोदनक्षमं समाहितान्तरात्मनां
सुमादिभिस्सदार्चितं क्षमानिधिं गणाधिपम् ।
रमाधवादिपूजितं यमान्तकात्मसंभवं
शमादिषड्गुणप्रदं नमामि तं विभूतये ॥ ५ ॥

गणाधिपस्य पंचकं नृणामभीष्टदायकं
प्रणामपूर्वकं जनाः पठन्ति ये मुदायुताः ।
भवन्ति ते विदांपुरः प्रगीतवैभवा जवात्
चिरायुषोऽधिकश्रियस्सुसूनवो न संशयः ॥ ६ ॥

***

६. श्रीगणपतिषोडशनामस्तोत्रम्

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो विनायकः ॥ १ ॥
धूमकेतुर्गणाध्यक्षः फालचंद्रो गजाननः ।
वक्रतुण्डः शूर्पकर्णो हेरंबः स्कंदपूर्वजः ॥ २ ॥
षोडशैतानि नामानि यः पठेत् शृणुयादपि ।
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा
संग्रामे सर्वकार्ये च विघ्नस्तस्य न जायते ॥ ३ ॥

***

७. संकटनाशगणेशाष्टकम्

(नारदपुराणांतर्गतं)

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यं आयुःकामार्थ सिद्धये ॥ १ ॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिंगाक्षं गजवक्त्रं चतुर्थकम् ॥ २ ॥

लंबोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाऽष्टमम् ॥ ३ ॥

नवमं फालचन्द्रं च दशमं तु विनायकम् ।
ऐकादशं गणपतिं द्वादशं तु गजाननम् ॥ ४ ॥

द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः।
न च विघ्नभयं तस्य सर्वसिद्धिकरं परम् ॥ ५ ॥

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान् मोक्षार्थी मोक्षमाप्नुयात् ॥ ६ ॥

जपेत् गणपतिस्तोत्रं षण्मासात् स फलं भजेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ ७ ॥

अष्टानां ब्राह्मणानां च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत् सर्वा गणेशस्य प्रसादतः ॥ ८ ॥

***

८. श्रीषोडशमहागणपतिस्तुतिमाला

बालस्तरुणभक्तौ च वीरश्शक्तिध्वजस्तथा ।
सिद्धिरुच्छिष्टविघ्नेशः क्षिप्रहेरंबनायकः ॥ १ ॥

लक्ष्मीगणो महाविघ्नो विजयः कल्पहस्तकः ।
ऊर्ध्वविघ्नेशपर्यन्ताः षोडशैते गणाधिपाः ॥ २ ॥

धर्ममर्थं च कामं च लभते यत्प्रसादतः ।
स्तोत्रं तद्विघ्नराजस्य कथ्यते षोडशात्मकम् ॥ ३ ॥

रस्थकदलीचूतपनसेक्षुकमोदकम् ।
बालसूर्यप्रभं देवं वन्दे बालगणाधिपम् ॥ ४ ॥

पाशांकुशापूपकपित्थजंबू–
फलं तिलान् वेणुमपि स्वहस्तैः ।
धत्ते सदा यस्तरुणारुणाभः
पायात् स युष्मान् तरुणो गणेशः ॥ ५ ॥

नालिकेराम्रकदलीगुडपायसधारिणम् ।
शरच्चंद्राभवपुषं भजे भक्तगणाधिपम् ॥ ६ ॥

वेताळशक्तिशरकार्मुकचर्मखड्ग–
खट्वांगमुद्गरगदांकुशनागपाशान् ।
शूलं च कुन्तपरशुध्वजमुद्वहन्तं
वीरं गणेशमरुणं सततं स्मरामि ॥ ७ ॥

आलिंग्य देवीं हरितां निषण्णं
परस्परस्पृष्टकटीनिवेशम् ।
संध्यारुणं पाशसृणीवहन्तं
भयापहं शक्तिगणेशमीडे ॥ ८ ॥

यः पुस्तकाक्षगुणदण्डकमण्डलुश्री–
निर्वर्त्यमान करभूषणमिन्दुवर्णम्
स्तंबेरमाननचतुष्टयशोभमानं
नित्यं स्मरेत् ध्वजगणाधिपतिं स धन्यः ॥ ९ ॥

पक्वचूतफलकल्पमंजरीं
इक्षुदण्डतिलमोदकैस्सह ।

उद्वहन् परशुहस्त ते नमः
श्रीसमृद्धियुत देव पिंगळ ॥ १० ॥

नीलाब्जं दाडिमी वीणा शालीगुंजाक्षसूत्रकम् ।
दधदुच्छिष्टनामाऽयं गणेशः पातु मोक्षदः ॥ ११ ॥

पाशांकुशस्वदन्ताम्रफलवानाखुवाहनः ।
विघ्नं निहन्तु नस्सर्वं रक्तवर्णो विनायकः ॥ १२ ॥

दन्तकल्पलतापाश रत्नकुंभांकुशोज्वलम् ।
बंधूककमनीयाभं ध्यायेत् क्षिप्रगणाधिपम् ॥ १३ ॥

अभयवरदहस्तः पाशदन्ताक्षमालाः
सृणिपरशुदधानो मुद्गरं मोदकं च ।
फलमधिगतसिंहः पंचमातंगवक्त्रो
गणपतिरतिगौरः पातु हेरंबनामा ॥ १४ ॥

बिभ्राणश्शुकबीजपूरकमलं माणिक्यकुंभांकुशौ
पाशंकल्पलतां च खड्गविलसद्ज्योतिस्सुधानिर्मलः ।
श्यामेनात्तसरोरुहेणसहितो देवीद्वयेनान्तिके
गौरांगो वरदानहस्तकमलो लक्ष्मीगणेशोऽवतात् ॥ १५ ॥

कल्हारांबुज बीजपूरकगदा दंतेक्षुबाणैस्समं
बिभ्राणो मणिकुंभचापकलमान् पाशं च चक्रान्वितम् ।
गौरांग्या रुचिराविंदकरया देव्या सदा संयुतः
शोणांगः शुभमातनोतु भगवान् नित्यं गणेशो महान् ॥ १६ ॥

शंखेक्षुचापकुसुमेषुकुठारपाश–
चक्रांकुशैः कलममंजरिकागदाद्यैः ।
पाणिस्थितैः परिसमाहित भूषणश्रीः

विघ्नेश्वरो विजयते तपनीयगौरः ॥ १७ ॥

पाशांकुशापूपकुठारदंत–
चंचत्कराकॢप्तवरांगुलीयकम् ।
पीतप्रभं कल्पतरोरधस्थं
भजामि नृत्तैकपदं गणेशम् ॥ १८ ॥

कल्हारशालिकमलेक्षुकचापबाण
दंतप्ररोहकगदी कनकोज्वलांगः।
आलिंगनोद्यतकरो हरितांगयष्ट्या
देव्या दिशत्वभयं ऊर्ध्वगणेश्वरो मे ॥ १९ ॥

इति विरचितं गणेशमूर्ति–
ध्यानपरं स्तवमागमार्थसारम् ।
पठति सततं गणेशभक्त्या
त्रिजगति तस्य न किंचिदप्यलभ्यम् ॥ २० ॥

***

९. श्रीगणेशाष्टकम्

(पाद्मपुराणांतर्गतम्)

गणपति परिवारं चारुकेयूरहारं
गिरिधरवरसारं योगिनीचक्रचारम् ।
भवभयपरिहारं दुःखदारिद्र्य दूरं
गणपतिमभिवंदे वक्रतुण्डावतारम् ॥ १ ॥

अखिलमलविनाशं पाणिनाध्वस्तपाशं
कनकगिरिनिकाशं सूर्यकोटिप्रकाशम् ।
भवभयगिरिनाशं मालतीतीरवासं
गणपतिमभिवन्दे मानसे राजहंसम् ॥ २ ॥

विविधमणिमयूखैः शोभमानं विदूरैः
कनकरचित चित्रं कंठदेशे विचित्रम् ।
दधति विमल हारं सर्वदा यत्नसारं
गणपतिमभिवन्दे वक्रतुण्डावतारम् ॥ ३ ॥

दुरितगजममंदं वारुणीं चैव वेदं
विदितमखिलनादं नृत्यमानंदकंदम् ।
दधति शशिसुवक्त्रं चांकुशं यो विशेषं
गणपतिमभिवन्दे सर्वदानंदकंदम् ॥ ४ ॥

त्रिणयनयुतफाले शोभमाने विशाले
मकुटमणिसुडोले मौक्तिकानां च जाले ।
धवलकुसुममाले यस्य शीर्ष्णः सताले
गणपतिमभिवन्दे सर्वदाचक्रपाणिम् ॥ ५ ॥

वपुषि महति रूपं पीठमादौ सुदीपं
तदुपरि रसकोणं यस्यचोर्ध्वं त्रिकोणम् ।
गजमितदलपद्मं संस्थितं चारुछद्मं
गणपतिमभिवन्दे कल्पवृक्षस्य बृंदे ॥ ६ ॥

वरदविशदहस्तं दक्षिणं यस्य हस्तं
सदयमभयदं तं चिंतये चित्तसंस्थम् ।
शबलकुटिलशुण्डं चैकतुण्डं द्वितुण्डं
गणपतिमभिवन्दे सर्वदा वक्रतुण्डम् ॥ ७ ॥

कल्पद्रुमाधःस्थितकामधेनुं
चिंतामणिं दक्षिणपाणिशुण्डम् ।
बिभ्राणमत्यद्भुत चित्तरूपं
यः पूजयेत् तस्य समस्तसिद्धिः ॥ ८ ॥

***

१०. मूषिकवाहनस्तोत्रम्

मूषिकवाहन मोदकहस्त चामरकर्ण विलंबित सूत्र ।
वामनरूप महेश्वरपुत्र विघ्नविनायक पादनमस्ते ॥ १ ॥

देवदेवसुतं देवं जगद्विघ्नविनायकम् ।
हस्तिरूपं महाकायं सूर्यकोटिसमप्रभम् ॥ २ ॥

वामनं जटिलं कांतं ह्रस्वग्रीवं महोदरम् ।
ताम्रसिंदूरयुग्गण्डं विकटं प्रकटोत्कटम् ॥ ३ ॥

एकदंतं प्रलंबोष्ठं नागयज्ञोपवीतिनम् ।
त्र्यक्षं गजमुखं कृष्णं सुकृतं रक्तवाससम् ॥ ४ ॥

दंतपाणिं च वरदं ब्रह्मण्यं ब्रह्मचारिणम् ।
पुण्यं गणपतिं दिव्यं विघ्नराजं नमाम्यहम् ॥ ५ ॥

देवं गणपतिं नाथं विश्वस्याग्रे तु गामिनम् ।
देवानामधिकं श्रेष्ठं नायकं सुविनायकम् ॥ ६ ॥

नमामि भगवन्तं तमद्भुतं गणनायकम् ।
वक्रतुंड प्रचंडाय उग्रतुंडाय ते नमः ॥ ७ ॥

चंडाय गुरुचंडाय चंडचंडाय ते नमः ।
मत्तोन्मत्तप्रमत्ताय नित्यमत्ताय ते नमः ॥ ८ ॥

उमासुतं नमस्यामि गंगापुत्राय ते नमः ।
ओंकाराय वषट्कारस्वाहाकाराय ते नमः ॥ ९ ॥

मंत्रमूर्ते महायोगिन् जातवेदो नमोनमः ।

परशुपाशकहस्ताय गजहस्ताय ते नमः ॥ १० ॥

मेघाय मेघवर्णाय मेघेश्वर नमोनमः ।
घोराय घोररूपाय घोरघोराय ते नमः ॥ ११ ॥

पुराणपूर्वपूज्याय पुरुषाय नमोनमः ।
मदोत्कट नमस्तेऽस्तु नमस्ते चंडविक्रम ॥ १२ ॥

विनायक नमस्तेऽस्तु नमस्ते भक्तवत्सल ।
भक्तप्रियाय शांताय महातेजस्विने नमः ॥ १३ ॥

यज्ञाय यज्ञहोत्रे च यज्ञेशाय नमोनमः ।
नमस्ते भस्मशुक्लांग शुक्लमाल्यधराय च ॥ १५ ॥

मदक्लिन्नकपोलाय गणाधिपतये नमः ।
आखुवाहन देवेश ऐकदंताय ते नमः ॥ १६ ॥

शूर्पकर्णाय शूराय दीर्घदन्ताय ते नमः ।
विघ्नं हरतु देवेशः शिवपुत्रो विनायकः ॥ १७ ॥

एतन्मूषिकवाहस्य स्तोत्रं संध्याद्वयं पठेत् ।
विप्रो भवति वेदाढ्यः क्षत्रियो विजयी भवेत् ॥ १८ ॥

वैश्यस्तु धनमाप्नोति शूद्रः पापैः प्रमुच्यते।
गर्भिणी जनयेत् पुत्रं कन्या भर्तारमाप्नुयात् ॥ १९ ॥

प्रवासी लभते स्थानं बद्धो बंधात् प्रमुच्यते
इष्टसिद्धिमवाप्नोति पुनात्यासप्तमं कुलम्

सर्वमंगलमांगल्यं सर्वपापप्रणाशनं

सर्वकामप्रदं पुण्यं पठतां शृण्वतामपि

***

११. श्रीगणेशभुजंगस्तोत्रम्

अजं निर्विकल्पं निराकारमेकं
निरातंकमद्वैतमानन्दपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं
परब्रह्मरूपं गणेशं भजेम ॥ १ ॥

गुणातीतमाद्यं चिदानंदरूपं
चिदाभासकं सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं
परब्रह्मरूपं गणेशं भजेम ॥ २ ॥

जगत्कारणं कारणज्ञानरूपं
सुरादिं सुखादिं युगादिं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं
परब्रह्मरूपं गणेशं भजेम ॥ ३ ॥

रजोयोगतो ब्रह्मरूपं श्रुतिज्ञं
सदाकार्यसक्तं हृदाऽचिंत्यरूपम् ।
जगत्कारणं सर्वविद्यानिधानं
परब्रह्मरूपं गणेशं भजेम ॥ ४ ॥

सदा सत्वयोगं मुदा क्रीडमानं
सुरारीन् हरन्तं जगत्पालयन्तम् ।
अनेकावतारं निजाज्ञानहारं

सदा विष्णुरूपं गणेशं नमामः ॥ ५ ॥

तपोयोगिनां रुद्ररूपं त्रिणेत्रं
जगद्धारकं तारकं ज्ञानहेतुम् ।
अनेकागमैः स्वं जनं बोधयन्तं
सदा शर्वरूपं गणेशं नमामः ॥ ६ ॥

तमस्तोमहारं जनाज्ञानहारं
त्रयीवेदसारं परब्रह्मपारम् ।
मुनिज्ञानकारं विदूरे विकारं
सदा ब्रह्मरूपं गणेशं नमामः ॥ ७ ॥

निजैरोषधीस्तर्पयन्तं करौघैः
सुरौघान् कलाभिः सुधास्राविणीभिः ।
दिनेशांशु संतापहारं द्विजेशं
शशांकस्वरूपं गणेशं नमामः ॥ ८ ॥

प्रकाशस्वरूपं नभोवायुरूपं
विकारादिहेतुं कलाकालभूतम् ।
अनेकक्रियानेकशक्तिस्वरूपं
सदा शक्तिरूपं गणेशं नमामः ॥ ९ ॥

प्रधानस्वरूपं महत्तत्वरूपं
धरावारिरूपं दिगीशादिरूपम् ।
असत्सत्स्वरूपं जगद्धेतुभूतं
सदा विश्वरूपं गणेशं नमामः ॥ १० ॥

त्वदीये मनः स्थापयेदंघ्रिपद्मे
जनो विघ्नसंघान्न पीडां लभेत ।
लसत्सूर्यबिंबे विशाले स्थितोऽयं
जनो ध्वांतबाधां कथं वा लभेत ॥ ११ ॥

वयं भ्रामिताः सर्वथा ज्ञानयोगात्
अलब्ध्वा तवाङ्घ्रिं बहून् वर्षपूगान् ।
इदानीमवाप्तं तवैव प्रसादात्
प्रपन्नानिमान् पाहि विश्वंभराद्य ॥ १२ ॥

इदं यः पठेत् प्रातरुत्थाय धीमान्
त्रिसंध्यं सदा भक्तियुक्तो विशुद्धः ।
स पुत्रान् श्रियं सर्वकामान् लभेत
परब्रह्मरूपो भवेदन्तकाले ॥ १३ ॥

***

१२. मयूरेश्वरस्तोत्रम्

(गणेशपुराणांतर्गतं)

परब्रह्मरूपं चिदानन्दरूपं
परेशं सुरेशं गुणाब्धिं गुणेशम् ।
गुणातीतमीशं मयूरेशवन्द्यं
गणेशं नताः स्मो नताः स्मो नताः स्मः ॥ १ ॥

जगद्वन्द्यमेकं पराकारमेकं
गुणानां परं कारणं निर्विकल्पम् ।
जगत्पालकं हारकं तारकं तं
मयूरेशवन्द्यं नताः स्मो नताः स्मः ॥ २ ॥

महादेवसूनुं महादैत्यनाशं
महापूरुषं सर्वदा विघ्ननाशम् ।
सदा भक्तपोषं परं ज्ञानकोशं
मयूरेशवन्द्यं नताः स्मो नताः स्मः ॥ ३ ॥

अनादिं गुणादिं सुरादिं शिवायाः
महातोषदं सर्वदा सर्ववन्द्यम् ।
सुरार्यन्तकं भुक्तिमुक्तिप्रदं तं

मयूरेशवन्द्यं नताः स्मो नताः स्मः ॥ ४ ॥

परं मायिनं मायिनामप्यगम्यं
मुनिध्येयमाकाशकल्पं जनेशम् ।
असंख्यावतारं निजाज्ञाननाशं
मयूरेशवन्द्यं नताः स्मो नताः स्मः ॥ ५ ॥

अनेकक्रियाकारकं श्रुत्यगम्यं
त्रयीबोधितानेककर्मादिबीजम् ।
क्रियासिद्धिहेतुं सुरेन्द्रादिसेव्यं
मयूरेशवन्द्यं नताः स्मो नताः स्मः ॥ ६ ॥

महाकालरूपं निमेषादिरूपं
कलाकल्परूपं सदागम्यरूपम् ।
जनज्ञानहेतुं नृणां सिद्धिदं तं
मयूरेशवन्द्यं नताः स्मो नताः स्मः ॥ ७ ॥

महेशादिदेवैः सदा ध्येयपादं
सदा रक्षकं तत्पदानां हतारिम् ।
मुदा कामरूपं कृपावारिधिं तं
मयूरेशवन्द्यं नताः स्मो नताः स्मः ॥ ८ ॥

य इदं पठति स्तोत्रं स कामान् लभतेऽखिलान् ।
सर्वत्र जयमाप्नोति मानवायुः श्रियं पराम् ॥ ९ ॥

पुत्रवान् धनसंपन्नो वश्यतामखिलं नयेत् ।
सहस्रावर्तनात् कारागृहस्थं मोचयेज्जनम् ॥ १० ॥

***

१३. ऋणहरगणेशस्तोत्रम्

(कृष्णयामलतंत्रान्तर्गतम्)

सिंदूरवर्णं द्विभुजं गणेशं
लंबोदरं पद्मदले निविष्टम् ।
ब्रह्मादिदेवैः परिसेव्यमानं
सिद्धैर्युतं तं प्रणमामि देवम् ॥ १ ॥

सृष्ट्यादौ ब्रह्मणा सम्यक् पूजितः फलसिद्धये ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ २ ॥

त्रिपुरस्य वधात्पूर्वं शंभुना सम्यगर्चितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ ३ ॥

हिरण्यकश्यप्वादीनां वधार्थे विष्णुनाऽर्चितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ ४ ॥

महिषस्य वधे देव्या गणनाथः प्रपूजितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ ५ ॥

तारकस्य वधात्पूर्वं कुमारेण प्रपूजितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ ६ ॥

भास्करेण गणेशो हि पूजितश्छविसिद्धये ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ ७ ॥

शशिना कान्तिवृध्यर्थं पूजितो गणनायकः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ ८ ॥

पालनाय च तपसां विश्वामित्रेण पूजितः ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ ९ ॥

इदं तु ऋणहरं स्तोत्रं तीव्रदारिद्र्यनाशनम् ।

एकवारं पठेन्नित्यं वर्षमेकं समाहितः ॥ १० ॥

दारिद्र्यं दारुणं त्यक्त्वा कुबेरसमतां व्रजेत् ॥ ११ ॥

***

१४. महागणपतिमंगलमालिकास्तोत्रम्

(श्री कृष्णेन्द्रयतिविरचितं)

श्रीकंठप्रेमपुत्राय गौरीवामाङ्कवासिने ।
द्वात्रिंशद्रूपयुक्ताय श्रीगणेशाय मंगलम् ॥ १ ॥

आदिपूज्याय देवाय दन्तमोदकधारिणे ।
वल्लभाप्राणकान्ताय श्रीगणेशाय मंगलम् ॥ २ ॥

लंबोदराय शान्ताय चन्द्रगर्वापहारिणे ।
गजाननाय प्रभवे श्रीगणेशाय मंगलम् ॥ ३ ॥

पंचहस्ताय वन्द्याय पाशाङ्कुशधराय च ।
श्रीमते गजकर्णाय श्रीगणेशाय मंगलम् ॥ ४ ॥

द्वैमातुराय बालाय हेरंबाय महात्मने ।
विकटायाखुवाहाय श्रीगणेशाय मंगलम् ॥ ५ ॥

पृश्निशृंगायाजिताय क्षिप्राभीष्टार्थदायिने ।
सिद्धि बुद्धि प्रमोदाय श्रीगणेशाय मंगलम् ॥ ६ ॥

विलंबियज्ञसूत्राय सर्व विघ्ननिवारिणे ।
दूर्वादल सुपूज्याय श्रीगणेशाय मंगलम् ॥ ७ ॥

महाकायाय भीमाय महासेनाग्रजन्मने ।
त्रिपुरारिवरोद्धर्त्रे श्रीगणेशाय मंगलम् ॥ ८ ॥

सिंधूररम्यवर्णाय नागबद्धोदराय च ।
आमोदायप्रमोदाय श्रीगणेशाय मंगलम् ॥ ९ ॥

विघ्नकर्त्रे दुर्मुखाय विघ्नहर्त्रे शिवात्मने ।
सुमुखायैकदन्ताय श्रीगणेशाय मंगलम् ॥ १० ॥

समस्तगणनाथाय विष्णवे धूमकेतवे ।
त्र्यक्षाय फालचन्द्राय श्रीगणेशाय मंगलम् ॥ ११ ॥

चतुर्थीशाय मान्याय सर्वविद्याप्रदायिने ।
वक्रतुण्डाय कुब्जाय श्रीगणेशाय मंगलम् ॥ १२ ॥

धुण्डिने कपिलाख्याय श्रेष्ठाय ऋणहारिणे ।
उद्दण्डोद्दण्डरूपाय श्रीगणेशाय मंगलम् ॥ १३ ॥

कष्टहर्त्रे द्विदेहाय भक्तेष्टजयदायिने ।
विनायकाय विभवे श्रीगणेशाय मंगलम् ॥ १४ ॥

सच्चिदानन्दरूपाय निर्गुणाय गुणात्मने ।
वटवे लोकगुरवे श्रीगणेशाय मंगलम् ॥ १५ ॥

श्रीचामुण्डासुपुत्राय प्रसन्नवदनायच ।
श्रीराज राजसेव्याय श्रीगणेशाय मंगलम् ॥ १६ ॥

श्रीचामुण्डाकृपापात्र श्रीकृष्णेंद्र विनिर्मिताम् ।
विभूतिमातृकारम्यां कल्याणैश्वर्यदायिनीम् ॥ १७ ॥

श्रीमहागणनाथस्य शुभां मंगलमालिकाम् ।
यः पठेत् सततं वाणीं लक्ष्मीं सिद्धिमवाप्नुयात् ॥ १८ ॥

***

१५. श्रीगणेशाष्टकम्

(गणेशपुराणांतर्गतं)

यतोऽनंतशक्तेरनंताश्च जीवाः
यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधाभेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥ १ ॥

यतश्चाविरासीज्जगत्सर्वमेतत्
तथाब्जासनो विश्वगो विश्वगोप्ता ।
तथेन्द्रादयो देवसंघा मनुष्याः
सदा तं गणेशं नमामो भजामः ॥ २ ॥

यतो वह्निभानू भवोभूर्जलं च
यतस्सागराश्चन्द्रमा व्योमवायुः ।
यतः स्थावरा जंगमा वृक्षसंघाः
सदा तं गणेशं नमामो भजामः ॥ ३ ॥

यतो दानवाः किन्नरा यक्षसंघाः
यतश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटाः यतो वीरुधश्च
सदा तं गणेशं नमामो भजामः ॥ ४ ॥

यतो बुद्धिरज्ञाननाशो मुमुक्षोः
यतस्संपदो भक्तसंतोषिकाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं नमामो भजामः ॥ ५ ॥

यतो पुत्रसंपद्यतो वांछितार्थो
यतोऽभक्तविघ्नास्तथानेकरूपाः ।
यतः शोकमोहौ यतः काम एवं

सदा तं गणेशं नमामो भजामः ॥ ६ ॥

यतोऽनंतशक्तिः स शेषो बभूव
धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोकाहि नानाः
सदा तं गणेशं नमामो भजामः ॥ ७ ॥

यतो वेदवाचो विकुण्ठा मनोभिः
सदा नेति नेतीति यत्ता गृणन्ति ।
परब्रह्मरूपं चिदानन्दभूतं
सदा तं गणेशं नमामो भजामः ॥ ८ ॥

पुनरूचे गणाधीशः स्तोत्रमेतत्पठेन्नरः ।
त्रिसन्ध्यं त्रिदिनं तस्य सर्वं कार्यं भविष्यति ॥ ९ ॥

यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥ १० ॥

यः पठेन्मासमात्रन्तु दशवारं दिने दिने ।
स मोचयेद्बंधगतं राजवध्यं न संशयः ॥ ११ ॥

विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वांछितांल्लभते सर्वानेकविंशतिवारतः ॥ १२ ॥

यो जपेत्परयाभक्त्या गजाननपरोनरः ।
एवमुक्त्वा ततो देवश्चान्तर्धानं गतो प्रभुः ॥ १३ ॥

***

१६. श्रीगणपतिद्वादशनामस्तोत्रम्

(पाद्मपुराणांतर्गतं)

गणपतिर्विघ्नराजो लंबतुण्डो गजाननः

द्वैमातुरश्च हेरंब एकदंतो गणाधिपः
विनायकश्चारुकर्णः पशुपालो भवात्मजः ॥ १ ॥

द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत् ।
विश्वं तस्य भवेद्वश्यं नच विघ्नं भवेत् क्वचित् ॥ २ ॥

महाप्रेताः शमं यान्ति पीड्यते व्याधिभिर्न च ।
सर्वपापाद्विनिर्मुक्तोह्यक्षयं स्वर्गमश्नुते ॥ ३ ॥

***

१७. गणेशप्रातःस्मरणम्

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिंदूरपूरपरिशोभित गण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्डं
आखण्डलादि सुरनायक वृन्दवन्द्यम् ॥ १ ॥

प्रातर्नमामि चतुरानन वन्द्यमानं
इच्छानुकूलमखिलंच फलं ददानम् ।
तं तुंदिलं द्विरसनाधिप यज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ॥ २ ॥

प्रातर्भजाम्यभयदं खलु भक्त शोक–
दावानलं गणविभुं वरकुंजरास्यम् ।
अज्ञानकाननविनाशनहव्यवाहं
उत्साहवर्धनमहं सुतमीश्वरस्य ॥ ३ ॥

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ।
प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥ ४ ॥

***

सरस्वतीस्तोत्राणि

विषयसूचिका

		पृष्ठ संख्या
१.	श्रीसरस्वतीस्तोत्रम्	२६
२.	श्रीशारदास्तोत्रम	२८
३.	श्रीनीलसरस्वतीस्तोत्रम्	२९
४.	श्रीशारदाभुजङ्गस्तोत्रम	३०
५.	श्रीशारदामहिमस्तवः	३१
६.	श्रीवाणीशरणागतिस्तोत्रम्	३२
७.	श्रीमातृपदपङ्कजाष्टकम्	३३
८.	श्रीसरस्वतीस्तोत्रम्	३४
९.	श्रीवाग्देवीस्तवः	३५
१०.	श्रीवाग्वादिनीषट्कम्	३६

११. वणीप्रश्नमालास्तुतिः ३६
१२. श्रीकालडिक्षेत्रे श्रीशारदादशकम् ३८
१३. कमलजदयिताष्टकम् ३९

१. श्रीसरस्वतीस्तोत्रम्

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकरप्रभृतिभिः देवैस्सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेष जाड्यापहा ॥ १ ॥

आशासुराशीभवदङ्गवल्ली भासैवदासीकृतदुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दितशारदेन्दुं वन्देऽरविन्दासनसुन्दरि त्वां ॥ २ ॥

शारदा शारदांभोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं कृयात् ॥ ३ ॥

सरस्वतीं च तां नौमि वागधिष्ठातृदेवताम् ।
देवत्वं प्रतिपद्यन्ते यदनुग्रहतो जनाः ॥ ४ ॥

पातुनो निकषग्रावा मतिहेम्नः सरस्वती ।
प्राज्ञेतर परिच्छेदं वचसैव करोति या ॥ ५ ॥

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां च दधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ ६ ॥

वीणाधरे विपुलमंगलदानशीले
भक्तार्तिनाशिनि विरिञ्चिहरीशवन्द्ये ।
कीर्तिप्रदेऽखिलमनोरथदे महार्हे
विद्याप्रदायिनि सरस्वति नौमि नित्यम् ॥ ७ ॥

श्वेताब्जपूर्ण विमलासनसंस्थिते हे
श्वेताम्बरावृतमनोहरमंजुगात्रे ।
उद्यन्मनोज्ञसितपङ्कजमंजुलास्ये
विद्याप्रदायिनि सरस्वति नौमि नित्यम् ॥ ८ ॥

मातस्त्वदीय पदपङ्कजभक्तियुक्ताः
ये त्वां भजन्ति निखिलानपरान्विहाय ।
ते निर्जरत्वमिह यान्ति कलेवरेण
भूवह्निवायुगगनाम्बु विनिर्मितेन ॥ ९ ॥

मोहान्धकारभरिते हृदये मदीये
मातः सदैव कुरु वासमुदारभावे ।
स्वीयाखिलावयव निर्मलसुप्रभाभिः
शीघ्रं विनाशय मनोगतमन्धकारम् ॥ १० ॥

ब्रह्मा जगत्सृजति पालयतीन्दिरेशः
शंभुर्विनाशयति देवि तव प्रभावैः ।
न स्यात् कृपा यदि तव प्रकटप्रभावे
न स्युः कथञ्चिदपि ते निजकार्यदक्षाः ॥ ११ ॥

लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ॥ १२ ॥

सरस्वत्यै नमो नित्यं भद्रकाल्यै नमो नमः ।

वेदवेदान्तवेदाङ्ग विद्यास्थानेभ्य एव च ॥ १३ ॥

सरस्वति महाभागे विद्ये कमललोचने ।
विद्यारूपे विशालाक्षि विद्यां देहि नमोऽस्तु ते ॥ १४ ॥

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ १५ ॥

२. श्रीशारदास्तोत्रम्

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥ १ ॥

सुरासुरसेवितपादपङ्कजा
करेविराजत्कमनीयपुस्तका ।
विरिञ्चिपत्नी कमलासनस्थिता
सरस्वती नृत्यतु वाचि मे सदा ॥ २ ॥

माणिक्यवीणामुपलालयन्तीं
मदालसां मंजुळ वाग्विलासाम् ।
माहेन्द्र नीलद्युतिकोमलांगीं
मातङ्गकन्यां मनसा स्मरामि ॥ ३ ॥

श्रीमच्चन्दनचर्चितोज्ज्वलवपुः शुक्लांबरा मल्लिका–
मालालालितकुन्तला प्रविलसन्मुक्तावलीशोभिता ।
सर्वज्ञाननिधानपुस्तकधरा रुद्राक्षमालाङ्किता
वाग्देवी वदनाम्बुजे वसतु मे त्रैलोक्यमाता शुभा ॥ ४ ॥

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकरप्रभृतिभिः देवैस्सदा पूजिता

सा मां पातु सरस्वती भगवती निःशेष जाड्यापहा ॥ ५ ॥

दोर्भिर्युक्ताश्चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दुशंखस्फटिकमणिनिभा भासमानाऽसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥ ६ ॥

***

३. नीलसरस्वतीस्तोत्रम्

घोररूपे महारावे सर्वशत्रुभयङ्करि ।
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतम् ॥ १ ॥

सुरासुरार्चिते देवि सिद्धगन्धर्व सेविते ।
जाड्यापापहरे देवि त्राहि मां शरणागतम् ॥ २ ॥

जटाजूटसमायुक्ते लोलजिह्वान्तकारिणि ।
दुतबुद्धिकरे देवि त्राहि मां शरणागतम् ॥ ३ ॥

सौम्यक्रोधधरे रूपे चण्डरूपे नमोऽस्तुते ।
सृष्टिरूपे नमस्तुभ्यं त्राहि मां शरणागतम् ॥ ४ ॥

जडानां जडतां हन्ति भक्तानां भक्तवत्सला ।
मूढतां हर मे देवि त्राहि मां शरणागतम् ॥ ५ ॥

वं ह्रं ह्रुं कामये देवि बलिहोमप्रिये नमः ।
उग्रतारे नमो नित्यं त्राहि मां शरणागतम् ॥ ६ ॥

बुद्धिं देहि यशो देहि कवित्वं देहि देहि मे ।
मूढत्वं च हरेर्देवि त्राहि मां शरणागतम् ॥ ७ ॥

इन्द्रादिविलसद्वन्द्ववन्दिते करुणामयि ।
तारे ताराधिनाथास्ये त्राहि मां शरणागतम् ॥ ८ ॥

इदं स्तोत्रं पठेद्यस्तु सततं श्रद्धयान्वितः ।
तस्य शत्रुः क्षयं याति महाप्रज्ञा प्रजायते ॥ ९ ॥

***

४. श्रीशारदाभुजंगस्तोत्रं

(श्री शंकराचार्यकृतं)

सुवक्षोजकुम्भां सुधापूर्णकुंभां
प्रसादावलम्बां प्रपुण्यावलंबाम् ।
सदास्येन्दुबिम्बां सदानोष्ठबिम्बां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ १ ॥

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां
कलाभिर्विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ २ ॥

ललामाङ्कफालां लसत्गानलोलां
स्वभक्तैकपालां यशः श्री कपोलाम् ।
करेत्वक्षमालां कनत्प्रत्नलोलां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ ३ ॥

सुसीमन्तवेणीं दृशानिर्जितैणीं
रमत् कीरवाणीं नमत् वज्रपाणीम् ।
सुधामन्थरास्यां मुदा चिन्त्यवेणीं
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ ४ ॥
सुशान्तां सुदेहां दृगन्ते कचान्तां
लसत् सल्लताङ्गीं अनन्तामचिन्त्याम् ।
स्मरेत्तापसैः सङ्गपूर्वस्थितां तां

भजे शारदाम्बां अजस्रं मदम्बाम् ॥ ५ ॥

कुरंगे तुरंगे मृगेन्द्रे खगेन्द्रे
मरालेमदेभे महोक्षेऽधिरूढाम् ।
महत्यां नवम्यां सदा सामरूपां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ ६ ॥

ज्वलत् कान्ति वह्निं जगन्मोहनाङ्गीं
भजेमानसांभोज सुभ्रांतभृंगीम् ।
निजस्तोत्रसंगीतनृत्यप्रभांगीं
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ ७ ॥

भवांभोजनेत्राजसंपूज्यमानां
लसन्मन्दहासप्रभावक्त्रचिह्नाम् ।
चलच्चंचलोदारताटङ्ककर्णां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ ८ ॥

***

५. श्रीशारदामहिमस्तवः

(श्रीशिवाभिनवनृसिंहभारतीस्वामिविरचितम्)

शृंगाद्रिवासाय विधिप्रियाय
कारुण्यवारांनिधये नताय ।
विज्ञानदायाखिलभोगदाय
श्री शारदाख्याय नमो महिम्ने ॥ १ ॥

तुंगातटावासकृतादराय
भृङ्गालिविद्वेषिकचोज्ज्वलाय ।
अङ्गाधरीभूत मनोज्ञहेम्ने
शृंगारसीम्नेऽस्तु नमो महिम्ने ॥ २ ॥

वीणालसत्पाणिसरोरुहाय

शोणाधरायाखिलभाग्यदाय ।
काणादशास्त्रप्रमुखेषु चण्ड–
प्रज्ञाप्रदायास्तु नमो महिम्ने ॥ ३ ॥

चन्द्रप्रभायेशसहोदराय
चंद्रार्भकालंकृतमस्तकाय ।
इन्द्रादिदेवोत्तमपूजिताय
कारुण्यसान्द्राय नमो महिम्ने ॥ ४ ॥

***

६. श्रीवाणीशरणागतिस्तोत्रम्

वेणीं सितेतरसमीरणभोजितुल्यां
वाणीं च केकिकुलगर्वहरां वहन्तीम् ।
श्रोणीं गिरिस्मयविभेदचणां दधानां
वाणीमनन्यशरणः शरणं प्रपद्ये ॥ १ ॥

वाचः प्रयत्नमनपेक्ष्य मुखारविन्दा
द्वाताहताब्धिलहरीमदहारदक्षाः ।
वादेषु यत्करुणया प्रगलन्ति तां त्वां
वाणीमनन्यशरणः शरणं प्रपद्ये ॥ २ ॥

राकाशशाङ्कसदृशाननपङ्कजातां
शोकापहारचतुराङ्घ्रिसरोजपूजाम् ।
पाकारिमुख्यदिविषत्प्रवरेड्यमानां
वाणीमनन्यशरणः शरणं प्रपद्ये ॥ ३ ॥

बालोडुपप्रविलसत्कचमध्यभागां
नीलोत्पलप्रतिभटाक्षिविराजमानाम् ।
कालोन्मिषत्किसलयारुणपादपद्मां

वाणीमनन्यशरणः शरणं प्रपद्ये ॥ ४ ॥

***

७ . श्रीमातृपदपङ्कजाष्टकम्

(श्रीशिवाभिनवनृसिंहभारतीस्वामिविरचितम्)

मातस्त्वत्पदपङ्कजं कलयतांचेतोऽम्बुजे संततं
मानाथांबुजसंभवादितनयाकान्तैः समाराधितम् ।
वाञ्छापूरणनिर्जितामरमहीरुग्गर्वसर्वस्वकं
वाचः सूक्तिसुधारसद्रवमुचोनिर्यान्ति वक्त्रोदरात् ॥ १ ॥

मातस्त्वत्पदपङ्कजं मुनिमनः कासारवासादरं
मायामोहमहान्धकारमिहिरं मानातिगप्राभवम् ।
मातङ्गाभिमतिं स्वकीयगमनैर्निर्मूलयत्कौतुका–
द्वन्देऽमन्दतपःफलाप्यनमनःस्तोत्रार्चनाप्रक्रमम् ॥ २ ॥

मातस्त्वत्पदपङ्कजं प्रणमतामानन्दवारांनिधे
राकाशारदपूर्णचन्द्रनिकरं कामाहिपक्षीश्वरम् ।
बृन्दं प्राणभृतां स्वनामवदतामत्यादरात्सत्वरं
षड्भाषासरिदीश्वरं प्रविदधत्षाण्मातुराचर्यं भजे ॥ ३ ॥

कामं फालतलेदुरक्षरततिर्दैवीममास्तां न भीः
मातस्त्वत्पदपङ्कजोत्थरजसा लुम्पामि तां निश्चितम् ।
मार्कण्डेयमुनिर्यथा भवपदाम्भोजार्चनाप्राभवा–
त्कालंतद्वदहंचतुर्मुखमुखांभोजातसूर्यप्रभे ॥ ४ ॥

पापानि प्रशमं नयाशु ममतां देहेन्द्रियप्राणगां
कामादीनपिवैरिणो दृढतरान् मोक्षाध्वविघ्नप्रदान् ।
स्निग्धान्पोषय सन्ततं शमदमध्यानादिमान्मोदतो

मातस्त्वत्पदपङ्कजं हृदि सदा कुर्वे गिरां देवते ॥ ५ ॥

मतस्त्वत्पदपङ्कजस्य मनसा वाचा क्रियातोऽपि वा
ये कुर्वन्ति मुदान्वहं बहुविधैर्दिव्यैर्सुमैरर्चनां ।
शीघ्रं ते प्रभवन्ति भूमिपतयो निन्दन्ति च स्वश्रिया
जंभारातिमपि ध्रुवं शतमखीकष्टाप्तनाकश्रियं ॥ ६ ॥

मातस्त्वत्पदपङ्कजं शिरसि ये पद्माटवीमध्यत–
श्चन्द्राभं प्रविचिन्तयन्ति पुरुषाः पीयूषवर्ष्यन्वहम् ।
ते मृत्युं प्रविजित्य रोगरहिताः संयग्दृढाङ्गश्चिरं
जीवन्त्येव मृणालकोमलवपुष्मन्तः सुरूपा भुवि ॥ ७ ॥

मातस्त्वत्पदपङ्कजं हृदि मुदा ध्यायन्ति ये मानवाः
सच्चिद्रूपमशेषवेदशिरसांतात्पर्यगम्यं मुहुः ।
अत्यागोऽपि तनोरखण्डपरमानन्दं वहन्तः सदा
सर्वं विश्वमिदं विनाशि तरसा पश्यन्ति ते पूरुषाः ॥ ८ ॥

***

८. सरस्वतीस्तोत्रं

(पाद्मपुराणांतर्गतं)

सरस्वतीं नमस्यामि चेतनानां हृदिस्थितां ।
कण्ठस्थां पद्मयोनेस्तु हिमाकरप्रियास्पदाम् ॥ १ ॥

मतिदां वरदां शुद्धां वीणाहस्तवरप्रदां ।
ऐं ऐं मन्त्रप्रियां ह्रीं ह्रां कुमतिध्वंसकारिणीम् ॥ २ ॥

सुप्रकाशां निरालम्बां अज्ञानतिमिरापहाम् ।
शुक्लां मोक्षप्रदां रम्यां शुभाङ्गं शोभनप्रदाम् ॥ ३ ॥

पद्मोपविष्टां कुण्डलिनीं शुक्लवर्णां मनोरमाम् ।

आदित्यमण्डले लीनां प्रणमामि हरिप्रियाम् ॥ ४ ॥

इति मासं स्तुतानेन वागीशेन महात्मना ।
आत्मानं दर्शयामास शरदिन्दुसमप्रभां ॥ ५ ॥

सरस्वत्युवाच

वरं वृणीष्व भद्रं ते यत्ते मनसि वर्तते ।

बृहस्पतिः

वरदा यदि मे देवि सम्यग्ज्ञानं प्रयच्छ मे ॥ ६ ॥

सरस्वती

इदं ते निर्मलं ज्ञानं अज्ञानतिमिरापहं ।
स्तोत्रेणानेन मां स्तौति संयग्वेदविदो नराः ॥ ७ ॥

लभन्ते परमं ज्ञानं मम तुल्यपराक्रमं
त्रिसन्ध्यं यः पठेन्नित्यं यस्त्विदं जपते सदा ।
तेषां कण्ठे सदा वासं करिष्यामि न संशयः ॥ ८ ॥

***

९. श्रीवाग्देवीस्तवः

(श्रीशिवाभिनवनृसिंहभारतीस्वामिविरचितम्)

वादे शक्तिप्रदात्री प्रणतजनतते: सन्ततं सत्सभायां
प्रश्नानां दुस्तराणामपि लघु सुसमाधानमाश्वेव वक्तुम् ।
वागीशाद्यैः सुराग्र्यैर्विविधफलकृते सन्ततं पूज्यमाना
वाग्देवी वाञ्छितं मे वितरतु तरसा शृङ्गभूभृन्निवासा ॥ १ ॥

व्याख्यामुद्राक्षमालाकलशसुलिखितैः राजदंभोजपाणिः
काव्यालंकारमुख्येष्वपि निशितधियं सर्वशास्त्रेषु तूर्णम् ।
मूकेभ्योऽप्यार्द्रचित्ता दिशति करुणया या जवात्साकृपाब्धिः
वाग्देवी वाञ्छितं मे वितरतु तरसा शृङ्गभूभृन्निवासा ॥ २ ॥

जाड्यध्वान्तार्कपङ्क्तिस्तनुजितरजनीकान्तगर्वाऽऽगमानां
शीर्षैः संस्तूयमाना मुनिवरनिकरैः सन्ततं भक्तिनम्रैः ।
कारुण्यापारवारांनिधिरगतनयासिन्धुकन्याभिवाद्या
वाग्देवी वाञ्छितं मे वितरतु तरसा शृङ्गभूभृन्निवासा ॥ ३ ॥

***

१०. श्रीवाग्वादिनीषट्कम्

(श्रीशिवाभिनवनृसिंहभारतीस्वामिविरचितम्)

वरदाप्यहेतुकरुणाजन्मावनिरपि पयोजभवजाये ।
किं कुरुषे न कृपां मयि वद वद वाग्वादिनि स्वाहा ॥ १ ॥

किं वा ममास्ति महती पापततिस्तत्प्रभेदने तरसा ।
किं वा न तेऽस्ति शक्तिर्वद वद वाग्वादिनि स्वाहा ॥ २ ॥

किं जीवः परमशिवाद्भिन्नोऽभिन्नोऽथ भेदश्च ।
औपाधिकः स्वतो वा वद वदवाग्वादिनि स्वाहा ॥ ३ ॥

वियदादिकं जगदिदं सर्वं मिथ्याऽथवा सत्यम् ।
मिथ्यात्वधीः कथं स्याद्वद वद वाग्वादिनि स्वाहा ॥ ४ ॥

ज्ञानं कर्म च मिलितं हेतुर्मोक्षेऽथवा ज्ञानम् ।
तज्ज्ञानं केन भवेद्वद वदवाग्वादिनि स्वाहा ॥ ५ ॥

ज्ञानं विचारसाध्यं किं वा योगेन कर्मसाहस्रैः ।
कीदृक्सोऽपि विचारो वद वद वाग्वादिनि स्वाहा ॥ ६ ॥

***

११. श्रीवाणीप्रश्नमालास्तुतिः

किं नाहं पुत्रस्तव मातुः सचराचरस्य जगतोऽस्य ।
किं मां दूरीकुरुषे देवि गिरां ब्रूहि कारणं तत्र ॥ १ ॥

किं चाहुगर्यपादास्त्वद्भक्ता मद्गुरूत्तमाः पूर्वं ।
औरसतनयं मां तव कस्माद्दूरीकरोषि वद वाणि ॥ २ ॥

आनीय दूरतो मां मातस्त्वत्पादसविधमतिकृपया ।
परिपाल्य च सुचिरं मां कस्माद्दूरीकरोषि वद वाणि ॥ ३ ॥

अतिपरिचयादवज्ञा प्रभवेत्पुत्रेषु किं सवित्रीणां ।
नहि सा क्वचिदपि दृष्टा कस्माद्दूरीकरोषि वद वाणि ॥ ४ ॥

कादाचित्कनमस्कृतिकर्तृणामप्यभीष्टदे तरसा ।
नाहं सकृदपि नन्ता कस्माद्दूरीकरोषि वद वाणि ॥ ५ ॥

गुरुरूपेणाबाल्यात्सोढ्वा मन्तूंश्च मत्कृतान्विविधान् ।
परिरक्ष्य करुणया मां कस्माद्दूरीकरोषि वद वाणि ॥ ६ ॥

जगतां पालनमनिशं कुर्वन्त्यास्ते भवेत्कियान्भारः ।
अहमम्ब दीनवर्यः कस्माद्दूरीकरोषि वद वाणि ॥ ७ ॥

पापान्निवार्य सरणौ विमलायां मे प्रवर्तने तरसा ।
कर्तव्ये सति कृपया कस्माद्दूरीकरोषि वद वाणि ॥ ८ ॥

यद्यप्यन्यानन्यान्देवानाराधयामि न त्वं ते ।
सर्वात्मिकेति चपलः कस्माद्दूरीकरोषि वद वाणि ॥ ९ ॥

यात्राशक्तमिमं मां गलितशरीरं रुजा समाक्रान्तं ।

पात्रमहेतुकदयायाः कस्माद्दूरीकरोषि वद वाणि ॥ १० ॥

तव सद्मनि गुरुसदने विद्यातीर्थालये च बहुसुखतः ।
खेलां कुर्वन्तं मां कस्माद्दूरीकरोषि वद वाणि ॥ ११ ॥

त्वत्क्षेत्रनिकटराजन्नरसिंहाख्याचलेन्द्र शृङ्गाग्रे ।
स्वैरविहारकृतं मां कस्माद्दूरीकरोषि वद वाणि ॥ १२ ॥

त्वत्पादपूततुङ्गातीरे विजने वने चरन्तं मां ।
अनुघस्रं मोदभरात् कस्माद्दूरीकरोषि वद वाणि ॥ १३ ॥

तुङ्गातीरे दिनकरनिवेशनिकटस्थले विपुले ।
ध्यायन्तं परतत्वं कस्माद्दूरीकरोषि वद वाणि ॥ १४ ॥

तुङ्गातीरे रघुवरमन्दिरपुरतः सुदीर्घपाषाणे ।
कुतुकाद्विहरन्तं मां कस्माद्दूरीकरोषि वद वाणि ॥ १५ ॥

जातु च नरसिंहपुरे तुङ्गातीरे सुसैकते मोदात् ।
विहृतिं कुर्वाणं मां कस्माद्दूरीकरोषि वद वाणि ॥ १६ ॥

यतिवरकृतात्मविद्याविलासमनिशं पठन्तमतिमोदात् ।
कुहचित्तुङ्गातीरे कस्माद्दूरीकरोषि वद वाणि ॥ १७ ॥

शङ्करभगवत्पादप्रणीतचूडामणिं विवेकादिम् ।
शृण्वन्तं नृहरिवनेकस्माद्दूरीकरोषि वद वाणि ॥ १८ ॥

***

१२. श्रीकालटिक्षेत्रे श्रीशारदादशकम्

(श्रीशिवाभिनवनृसिंहभारतीस्वामिविरचितम्)

करवाणि वाणि किं वा जगति प्रचयाय धर्ममार्गस्य ।
कथयाशु तत्करोम्यहमहर्निशं तत्र मा कृथा विशयम् ॥ १ ॥
गणनां विधाय मत्कृतपापानां किं धृताक्षमालिकया ।
तान्ताद्याप्यसमाप्तेर्निश्चलतां पाणिपङ्कजे धत्से ॥ २ ॥

विविधाशया मदीयं निकटं दूराज्जनाः समायान्ति ।
तेषां तस्याः कथमिव पूरणमहमम्ब सत्वरं कुर्याम् ॥ ३ ॥

गतिजितमरालगर्वां मतिदानधुरन्धरां प्रणम्रेभ्यः ।
यतिनाथसेवितपदामतिभक्त्या नौमि शारदां सदयाम् ॥ ४ ॥

जगदम्बां नगतनुजाधवसहजां जातरूपतनुवल्लीम् ।
नीलेन्दीवरनयनां बालेन्दुकचां नमामि विधिजायाम् ॥ ५ ॥

भारो भारति न स्याद्वसुधायास्तद्वदंब कुरु शीघ्रम् ।
नास्तिकतानास्तिकताकरणात्कारुण्यदुग्धवाराशे ॥ ६ ॥

निकटेवसन्तमनिशं पक्षिणमपि पालयामि करतोऽहं ।
किमु भक्तियुक्तलोकानिति बोधार्थं करे शुकं धत्से ॥ ७ ॥

शृङ्गाद्रिस्थितजनतामनेकरोगैरुपद्रुतां वाणि ।
विनिवार्य सकलरोगान्पालय करुणार्द्रदृष्टिपातेन ॥ ८ ॥

मद्विरहादतिभीतान्मदेकशरणानतीव दुःखार्तान् ।
मयि यदि करुणा तव भो पालय शृङ्गाद्रिवासिनो लोकान् ॥ ९ ॥

सदनमहेतुकृपाया रदनविनिर्धूतकुन्दगर्वालिम् ।
मदनान्तकसहजातां सरसिजभवभामिनीं हृदा कलये ॥ १० ॥

***

१३. श्रीकमलजदयिताष्टकम्

(श्रीशिवाभिनवनृसिंहभारतीस्वामिविरचितम्)

शृङ्गक्ष्माभृन्निवासे शुकमुखमुनिभिः सेव्यमानाङ्घ्रिपद्मे
स्वाङ्गच्छायाविधूतामृतकरसुरराड्वाहने वाक्सवित्रि ।
शंभुश्रीनाथमुख्यामरवरनिकरैर्मोदतः पूज्यमाने
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ १ ॥

कल्यादौ पार्वतीशः प्रवरसुरगणप्रार्थितः श्रौतवर्त्म
प्राबल्यं नेतुकामो यतिवरवपुषागत्य यां शृङ्गशैले ।
संस्थाप्यार्चां प्रचक्रे बहुविधनतिभिः सात्वमिन्द्वर्धचूडा
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ २ ॥

पापौघं ध्वंसयित्वा बहुजनिरचितं किं च पुण्यालिमारा–
त्संपाद्यास्तिक्यबुद्धिं श्रुतिगुरुवचनेष्वादरंभक्तिदार्ढ्यम् ।
देवाचार्यद्विजादिष्वपि मनुनिवहे तावकीने नितान्तं
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ३ ॥

विद्यामुद्राक्षमालामृतघटविलसत्पाणिपाथोजजाले
विद्यादानप्रवीणे जडबधिरमुखेभ्योऽपि शीघ्रं नतेभ्यः ।
कामादीनान्तरान्मत्सहजरिपुवरान्देवि निर्मूल्य वेगात्
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ४ ॥

कर्मस्वात्मोचितेषु स्थिरतरधिषणां देहदार्ढ्यं तदर्थं
दीर्घं चायुर्यशश्च त्रिभुवनविदितं पापमार्गाद्विरक्तिम् ।
सत्सङ्गं सत्कथायाः श्रवणमपि सदा देवि दत्वा कृपाब्धे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ५ ॥

मातस्त्वत्पादपद्मं न विविधकुसुमैः पूजितं जातु भक्त्या
गातुं नैवाहमीशे जडमतिरलसस्त्वद्गुणान्दिव्यपद्यैः ।
मूके सेवाविहीनेऽप्यनुपमकरुणामर्भकेऽम्बेव कृत्वा
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ६ ॥

शान्त्याद्याः संपदो वितर शुभकरीर्नित्यतद्धिन्नबोधं
वैराग्यं मोक्षवाञ्छामपि लघु कलय श्रीशिवासेव्यमाने ।
विद्यातीर्थादियोगिप्रवरकरसरोजातसंपूजिताङ्घ्रे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ७ ॥

सच्चिद्रूपात्मनो मे श्रुतिमननिदिध्यासनान्याशु मातः
संपाद्य स्वान्तमेतद्रुचियुतमनिशं निर्विकल्पे समाधौ ।
तुङ्गातीराङ्कराजद्वरगृहविलसच्चक्रराजासनस्थे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ८ ॥

***

सुब्रह्मण्यस्तोत्राणि

विषयसूचिका

पृष्ठसंख्या

१. सुब्रह्मण्यभुजंगम् ४३
२. सुब्रह्मण्यपंचरत्नम् ४८
३. सुब्रह्मण्याष्टकम् १ ४९
४. स्वामिनथस्तोत्रम् ५१
५. सुब्रह्मण्याष्टकम् २ ५२

१. सुब्रह्मण्यभुजङ्गम्

(श्री शंकराचार्यकृतम्)

सदा बालरूपापि विघ्नादिहन्त्री
महादन्ति वक्त्रापि पञ्चास्यमान्या ।
विधीन्द्रादिमृग्या गणेशाभिधा मे
विधत्तां श्रियं कापि कल्याणमूर्तिः ॥ १ ॥

न जानामि शब्दं न जानामि चार्थं
न जानामि पद्यं न जानामि गद्यम् ।
चिदेका षडास्या हृदि द्योतते मे
मुखान्निस्सरन्ते गिरश्चापि चित्रम् ॥ २ ॥

मयूराधिरूढं महावाक्यगूढं
मनोहारिदेहं महच्चित्तगेहम् ।
महीदेवदेवं महावेदभावं
महादेवबालं भजे लोकपालम् ॥ ३ ॥

यदा सन्निधानं गताः मानवाः मे
भवाम्भोधिपारं गतास्ते तदैव ।
इतीवोर्मिपङ्क्तीन् नृणां दर्शयन्तं
सदा भावये हृत्सरोजे गुहं तम् ॥ ४ ॥

गिरौ मन्निवासे नरा येऽधिरूढा–
स्तदा पर्वते राजते तेऽधिरूढाः ।
इतीव ब्रुवन् गन्धशैलाधिरूढः

स देवो मुदे मे सदा षण्मुखोऽस्तु ॥ ५ ॥

महाम्भोधितीरे महापापचोरे
मुनीन्द्रानुकूले सुगन्धाख्यशैले ।
गुहायां वसन्तं स्वभासा लसन्तं
जनार्तिं हरन्तं श्रयामो गुहं तम् ॥ ६ ॥

लसत्स्वर्णगेहे नृणां कामदोहे
सुमस्तोमसंछन्नमाणिक्यमञ्चे ।
समुद्यत्सहस्रार्कतुल्यप्रकाशं
सदा भावये कार्तिकेयं सुरेशम् ॥ ७ ॥

रणद्धंसके मञ्जुलेत्यन्तशोणे
मनोहारिलावण्यपीयूषपूर्णे ।
मनः षट्पदो मे भवक्लेशतप्तः
सदा मोदतां स्कन्द ते पादपद्मे ॥ ८ ॥

सुवर्णाभदिव्याम्बरोद्भासमानां
क्वणत्किङ्किणीमेखलाशोभमानाम् ।
लसद्धेमपट्टेन विद्योतमानां
कटिं भावये स्कन्द ते दीप्यमानाम् ॥ ९ ॥

पुलिन्देशकन्याघनाभोगतुङ्ग–
स्तनालिङ्गनासक्तकाश्मीररागम् ।
नमस्याम्यहं तराकारे तवोरः
स्वभक्तावने सर्वदा सानुरागम् ॥ १० ॥

विधौ क्लृप्तदण्डान् स्वलीलाधृताण्डान्
निरस्तेभशुण्डान् द्विषां कालदण्डान् ।
हतेन्द्रारिषण्डान् जगत्त्राणशौण्डान्
सदा ते प्रचण्डान् श्रये बाहुदण्डान् ॥ ११ ॥

सदा शारदा शण्मृगाङ्का यदि स्युः
समुद्यन्त एव स्थिताश्चेत् समन्तात् ।
सदा पूर्णबिम्बा कलङ्कैश्चहीनाः
तदा त्वन्मुखानां ब्रुवे स्कन्द साम्यम् ॥ १२ ॥

स्फुरन्मन्दहासैः सहंसानि चञ्चत्–
कटाक्षावलीभृङ्गसंघोज्ज्वलानि ।
सुधास्यन्दिबिम्बाधराणीशसूनो
तवालोकये षण्मुखांभोरुहाणि ॥ १३ ॥

विशालेषु कर्णान्तदीर्घेष्वजस्रं
दयास्यन्दिषु द्वादशस्वीक्षणेषु ।
मयीषत्कटाक्षः सकृत्पातितश्चेत्
भवेत्ते दयाशील का नाम हानिः ॥ १४ ॥

सुताङ्गोद्भवोमेऽसि जीवेति षड्धा
जपन्मन्त्रमीशो मुदा जिघ्रते यान् ।
जगत्भारभृद्भ्यो जगन्नाथ तेभ्यो
किरीटोज्ज्वलेभ्यो नमो मस्तकेभ्यः ॥ १५ ॥

स्फुरद्रत्नकेयूरहाराभिराम–
श्चलत्कुण्डलश्रीलसद्गण्डभागः ।
कटौ पीतवासाः करे चारुशक्तिः
पुरस्तान्ममास्तां पुरारेस्तनूजः ॥ १६ ॥

इहायाहि वत्सेति हस्तान्प्रसार्या–
ह्वयत्यादरात् शंकरे मातुरङ्कात् ।
समुत्पत्य तातं श्रयन्तं कुमारं
हराश्लिष्टगात्रं भजे बालमूर्तिम् ॥ १७ ॥

कुमारेशसूनो गुह स्कन्द सेना–
पते शक्तिपाणे मयूराधिरूढ ।
पुलिन्दात्मजाकान्त भक्तार्तिहारिन्
प्रभो तारकारे सदा रक्ष मां त्वम् ॥ १८ ॥

प्रशान्तेन्द्रिये नष्टसंज्ञे विचेष्टे
कफोद्गारिवक्त्रे भयोत्कम्पिगात्रे ।
प्रयाणोन्मुखे मय्यनाथे तदानीं
द्रुतं मे दयालो भवाग्रे गुह त्वम् ॥ १९ ॥

कृतान्तस्य दूतेषु चण्डेषु कोपा–
द्दह च्छिन्धि भिन्धीति मां तर्जयत्सु ।
मयूरं समारुह्य मा भैरिति त्वं
पुरः शक्तिपाणे ममायाहि शीघ्रम् ॥ २० ॥

प्रणम्यासकृत्पादयोस्ते पतित्वा
प्रसाद्य प्रभो प्रार्थयेऽनेकवारं ।
न वक्तुं क्षमोऽहं तदानीं कृपाब्धे
न कार्यान्तकाले मनागप्युपेक्षा ॥ २१ ॥

सहस्राण्डभोक्ता त्वया शूरनामा
हतस्तारकः सिंहवक्त्रश्च दैत्यः ।
ममान्तर्हृदिस्थं मनः क्लेशमेकं
न हंसि प्रभो किं करोमि क्व यामि ॥ २२ ॥

अहं सर्वदा दुःखभारावसन्नो
भवान् दीनबन्धुस्त्वदन्यं न याचे ।
भवद्भक्तिरोधं सदा क्लृप्तबाधं
ममाधिं द्रुतं नाशयोमासुत त्वम् ॥ २३ ॥

अपस्मारकुष्ठक्षयार्शप्रमेह–

ज्वरोन्मादगुन्मादिरोगा महान्तः।
पिशाचाश्च सर्वे भवत्पत्रभूतिं
विलोक्यक्षणात्तारकारे द्रवन्ते ॥ २४ ॥

दृशि स्कन्दमूर्तिः श्रुतौ स्कन्दकीर्तिः
मुखे मे पवित्रं सदा तच्चरित्रम् ।
करे तस्यकृत्यं वपुस्तस्य भृत्यं
गुहे सन्तु लीनाः ममाशेषभावाः ॥ २५ ॥

मुनीनामुताहो नृणां भक्तिभाजा–
मभीष्टप्रदाः सन्ति सर्वत्र देवाः ।
नृणामन्त्यजानामपि स्वार्थदाने
गुहाद्देवमन्यं न जाने न जाने ॥ २६ ॥

कलत्रं सुताः बन्धुवर्गः पशुर्वा
नरो वाथ नारी गृहे ये मदीयाः ।
यजन्तो नमन्तः स्तुवन्तो भवन्तं
स्मरन्तश्च ते सन्तु सर्वे कुमार ॥ २७ ॥

मृगाः पक्षिणो दंशका ये च दुष्टा–
स्तथा व्याधयो बाधका ये मदङ्गे ।
भवच्छक्तितीक्ष्णाग्रभिन्नाः सुदूरे
विनश्यन्तु ते चूर्णितक्रौञ्चशैल ॥ २८॥

जनित्री पिता च स्वपुत्रापराधं
सहेते न किं देवसेनाधिनाथ ।
अहं चातिबालो भवान् लोकतातः
क्षमस्वापराधं समस्तं महेश ॥ २९ ॥

नमः केकिने शक्तये चापि तुभ्यं

नमच्छाग तुभ्यं नमः कुक्कुटाय ।
नमः सिन्धवे सिन्धुदेशाय तुभ्यं
पुनः स्कन्दमूर्ते नमस्ते नमोऽस्तु ॥ ३० ॥

जयानन्दभूमन्ञ्जयापारधामन्
जयामोघकीर्ते जयानन्दमूर्ते ।
जयानन्दसिन्धो जयाशेषबन्धो
जय त्वं सदा मुक्तिदानेशसूनो ॥ ३१ ॥

भुजङ्गाख्यवृत्तेन कृप्तं स्तवं यः
पठेत्भक्तियुक्तो गुहं संप्रणम्य ।
स पुत्रान् कलत्रं धनं दीर्घमायुः
लभेत् स्कन्दसायूज्यमन्ते नरः सः ॥ ३२ ॥

***

.. श्रीसुब्रह्मण्यपञ्चरत्नम्

षडाननं चन्दनलेपिताङ्गं
महामतिं दिव्यमयूरवाहनम् ।
रुद्रस्य सूनुं सुरलोकनाथं
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ १ ॥

जाज्वल्यमानं सुरवृन्दवन्द्यं
कुमारधारतटमन्दिरस्थम् ।
कन्दर्परूपं कमनीयगात्रं
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ २ ॥

द्विषड्भुजं द्वादशदिव्यनेत्रं
त्रयीतनुं शूलमसिं दधानम् ।
शेषावतारं कमनीयरूपम्
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ ३ ॥

सुरारिघोराहवशोभमानं
सुरोत्तमं शक्तिधरं कुमारम् ।
सुधारशक्त्यायुधशोभिहस्तं
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ ४ ॥

इष्टार्थसिद्धिप्रदमीशपुत्रं
मिष्टान्नदं भूसुरकामधेनुम् ।
गंगोद्भवं सर्वजनानुकूलं
ब्रह्मण्यदेवं शरणं प्रपद्ये ॥ ५ ॥

यः श्लोकपञ्चकमिदं पठतीह भक्त्या
ब्रह्मण्यदेवविनिवेशितमानसः सन् ।
प्राप्नोतिभोगमखिलं भुवि यद्यदिष्टं
अन्ते स गच्छति मुदा गुहसाम्यमेव ॥ ६ ॥

***

३. <u>श्रीसुब्रह्मण्याष्टकम् –१</u>

हे स्वामिनाथ करुणाकर दीनबन्धो
श्रीपार्वतीशमुखपङ्कजपद्मबन्धो ।
श्रीशादिदेवगणपूजितपादपद्म
वल्लीश नाथ मम देहि करावलम्बम् ॥ १ ॥

देवादिदेवसुत देवगणाधिनाथ
देवेन्द्रवन्द्यमृदुपङ्कजमञ्जुपाद ।
देवर्षिनारदमुनीन्द्रसुगीतकीर्ते
वल्लीश नाथ मम देहि करावलम्बम् ॥ २ ॥

नित्यान्नदाननिरताखिलरोगहारिन्
भाग्यप्रदानपरिपूरितभक्तकाम ।

श्रुत्यागमप्रणववाच्यनिजस्वरूप
वल्लीश नाथ मम देहि करावलम्बम् ॥ ३ ॥

क्रौञ्चासुरेन्द्रपरिखण्डनशक्तिशूल
चापादिशस्त्रपरिमण्डितदिव्यपाणे ।
श्रीकुण्डलीशधृततुण्डशिखीन्द्रवाह
वल्लीश नाथ मम देहि करावलम्बम् ॥ ४ ॥

देवादिदेवरथमण्डलमध्यमेत्य
देवेन्द्रपीठनगरं धृतचापहस्त ।
शूरं निहत्य सुरकोटिभिरीड्यमान
वल्लीश नाथ मम देहि करावलम्बम् ॥ ५ ॥

हीरादिरत्नवरयुक्तकिरीटहार
केयूरकुण्डललसत् कवचाभिराम ।
हे वीर तारकजयामरबृन्दवन्द्य
वल्लीश नाथ मम देहि करावलम्बम् ॥ ६ ॥

पञ्चाक्षरादिमुनिमन्त्रितगांगतोयैः
पञ्चामृतैः प्रमुदितेन्द्रमुखैर्मुनीन्द्रैः ।
पट्टाभिषिक्त मघवत्तनयासनाथ
वल्लीश नाथ मम देहि करावलम्बम् ॥ ७ ॥

श्रीकार्तिकेयकरुणामृतपूर्णदृष्ट्या
कामादिरोगकलुषीकृतदुष्टचित्तं । ।
सिक्त्वा तु मामव कलानिधिकोटिकान्त
वल्लीश नाथ मम देहि करावलम्बम् ॥ ८ ॥

सुब्रह्मण्याष्टकं पुण्यं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे मुक्तिमायान्ति सुब्रह्मण्यप्रभावतः ॥ ९ ॥

सुब्रह्मण्याष्टकमिदं प्रातरुत्थाय यः पठेत ।
कोटिजन्मकृतं पापं तत्क्षणात् तस्य नश्यति ॥ १० ॥

***

४. श्रीस्वामिनाथस्तोत्रम्

(श्री अनन्तरामदीक्षितकृतम्)

हे स्वामिनाथार्तबन्धो
भस्मलिप्ताङ्ग गांगेय कारुण्यसिन्धो ॥ १ ॥

रुद्राक्षधारिन् नमस्ते रौद्र–
रोगं हर त्वं पुरारेर्गुरो मे ।
राकेन्दुवक्त्रं भवन्तं मार–
रूपं कुमारं भजे कामपूरम्

हे स्वामिनाथार्तबन्धो
भस्मलिप्ताङ्ग गांगेय कारुण्यसिन्धो ॥ २ ॥

मां पाहिरोगादघोरात् मंग–
लापाङ्गपातेन भङ्गत्स्वराणाम्
कालाच्च दुष्पाककूलात् काल–
कालस्य सूनुं भजे क्रान्तसानुम्

हे स्वामिनाथार्तबन्धो
भस्मलिप्ताङ्ग गांगेय कारुण्यसिन्धो ॥ ३ ॥

ब्रह्मादयो यस्य शिष्याः ब्रह्म–
पुत्रा गिरौ यस्य सोपानभूताः
सैन्यं सुराश्चापि सर्वे साम–
वेदादिगेयं भजे कार्तिकेयम्

हे स्वामिनाथार्तबन्धो
भस्मलिप्ताङ्ग गांगेय कारुण्यसिन्धो ॥ ४ ॥

काषायसंवीतगात्रं काम–
रोगादिसंहारभिक्षान्नपात्रम्
कारुण्यसंपूर्णनेत्रं शक्ति–
हस्तं पवित्रं भजे शंभुपुत्रम्

हे स्वामिनाथार्तबन्धो
भस्मलिप्ताङ्ग गांगेय कारुण्यसिन्धो ॥ ५ ॥

श्रीस्वामिशैलेवसन्तं साधु–
संघस्य रोगान् सदा संहरन्तम्
ओंकारतत्वं वदन्तं शम्भु–
कर्णे हसन्तं भजेऽहं शिशुं तम्

हे स्वामिनाथार्तबन्धो
भस्मलिप्ताङ्ग गांगेय कारुण्यसिन्धो ॥ ६ ॥

स्तोत्रं कृतं चित्रचित्रं दीक्षि–
तानन्तरामेण सर्वार्थसिद्ध्यै
भक्त्या पठेत् यः प्रभाते
देवदेवप्रसादात् लभेताष्टसिद्धिम्

हे स्वामिनाथार्तबन्धो
भस्मलिप्ताङ्ग गांगेय कारुण्यसिन्धो ॥ ७ ॥

***

५. श्रीसुब्रह्मण्याष्टकम् –२

(अगस्त्यकृतं, स्कान्दपुराणान्तर्गतम्)

नमोऽस्तु वृन्दारकबृन्दवन्द्य–
पादारविन्दाय सुधाकराय ।
षडाननायामितविक्रमाय
गौरीहृदानन्दसमुद्भवाय ॥ १ ॥

नमोऽस्तु तुभ्यं प्रणतार्तिहन्त्रे
कर्त्रे समस्तस्य मनोरथानाम् ।
दात्रे रतानां परतारकस्य
हन्त्रे प्रचण्डासुरतारकस्य ॥ २ ॥

अमूर्तमूर्तायसहस्रमूर्तये
गुणायगुण्यायपरात्पराय ।
अपारपाराय परात्पराय
नमोऽस्तु तुभ्यं शिखिवाहनाय ॥ ३ ॥

नमोऽस्तु ते ब्रह्मविदांवराय
दिगंबरायाम्बरसंस्थिताय ।
हिरण्यवर्णाय हिरण्यबाहवे
नमो हिरण्याय हिरण्यरेतसे ॥ ४ ॥

तपःस्वरूपाय तपोधनाय
तपः फलानां प्रतिपादकाय ।
सदा कुमाराय हिमारमारिणे
तृणीकृतैश्वर्यविरागिणे नमः ॥ ५ ॥

नमोऽस्तु तुभ्यं शरजन्मने विभो
प्रभातसूर्यारुण दन्तपङ्क्तये ।
बालाय चाबालपराक्रमाय
षण्मातुराबालमनातुराय ॥ ६ ॥

मीढुष्टमायोत्तरमीढुषे नमो

नमो गणानांपतये गणाय ।
नमोऽस्तु ते जन्मजरातिगाय
नमो विशाखाय सुशक्तिपाणये ॥ ७ ॥

सर्वस्यनाथस्य कुमारकाय
क्रौञ्चारये तारकमारकाय ।
स्वाहेय गांगेय च कार्तिकेय
शैलेय तुभ्यं सततं नमोऽस्तु ॥ ८ ॥

***

शिवस्तोत्राणि

विषयसूची

	पृष्ठ संख्या
१. शिवमानसपूज	५७
२. शिवपंचाक्षरस्तोत्रं	५८
३. द्वादशज्योतिर्लिंगस्तोत्रं	५८
४. शिवाष्टकम् १	५९
५. शिवापराधक्षमापनस्तोत्रं	६०
६. श्री परमेश्वरपंचरत्नस्तोत्रम्	६३
७. श्री विश्वनाथाष्टकम्	६४
८. श्री रुद्राष्टकम्	६५
९. शिवषडक्षरीस्तोत्रम्	६७
१०. शिवाष्टकम् २	६८
११. शिवनामावल्यष्टकम्	६९
१२. दारिद्र्यदहनस्तोत्रम्	७०
१३. शिवस्तोत्रम् १	७२
१४. शिवस्तोत्रम् २	७३
१५. सदाशिवाष्टकम्	७४
१६. शिवाष्टकम् ३	७६
१७. अर्द्धनारीश्वराष्टकम्	७७
१८. शिवभुजंगम्	७९
१९. शिवताण्डवस्टोत्रम्	८६
२०. लिङ्गाष्टकम्	८८
२१. बिल्वाष्टकम्	९०
२२. कालभैरवाष्टकम्	९१
२३. चरणशृंगरहितनटराजस्तोत्रम्	९२
२४. श्री मार्गबंधुस्तोत्रम्	९४
२५. उमामहेश्वरस्तोत्रम्	९५
२६. वेदसारशिवस्तोत्रम्	९७
२७. स्वर्णमालास्तुतिः	९९

शिवस्तोत्राणि

विषयसूची

	पृष्ठ संख्या
२८. दशश्लोकीस्तुतिः	१०४
२९. श्री दक्षिणामूर्त्यष्टकम् १	१०६
३०. द्वादशज्योतिर्लिंगस्तोत्रम्	१०८
३१. दक्षिणामूर्तिस्तोत्रम्	११०
३२. श्री दक्षिणामूर्तिस्तोत्रम्	१११
३३. शिवस्तोत्रम् ३	११४
३४. पशुपत्यष्टकम्	११५
३५. श्री पार्वतीपरमेश्वरध्यानम्	११७
३६. शिव जयजयकारस्तोत्रम्	११८
३७. शिवरक्षास्तोत्रम्	११९
३८. शिवाष्टोत्तरशतनामस्तोत्रम्	१२०
३९. प्रदोषस्तोत्रम्	१२२
४०. शिवस्तोत्रम् ४	१२३
४१. अपराधाष्टकम्	१२४
४२. शंकराष्टकम्	१२५
४३. शिवाष्टकम् ४	१२६
४४. विश्वमूर्त्यष्टकम्	१२७
४५. चन्द्रशेखराष्टकम्	१२९
४६. महामृत्युंजयस्तोत्रम्	१३१
४७. नरराजध्यानम्	१३३
४८. श्री चिदंबरेश्वरस्तोत्रं	१३४
४९. शिवशंकरस्तोत्रम्	१३६
५०. आर्तत्राणपरायण गंगाधराष्टकम्	१३९
५१. निर्वाणदशकस्तोत्रम्	१४०
५२. शिवमन्नालाष्टकम्	१४२
५३. श्री वैद्यनाथाष्टकम्	१४३

***

१. शिवमानसपूजा

(श्री शंकराचार्यकृतं)

रत्नैः कल्पितमासनं हिमजलैस्नानं च दिव्यांबरं
नानारत्नविभूषणं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचंपकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ १ ॥

सौवर्णे मणिखण्डरत्नखचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रंभाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
तांबूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २ ॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ३ ॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत् कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥ ४ ॥

करचरणकृतं वा कायजं कर्मजं वा
श्रवण नयनजं वा मानसं वाऽपराधं ।
विहितमविहितं वा सर्वमेतत् क्षमस्व

जय जय करुणाब्धे श्रीमहादेव शंभो ॥ ५ ॥

***

२. शिवपञ्चाक्षरस्तोत्रम्

(श्री शंकराचर्यकृतं)

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगंबराय तस्मै नकाराय नमश्शिवाय ॥ १ ॥

मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथ महेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमश्शिवाय ॥ २ ॥

शिवाय गौरीवदनाब्जवृन्द– सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठायवृषध्वजाय तस्मै शिकाराय नमश्शिवाय ॥ ३ ॥

वसिष्ठकुंभोद्भवगौतमार्य– मुनीन्द्रदेवार्चित शेखराय ।
चन्द्रार्क वैश्वानरलोचनाय तस्मै वकाराय नमश्शिवाय ॥ ४ ॥

यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगंबराय तस्मै यकाराय नमश्शिवाय ॥ ५ ॥

पञ्चाक्षरमिदं पुण्यं यः पठेत् शिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेनसह मोदते ॥ ६ ॥

***

३. द्वादशज्योतिर्लिङ्गानि

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनं ।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥ १ ॥

परल्यां वैद्यनाथं च डाकिन्यां भीमशंकरं ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥ २ ॥

वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुश्मेशं च शिवालये ॥ ३ ॥

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥ ४ ॥

***

४. शिवाष्टकम् – १

(श्री शंकराचर्यकृतम्)

तस्मै नमः परमकारणकारणाय
दीप्तोज्ज्वलज्वलितपिङ्गललोचनाय ।
नागेन्द्रहारकृतकुण्डलभूषणाय
ब्रह्मेन्द्रविष्णुवरदाय नमः शिवाय ॥ १ ॥

श्रीमत्प्रसन्नशशिपन्नगभूषणाय
शैलेन्द्रजावदनचुम्बितलोचनाय ।
कैलासमन्दरमहेन्द्र निकेतनाय
लोकत्रयार्तिहरणाय नमः शिवाय ॥ २ ॥

पद्मावदातमणिकुण्डलगोवृषाय
कृष्णागरुप्रचुरचन्दनचर्चिताय ।
भस्मानुषक्तविकचोत्पलमल्लिकाय
नीलाब्जकण्ठसदृशाय नमः शिवाय ॥ ३ ॥

लम्बत्सपिङ्गलजटामुकुटोत्कटाय
दंष्ट्राकरालविकटोत्कटभैरवाय ।
व्याघ्राजिनाम्बरधराय मनोहराय
त्रैलोक्यनाथनमिताय नमः शिवाय ॥ ४ ॥

दक्षप्रजापतिमहामखनाशनाय
क्षिप्रं महात्रिपुरदानवघातनाय ।
ब्रह्मोर्जितोर्ध्वगकरोटिनिकृन्तनाय
योगाययोगनमिताय नमः शिवाय ॥ ५ ॥

संसारसृष्टिघटनापरिवर्तनाय
रक्षःपिशाचगणसिद्धसमाकुलाय ।
सिद्धोरगग्रहगणेन्द्रनिषेविताय
शार्दूलचर्मवसनाय नमः शिवाय ॥ ६ ॥

भस्माङ्गरागकृतरूपमनोहराय
सौम्यावदातवनमाश्रितमाश्रिताय ।
गौरीकटाक्षनयनार्धनिरीक्षणाय
गोक्षीरधारधवलाय नमः शिवाय ॥ ७ ॥

आदित्यसोमवरुणानिलसेविताय
यज्ञाग्निहोत्रवरधूमनिकेतनाय ।
ऋक्सामवेदमुनिभिः स्तुतिसंयुताय
गोपाय गोपनमिताय नमः शिवाय ॥ ८ ॥

शिवाष्टकमिदं पुण्यम् यः पठेत् शिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ९ ॥

५. शिवापराधक्षमापणस्तोत्रम्

(श्री शंकराचर्यकृतं)

आदौ कर्मप्रसङ्गात् कलयति कलुषं मातृकुक्षौ स्थितं माम्
विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः ।
यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुम्
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ १ ॥

बाल्ये दुःखातिरेको मललुलितवपुः स्तन्यपाने पिपासा
नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिताः जन्तवो मां तुदन्ति ।
नानारोगादिदुःखात् रुदनपरवशः शंकरं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ २ ॥

प्रौढोहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टो विवेकः सुतधनयुवतिस्वादसौख्ये निषण्णः ।
शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ ३ ॥

वार्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवादितापैः
पापैः रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनं च दीनम् ।
मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ ४ ॥

नो शक्यं स्मार्त कर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे ।
नास्था धर्मे विचारः श्रवणमननयोः किं निदिध्यासितव्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ ५ ॥

स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गाङ्गतोयं
पूजार्थं वा कदाचित् बहुतरगहनात् खण्डबिल्वीदलानि ।
नानीता पद्ममाला सरसिविकसिता गन्धपुष्पे त्वदर्थं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ ६ ॥

दुग्धैः मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैवलिङ्गं
नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः ।
धूपैः कर्पूरदीपैः विविधरसयुतैः नैव भक्ष्योपहारैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ ७ ॥

ध्यात्वा चित्ते शिवाख्यम् प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः ।
नो तप्तं गाङ्गतीरे व्रतजपनियमैः रुद्रजाप्यैर्न वेदैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ ८ ॥

स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्ष्ममार्गे
शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये ।
लिङ्गज्ञे ब्रह्मवाक्ये सकलतनुगतं शंकरं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ ९ ॥

नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित् ।
उन्मन्यावस्थया त्वां विगतकलिमलं शंकरं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शंभो ॥ १० ॥

चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शंकरे
सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थ वैश्वानरे
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे
मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥ ११ ॥

किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
किंवा पुत्र–कलत्र–मित्र–पशुभिः देहेन गेहेन किम् ।
ज्ञात्वैतत् क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥ १२ ॥

आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनम्
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।
लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितम्
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ १३ ॥

करचरणकृतं वा कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शंभो ॥ १४ ॥

***

६. श्रीपरमेश्वर पञ्चरत्नस्तोत्रम्

(श्री शंकराचार्यकृतं)

प्रातः स्मरामि परमेश्वर–वक्त्रपद्मं
फालाक्षकीलपरिशोषितपञ्चबाणम् ।
भस्मत्रिपुण्ड्रलसितं फणिकुण्डलाढ्यं
कुंदेन्दुचन्दनसुधासममन्दहासम् ॥ १ ॥

प्रातर्भजामि परमेश्वर–बाहुदण्डान्
खट्वाङ्गशूलहरिणाहिपिनाकयुक्तान् ।
गौरीकपोलकुचरंजितपत्ररेखान्
सौवर्णकङ्कणमणिद्युतिभासमानान् ॥ २ ॥

प्रातर्नमामि परमेश्वरपादपद्मं
पद्मोद्भवामरमुनीन्द्रमनोनिवासम् ।
पद्माक्षनेत्रसरसीरुहपूजनीयमं
पद्माङ्कुशध्वजसुदर्शनलांछनाढ्यम् ॥ ३ ॥

प्रातः स्मरामि परमेश्वर पुण्यमूर्तिं
कर्पूरकुन्दधवलं गजचर्मचेलम्
गङ्गाधरं घनकपर्दविभासमानं
कात्यायनी–तनु–विभूषित–वामभागम् ॥ ४ ॥

प्रातः स्मरामि परमेश्वर–पुण्यनाम
श्रेयः प्रदं सकलदुःखविनाशहेतुम् ।
संसारतापशमनं कलिकल्मषघ्नं
गोकोटिदानफलदं स्मरणेन पुंसाम् ॥ ५ ॥

श्रीपञ्चरत्नानि महेश्वरस्य
भक्त्या पठेद्यः प्रयतः प्रभाते ।
आयुष्यमारोग्यमनेकभोगान्
प्राप्नोति कैवल्यपदं दुरापम् ॥ ६ ॥

७. श्रीविश्वनाथाष्टकम्

(श्री महर्षि व्यासप्रणीतम्)

गङ्गातरङ्गरमणीयजटाकलापं
गौरीनिरन्तरविभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥

वाचामगोचरमनेकगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ २ ॥

भूताधिपं भुजगभूषणभूषिताङ्गं
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रद शूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ३ ॥

शीतांशुशोभितकिरीटविराजमानं
फालेक्षणानलविशोषितपञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४ ॥

पञ्चाननं दुरितमत्तमतङ्गजानां
नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकजराटवीनां
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ५ ॥

तेजोमयं सगुणनिर्गुणमद्वितीय–
मानन्दकन्दमपराजितमप्रमेयम् ।
नागात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ६ ॥

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ७ ॥

आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ८ ॥

वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
संप्राप्य देहविलये लभते च मोक्षम् ॥ ९ ॥

विश्वानाथाष्टकमिदं यः पठेच्छिवसन्निधौ
शिवलोकमवाप्नोति शिवेन सह मोदते

***

८. श्रीरुद्राष्टकम्

(गोस्वामि तुलसीदासकृतम्)

नमामीशमीशाननिर्वाणरूपं
विभुं व्यापकं ब्रह्मवेदस्वरूपम् ।
अजं निर्गुणं निर्विकल्पं निरीहं
चिदाकारमाकाशवासं भजेऽहम् ॥ १ ॥

निराकारमोङ्कारमूलं तुरीयं
गिराज्ञानगोतीतमीशं गिरीशम् ।
करालं महाकालकालं कृपालं
गुणाकारसंसारपारं नतोऽहम् ॥ २ ॥

तुषाराद्रिसङ्काशगौरं गभीरं
मनोभूतकोटिप्रभासी शरीरम् ।
स्फुरन्मौलिकल्लोलिनी चारुगङ्गा
लसद्भालबालेन्दु कन्ठे भुजङ्गम् ॥ ३ ॥

चलत्कुण्डलं शुभ्रनेत्रं विशालं
प्रसन्नाननं नीलकण्ठं दयालुम् ।
मृगाधीशचर्माम्बरं मुण्डमालं
प्रियं शंकरं सर्वनाथं भजामि ॥ ४ ॥

प्रचण्डं प्रकृष्टं प्रगल्भं परेश–
मखण्डं भजे भानुकोटिप्रकाशम् ।
त्रयीशूलनिर्मूलनं शूलपाणिं
भजेऽहं भवानीपतिं भावगम्यम् ॥ ५ ॥

कलातीतकल्याणकल्पान्तकारी
सदासज्जनानन्ददाता पुरारिः ।
चिदानन्दसन्दोहमोहापहारी
प्रसीद प्रसीद प्रभो मन्मथारे ॥ ६ ॥

न यावद्शिवानाथपादारविन्दं
भजन्तीहलोके परे वा नराणां ।
न तावद्सुखं शान्ति सन्तापनाशं
प्रसीद प्रभो सर्वभूताधिवास ॥ ७ ॥

न जानामि योगं जपं नैव पूजां
नतोऽहं सदा सर्वदा देव तुभ्यम् ।
जराजन्मदुःखौघतातप्यमानं
प्रभो पाहि शापान्नमामीश शंभो ॥ ८ ॥

रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतुष्टये ।
ये पठन्ति नरा भक्त्या तेषां शंभुः प्रसीदति ॥ ९ ॥

***

९. शिवषडक्षरीस्तोत्रम्

ओंकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं तस्मात् ओंकाराय नमो नमः ॥ १ ॥

नमन्ति मुनयः सर्वे नमन्त्यप्सरसां गणाः।
नरा नमन्ति देवेशं नकाराय नमो नमः ॥ २ ॥

महत्तत्वं महादेवं महाज्ञानप्रदं परम् ।
महापापहरं देवं मकाराय नमो नमः ॥ ३ ॥

शिवं शान्तं जगन्नाथं लोकानुग्रहकारकम् ।
शिवमेकपदं नित्यं शिकाराय नमो नमः ॥ ४ ॥

वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम् ।
वामे शक्तिधरो देवः वकाराय नमो नमः ॥ ५ ॥

यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः ।
यो गुरुः सर्वदेवानां यकाराय नमो नमः ॥ ६ ॥

षडक्षरमिदं स्तोत्रं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति शिवेन सह मोदते ॥ ७ ॥

१०. शिवाष्टकम्– २

(ब्रह्मवैवर्तपुराणान्तर्गतम्)

प्रभुं प्राणनाथं विभुं विश्वनाथं
जगन्नाथनाथं सदाऽऽनन्दभाजां ।
भवत्भव्यभूतेश्वरं भूतनाथं
शिवं शंकरं शंभुमीशानमीडे ॥ १ ॥

गले रुण्डमालं तनौ सर्पजालं
महाकालकालं गणेशादिपालम् ।
जटाजूटगङ्गोत्तरङ्गोत्तमाङ्गं
शिवं शंकरं शंभुमीशानमीडे ॥ २ ॥

मुदामाकरं मण्डनं मण्डनानां
महोमण्डलं भस्मभूषाधरं तम् ।
अनादिं ह्यपारं महामोहमारं
शिवं शंकरं शंभुमीशानमीडे ॥ ३ ॥

वटाधोनिवासं महाट्टाट्टहासं
महापापनाशं सदा सुप्रकाशम् ।
गिरीशं गणेशं सुरेशं महे
शिवं शंकरं शंभुमीशानमीडे ॥ ४ ॥

गिरीन्द्रात्मजासंगृहीतार्धदेहं
गिरौ संस्थितं सर्वदाऽऽसन्नगेहम् ।
परं ब्रह्म देवादिभिर्वन्द्यमानं
शिवं शंकरं शंभुमीशानमीडे ॥ ५ ॥

कपालं त्रिशूलं कराभ्यां दधानं
पदांभोजनम्राय कामं ददानम् ।
वलीवर्दयानं सुराणां प्रधानं
शिवं शंकरं शंभुमीशानमीडे ॥ ६ ॥

शरच्चन्द्रगात्रं गणानन्दपात्रं
त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।
अपर्णाकलत्रं सदा सच्चरित्रं
शिवं शंकरं शंभुमीशानमीडे ॥ ७ ॥

हरं सर्पहारान्वितं गोविहारं
भवं वेदसारं सदा निर्विकारम् ।
श्मशाने वसन्तं मनोजं दहन्तं
शिवं शंकरं शंभुमीशानमीडे ॥ ८ ॥

स्तवं यः प्रभाते नरः शूलपाणेः
पठेत् सर्वदा भर्गभावानुरक्तः ।
स पुत्रं धनं धान्यमित्रं कलत्रं
विचित्रः समासाद्य मोक्षं प्रयाति ॥ ९ ॥

११. शिवनामावल्यष्टकम्
(श्री शंकराचार्यकृतम्)

हे चन्द्रचूड मदनान्तक शूलपाणे
स्थाणो गिरीश गिरिजेश महेश शंभो ।
भूतेश भीतभयसूदन मामनाथं
संसारदुःखगहनाज्जगदीश रक्ष ॥ १ ॥

हे पार्वतीहृदयवल्लभ चन्द्रमौले
भूताधिप प्रमथनाथ गिरीशचाप ।
हे वामदेव भव रुद्र पिनाकपाणे
संसारदुःखगहनाज्जगदीश रक्ष ॥ २ ॥

हे नीलकण्ठ वृषभध्वज पञ्चवक्त्र
लोकेश शेषवलय प्रमथेश शर्व ।
हे धूर्जटे पशुपते गिरिजापते मां
संसारदुःखगहनाज्जगदीश रक्ष ॥ ३ ॥

हे विश्वनाथ शिव शंकर देवदेव
गङ्गाधर प्रमथनायक नन्दिकेश ।
बाणेश्वरान्धकरिपो हर लोकनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥ ४ ॥

वाराणसीपुरपते मणिकर्णिकेश
वीरेश दक्षमखकाल विभो गणेश ।
सर्वज्ञ सर्वहृदयैकनिवास नाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥ ५ ॥

श्रीमन् महेश्वर कृपामय भो दयालो
हे व्योमकेश शितिकण्ठ गणाधिनाथ ।
भस्माङ्गराग नृकपालकलापमाल
संसारदुःखगहनाज्जगदीश रक्ष ॥ ६ ॥

कैलासशैलविनिवास वृषाकपे हे
मृत्युंजय त्रिनयन त्रिजगन्निवास ।
नारायणप्रिय मदापह शक्तिनाथ
संसारदुःखगहनाज्जगदीश रक्ष ॥ ७ ॥

विश्वेश विश्वभवनाशक विश्वरूप
विश्वात्मक त्रिभुवनैकगुणाभिवेश ।
हे विश्वबन्धविनिवारण दीनबन्धो
संसारदुःखगहनाज्जगदीश रक्ष ॥ ८ ॥

***

१२. दारिद्र्यदहनशिवस्तोत्रम्

(वसिष्ठविरचितम्)

विश्वेश्वराय नरकार्णवतारणाय
कर्णामृताय शशिशेखरधारणाय ।
कर्पूरकान्तिधवलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ १ ॥

गौरीप्रियाय रजनीशकलाधराय
कालान्तकाय भुजगाधिपकङ्कणाय ।
गङ्गाधराय गजराजविमर्दनाय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ २ ॥

भक्तप्रियाय भवरोगभयापहाय
उग्राय दुर्गभवसागरतारणाय ।
ज्योतिर्मयाय गुणनामसुकृत्यकाय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ३ ॥

चर्माम्बराय शवभस्मविलेपनाय
भालेक्षणाय मणिकुण्डलमण्डिताय ।
मंजीरपादयुगलाय जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ४ ॥

पञ्चाननाय फणिराजविभूषणाय
हेमांशुकाय भुवनत्रय मण्डिताय ।
आनन्दभूमिवरदाय तमोमयाय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ५ ॥

गौरीविलासभवनाय महेश्वराय
पञ्चाननाय शरणागतकल्पकाय ।
शर्वाय सर्वजगतामधिपाय तस्मै
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ६ ॥

भानुप्रियाय भवसागरतारणाय
कालान्तकाय कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ७ ॥

रामप्रियाय राघुनाथवरप्रदाय
नागप्रियाय नरकार्णवतारणाय ।
पुण्येषु पुण्यभरिताय सुरार्चिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ८ ॥

मुक्तेश्वराय फलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥ ९ ॥

वसिष्ठेनकृतं स्तोत्रं सर्व दारिद्र्यनाशनम् ।
सर्वसंपत्करं शीघ्रं पुत्रपौत्रादिवर्धनम् ॥ १० ॥

***

१३. शिवस्तोत्रम्

(कल्किकृतम्)

गौरीनाथं विश्वनाथं शरण्यं
भूतावासं वासुकीकण्ठभूषम् ।
त्र्यक्षं पञ्चास्यादिदेवं पुराणं
वन्दे सान्द्रानन्दसंदोहदक्षम् ॥ १ ॥

योगाधीशं कामनाशं करालं
गङ्गासङ्गक्लिन्नमूर्धानमीशम् ।
जटाजूटाटोपरि क्षिप्तभावं
महाकालं चन्द्रफालं नमामि ॥ २ ॥

यो भूतादिः पञ्चभूतैः सिसृक्षुः
तन्मात्रात्मा कालकर्मस्वभावैः ।
प्रहृत्येदं प्राप्य जीवत्वमीशो
ब्रह्मानन्दे क्रीडते तं नमामि ॥ ३ ॥

स्थितौ विष्णुः सर्वजिष्णुः सुरात्मा
लोकान् साधून् धर्मसेतून् बिभर्ति ।
ब्रह्माद्यंशे योऽभिमानी गुणात्मा
शब्दाद्यङ्गैः तं परेशं नमामि ॥ ४ ॥

यस्याज्ञया वायवो वान्ति लोके
ज्वलत्यग्निः सविता याति तप्यन् ।
शीतांशुः खे तारकासंग्रहश्च
प्रवर्तन्ते तं परेशं प्रपद्ये ॥ ५ ॥

यस्य श्वासात् सर्वधात्री धरित्री
देवो वर्षत्यम्बु कालः प्रमाता ।
मेरुर्मध्ये भुवनानां च भर्ता
तमीशानं विश्वरूपं नमामि ॥ ६ ॥

***

१४. शिवस्तोत्रम्

(असितकृतम्)

जगत्गुरो नमस्तुभ्यं शिवाय शिवदाय च ।
योगीन्द्राणां च योगीन्द्र गुरूणां गुरवे नमः ॥ १ ॥

मृत्योर्मृत्युस्वरूपेण मृत्युसंसारखण्डन ।
मृत्योरीश मृत्युबीज मृत्युंजय नमोऽस्तु ते ॥ २ ॥

कालरूपं कलयतां कालकालेश कारण ।
कालादतीत कालस्थ कालकाल नमोऽस्तु ते ॥ ३ ॥

गुणातीत गुणाधार गुणबीज गुणात्मक ।
गुणीश गुणिनां बीज गुणिनां गुरवे नमः ॥ ४ ॥

ब्रह्मस्वरूप ब्रह्मज्ञ ब्रह्मभावे च तत्पर ।
ब्रह्मबीजस्वरूपेण ब्रह्मबीज नमोऽस्तु ते ॥ ५ ॥

असितेन कृतं स्तोत्रं भक्तियुक्तश्च यः पठेत् ।
वर्षमेकं हविष्याशी शंकरस्य महात्मनः ॥ ६ ॥

स लभेत् वैष्णवं पुत्रं ज्ञानिनं चिरजीविनम् ।
दरिद्रो धनमाप्नोति मूको भवति पण्डितः ॥ ७ ॥

अभार्यो लभते भार्यां सुशीलां च पतिव्रताम् ।
इहलोके सुखं भुक्त्वा यात्यन्ते शिवसन्निधौ ॥ ८ ॥

इदं स्तोत्रं पुरा दत्तं ब्रह्मणा च प्रचेतसे ।
प्रचेतसोत्तमं दत्तं स्वपुत्रायासिताय हि ॥ ९ ॥

***

१५. सदाशिवाष्टकम्

(पतञ्जलिकृतम्)

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरेन्द्रधारिणे
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ १ ॥

सतुङ्गभङ्गजह्नुजासुधांशुखण्डमौलये
पतङ्गपङ्कजासुहृत्कृपीटयोनिचक्षुषे ।
भुजङ्गराजमण्डनाय पुण्यशालिबन्धवे
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ २ ॥

चतुर्मुखाननारविन्दवेदगीतभूतये
चतुर्भुजानुजाशरीरशोभमानमूर्तये ।
चतुर्विधार्थदान–शौण्डताण्डवस्वरूपिणे
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ३ ॥

शरन्निशाकरप्रकाशमन्दहासमन्जुला–
धरप्रवालभासमानवक्त्रमण्डलश्रिये ।
करस्फुरत्कपालमुक्तविष्णुरक्तपायिने
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ४ ॥

सहस्रपुण्डरीकपूजनैकशून्यदर्शनात्
सहस्रनेत्रकल्पितार्चनाच्युताय भक्तितः ।
सहस्रभानुमण्डलप्रकाशचक्रदायिने
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ५ ॥

रसारथाय रम्यपत्रभृद्रथाङ्गपाणये
रसाधरेन्द्रचापशिञ्जिनीकृतानिलाशिने ।
स्वसारथीकृताब्जयोनिनुन्नवेदवाजिने
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ६ ॥

अतिप्रगल्भवीरभद्रसिंहनादगर्जित–
श्रुतिप्रभीतदक्षयागभागिनाकसद्मनाम् ।
गतिप्रदाय गर्जिताखिलप्रपञ्चसाक्षिणे
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ७ ॥

मृकण्डुसूनुरक्षणावधूतदण्डपाणये
सुगण्डमण्डलस्फुरत् प्रभाजितामृतांशवे ।
अखण्डभोगसंपदर्थलोकभावितात्मने
सदा नमश्शिवाय ते सदाशिवाय शंभवे ॥ ८ ॥

मधुरिपुविधिशक्रमुख्यदेवै–
रपि नियमार्चितपादपङ्कजाय ।
कनकगिरिशरासनाय तुभ्यं
रजतसभापतये नमः शिवाय ॥ ९ ॥

***

१६. शिवाष्टकम्

(वरुणकृतम्)

कल्याणशैलपरिकल्पितकार्मुकाय
मौर्वीकृताखिलमहोरगनायकाय ।
पृथ्वीरथाय कमलापतिसायकाय
हालास्यमध्यनिलयाय नमः शिवाय ॥ १ ॥

भक्तार्तिभञ्जनपराय परात्पराय
कालाभ्रकान्तिगरलाङ्कितकन्धराय ।
भूतेश्वरायभुवनत्रयकारणाय
हालास्यमध्यनिलयाय नमः शिवाय ॥ २ ॥

भूदारमूर्तिपरिमृग्यपदांबुजाय
हंसाब्जसंभवसुदूरसुमस्तकाय ।
ज्योतिर्मयस्फुरितदिव्यवपुर्धराय
हालास्यमध्यनिलयाय नमः शिवाय ॥ ३ ॥

कादंबकानन निवास कुतूहलाय
कान्तार्धभाग कमनीयकलेबराय ।
कालान्तकाय करुणामृतसागराय
हालास्यमध्यनिलयाय नमः शिवाय ॥ ४ ॥

विश्वेश्वराय विबुधेश्वरपूजिताय
विद्याविशिष्ट विदितात्म सुवैभवाय ।
विद्याप्रदाय विमलेन्द्रविमानगाय
हालास्यमध्यनिलयाय नमः शिवाय ॥ ५ ॥

संपत्प्रदाय सकलागममस्तकेषु
संघोषितात्मविभवाय सदाशिवाय ।
सर्वात्मने सकलदुःखसमूलहन्त्रे
हालास्यमध्यनिलयाय नमः शिवाय ॥ ६ ॥

गङ्गाधराय गरुडध्वजवन्दिताय
गण्डस्फुरत्भुजगकुण्डलमण्डिताय ।
गन्धर्वकिन्नरसुगीत गुणात्मकाय
हालास्यमध्यनिलयाय नमः शिवाय ॥ ७ ॥

पाणिं प्रगृह्य मलयध्वज भूपपुत्र्याः
पाण्ड्येश्वरः स्वयमभूत् परमेश्वरो यः ।
तस्मै जगत् प्रथितसुन्दरपाण्ड्यनाम्ने
हालास्यमध्यनिलयाय नमः शिवाय ॥ ८ ॥

गीर्वाणदेशिकगिरामपि दूरगं यत्
वक्तुं महत्वमिह को भवतः प्रवीणः ।
शंभो क्षमस्व भगवच्चरणारविन्द–
भक्त्या कृतां स्तुतिमिमां मम सुन्दरेश ॥ ९ ॥

***

१७. <u>अर्द्धनारीश्वराष्टकम्</u>

(उपमन्युकृतं)

अंभोधरश्यामलकुन्तलायै
तटित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय
नमः शिवायै च नमः शिवाय ॥ १ ॥

प्रदीप्तरत्नोज्ज्वलकुण्डलायै
स्फुरन्महापन्नगभूषणाय ।
शिवप्रियायै च शिवाप्रियाय
नमः शिवायै च नमः शिवाय ॥ २ ॥

मन्दारमालाकलितालकायै
कपालमालाङ्कितकन्धराय ।
दिव्यांबरायै च दिगंबराय
नमः शिवायै च नमः शिवाय ॥ ३ ॥

कस्तूरिकाकुङ्कुमलेपनायै
श्मशानभस्मात्तविलेपनाय ।
कृतस्मरायै विकृतस्मराय
नमः शिवायै च नमः शिवाय ॥ ४ ॥

पादारविन्दार्पितहंसकायै
पादाब्जराजत्फणिनूपुराय ।
कलामयायै विकलामयाय
नमः शिवायै च नमः शिवाय ॥ ५ ॥

प्रपञ्चसृष्ट्युन्मुखलास्यकायै
समस्तसंहारकताण्डवाय ।
समेक्षणायै विषमेक्षणाय
नमः शिवायै च नमः शिवाय ॥ ६ ॥

प्रफुल्लनीलोत्पललोचनायै
विकासिपङ्केरुहलोचनाय ।
जगज्जनन्यै जगदेकपित्रे
नमः शिवायै च नमः शिवाय ॥ ७ ॥

अन्तर्बहिश्चोर्ध्वमधस्च मध्ये
पुरश्च पश्चाच्च विदिक्षु दिक्षु ।
सर्वंगतायै सकलंगताय
नमः शिवायै च नमः शिवाय ॥ ८ ॥

अर्द्धनारीश्वरस्तोत्रं उपमन्युकृतं त्विदम् ।
यः पठेच्छृणुयाद्वापि शिवलोके महीयते ॥ ९ ॥

***

१८. शिवभुजङ्गम्

(श्री शंकराचार्यकृतं)

गलद्वानगण्डं मिलद्भृङ्गषण्डं
चलच्चारुशुण्डं जगत्राणशौण्डम् ।
कनद्दन्तकाण्डं विपद्भङ्गचण्डं
शिवप्रेमपिण्डं भजे वक्रतुण्डम् ॥ १ ॥

अनाद्यन्तमाद्यं परं तत्वमर्थं
चिदाकारमेकं तुरीयं त्वमेयं ।
हरिब्रह्ममृग्यं परब्रह्मरूपं
मनोवागतीतं महःशैवमीडे ॥ २ ॥

स्वशक्त्यादिशक्त्यन्तसिंहासनस्थं
मनोहारिसर्वाङ्गरत्नोरुभूषं ।
जटाहीन्दुगंगास्थिशम्याकमौलिं
पराशक्तिमित्रं नुमः पञ्चवक्त्रम् ॥ ३ ॥

शिवेशानतत्पूरुषाघोरवामादिभिः
पञ्चभिर्हृन्मुखैः षड्भिरंगैः ।
अनौपम्यषड्त्रिंशतं तत्वविद्यामतीतं
परं त्वां कथं वेत्ति को वा ॥ ४ ॥

प्रवालप्रवाहप्रभाशोणमर्धं
मरुत्वन्मणिश्रीमहःश्याममर्धम् ।
गुणस्यूतमेतद्वपुः शैवमन्तः
स्मरामि स्मरापत्तिसंपत्तिहेतोः ॥ ५ ॥

स्वसेवासमायात–देवासुरेन्द्रा–
नमन्मौलि–मन्दारमालाभिषक्तं ।
नमस्यामि शंभो पदांभोरुहं ते
भवांभोधिपोतं भवानीविभाव्यम् ॥ ६ ॥

जगन्नाथ मन्नाथ गौरीसनाथ
प्रपन्नानुकम्पिन्विपन्नार्तिहारिन् ।
महःस्तोममूर्ते समस्तैकबन्धो
नमस्ते नमस्ते पुनस्ते नमोस्तु ॥ ७ ॥

विरूपाक्ष विश्वेश विश्वादिदेव
त्रयीमूल शंभो शिव त्रयंबक त्वं ।
प्रसीद स्मर त्राहि पश्यावमुक्त्यै
क्षमां प्राप्नुहि त्र्यक्ष मां रक्ष मोदात् ॥ ८ ॥

महादेव देवेश देवादिदेव
स्मरारे पुरारे यमारे हरेति ।
ब्रुवाणः स्मरिष्यामि भक्त्या भवन्तं
ततो मे दयाशील देव प्रसीद ॥ ९ ॥

त्वदन्यः शरण्यः प्रपन्नस्य नेति
प्रसीद स्मरन्नेव हन्यास्तु दैन्यं ।
न चेत्ते भवद्भक्तवात्सल्यहानि–
स्ततो मे दयालो सदा सन्निधेहि ॥ १० ॥

अयं दानकालस्त्वहं दानपात्रं
भवानेव दाता त्वदन्यं न याचे ।
भवद्भक्तिमेव स्थिरां देहि मह्यं
कृपाशील शंभो कृतार्थोऽस्मि तस्मात् ॥ ११ ॥

पशुं वेत्सि चेन्मां तमेवाधिरूढः
कलंकीति वा मूर्ध्नि धत्से तमेव ।
द्विजिह्वः पुनः सोऽपि ते कण्ठभूषा
त्वदङ्गीकृताः शर्व सर्वेऽपि धन्याः ॥ १२ ॥

न शक्नोमि कर्तुं परद्रोहलेशं
कथं प्रीयसे त्वं न जाने गिरीश ।
तथा हि प्रसन्नोऽसि कस्यापि कान्ता–
सुतद्रोहिणो वा पितृद्रोहिणो वा ॥ १३ ॥

स्तुतिं ध्यानमर्चां यथावद्विधातुं
भजन्नप्यजानन्महेशावलंबे ।
त्रसन्तं सुतं त्रातुमग्रे मृकण्डो–
र्यमप्राणनिर्वापणं त्वत्पदाब्जम् ॥ १४ ॥

शिरोदृष्टिहृद्रोगशूलप्रमेह–
ज्वरार्शोजरायक्ष्महिक्काविषार्तान् ।
त्वमाद्यो भिषग्भेषजं भस्म शंभो
त्वमुल्लाघयास्मान्वपुर्लाघवाय ॥ १५ ॥

दरिद्रोऽस्म्यभद्रोऽस्मि भग्नोऽस्मि दूये
विषण्णोऽस्मि सन्नोऽस्मि खिन्नोऽस्मि चाहं ।
भवान्प्राणिनामन्तरात्माऽसि शंभो
ममाधिं न वेत्सि प्रभो रक्ष मां त्वं ॥ १६ ॥

त्वदक्ष्णोः कटाक्षः पतेत् त्र्यक्ष यत्र
क्षणं क्ष्मा च लक्ष्मीः स्वयं तं वृणाते ।
किरीटस्फुरच्चामरच्छत्रमाला
कलापीगजक्षौमभूषाविशेषैः ॥ १७ ॥

भवान्यै भवायापि मात्रे च पित्रे
मृडान्यै मृडायाप्यघघ्न्यै मखघ्ने ।
शिवाङ्ग्यै शिवाङ्गाय कुर्मः शिवायै
शिवायांबिकायै नमस्त्र्यंबकाय ॥ १८ ॥

भवद्गौरवं मल्लघुत्वं विदित्वा
प्रभो रक्ष कारुण्यदृष्ट्यानुगं माम् ।
शिवात्मानुभावस्तुतावक्षमोऽहं
स्वशक्त्या कृतं मेऽपराधं क्षमस्व ॥ १९ ॥

यदा कर्णरन्ध्रं व्रजेत्कालवाह–
द्विषत्कण्ठघण्टाघणत्कारनादः ।
वृषाधीशमारुह्य देवौपवाह्यं
तदा वत्स मा भीरिति प्रीणय त्वं ॥ २० ॥

यदा दारुणाभाषणा भीषणा मे
भविष्यन्त्युपान्ते कृतान्तस्य दूताः ।
तदा मन्मनस्त्वत्पदांभोरुहस्थं
कथं निश्चलं स्यान्नमस्तेऽस्तु शंभो ॥ २१ ॥

यदा दुर्निवारव्यथोऽहं शयानो
लुठन्निःश्वसन्निःसृताव्यक्तवाणिः ।
तदा जह्नुकन्याजलालंकृतं ते
जटामण्डलं मन्मनोमन्दिरं स्यात् ॥ २२ ॥

यदा पुत्रमित्रादयो मत्सकाशे
रुदन्त्यस्य हा कीदृशीयं दशेति ।
तदा देवदेवेश गौरीश शंभो
नमस्ते शिवायेत्यजस्रं ब्रवाणि ॥ २३ ॥

यदा पश्यतां मामसौ वेत्ति नास्मा–
नयं श्वास एवेति वाचो भवेयुः ।
तदा भूतिभूषं भुजङ्गावनद्धं
पुरारे भवन्तं स्फुटं भावयेयम् ॥ २४ ॥

यदा यातनादेहसंदेहवाही
भवेदात्मदेहे न मोहो महान् मे ।
तदाऽऽकाशशीतांशुसंकाशमीश
स्मरारे वपुस्ते नमस्ते स्मराणि ॥ २५ ॥

यदापारमच्छायमस्थानमद्रि–
र्जनैर्वा विहीनं गमिष्यामि मार्गं ।
तदा तं निरुन्धन् कृतान्तस्य मार्गं
महादेव मह्यं मनोज्ञं प्रयच्छ ॥ २६ ॥

यदा रौरवादि स्मरन्नेव भीत्या
व्रजाम्यत्र मोहं महादेव घोरं ।
तदा मामहो नाथ कस्तारयिष्य–
त्यनाथं पराधीनमर्धेन्दुमौले ॥ २७ ॥

यदा श्वेतपत्रायतालङ्घ्यशक्तेः
कृतान्ताद्भयं भक्तवात्सल्यभावात् ।
तदा पाहि मां पार्वतीवल्लभान्यं
न पश्यामि पातारमेतादृशं मे ॥ २८ ॥

इदानीमिदानीं मृतिर्मे भवित्री–
त्यहो संततं चिन्तया पीडितोऽस्मि ।
कथं नाम माभून्मृतौ भीतिरेषा
नमस्ते गतीनां गते नीलकण्ठ ॥ २९ ॥

अमर्यादमेवाहमाबालवृद्धं
हरन्तं कृतान्तं समीक्ष्यास्मि भीतः ।
मृतौ तावकाङ्घ्र्यब्ज–दिव्यप्रसादाद्–
भवानीपते निर्भयोऽहं भवानि ॥ ३० ॥

जराजन्मगर्भाधिवासादि दुःखा–
न्यसह्यानि जह्यां जगन्नाथ देव ।
भवन्तं विना मे गतिर्नैव शंभो
दयालो न जागर्ति किं वा दया ते ॥ ३१ ॥

शिवायेति शब्दो नमः पूर्व एष
स्मरन्मुक्तिकृन्मृत्युहा तत्ववाची ।
महेशान मा गान्मनस्तो वचस्तः
सदा मह्यमेतत् प्रदानं प्रयच्छ ॥ ३२ ॥

त्वमप्यंब मां पश्य शीतांशुमौलि–
प्रिये भेषजं त्वं भवव्याधिशान्तौ ।
बहुक्लेशभाजं पदांभोजपोते
भवाब्धौ निमग्नं नयस्वाद्य पारं ॥ ३३ ॥

अनुद्यल्ललाटाक्षि–वह्निप्ररोहै–
रवामस्फुरच्चारु–वामोरुशोभैः ।
अनंगभ्रमद्भोगिभूषाविशेषै–
रचन्द्रार्धचूडैरलं दैवतैर्नः ॥ ३४ ॥

अकण्ठेकलङ्कादनङ्गे भुजङ्गा–
दपाणौ कपालादफालेनलाक्षात् ।
अमौलौशशाङ्कादवामेकलत्रा–
दहं देवमन्यं न मन्ये न मन्ये ॥ ३५ ॥

महादेव शंभो गिरीश त्रिशूलिं–
स्त्वयीदं समस्तं विभातीति यस्मात् ।
शिवादन्यथा दैवतं नाभिजाने
शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहम् ॥ ३६ ॥

यतोऽजायतेदं प्रपञ्चं विचित्रं
स्थितिं याति यस्मिन् यदेकान्तमन्ते ।
स कर्मादिहीनः स्वयंज्योतिरात्मा
शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहम् ॥ ३७ ॥

किरीटेनिशेशो ललाटे हुताशो
भुजे भोगिराजो गले कालिमा च ।
तनौ कामिनी यस्य तत्तुल्यदेवं
न जाने न जाने न जाने न जाने ॥ ३८ ॥

अनेन स्तवेनादरादंबिकेशं
परां भक्तिमासाद्य यं ये नमन्ति ।
मृतौ निर्भयास्ते जनास्तं भजन्ते
हृदंभोजमध्ये सदासीनमीशम् ॥ ३९ ॥

भुजङ्गप्रियाकल्प शंभो मयैवं
भुजङ्गप्रयातेन वृत्तेन क्लिप्तं ।
नरः स्तोत्रमेतत् पठित्वोरुभक्त्या
सुपुत्रायुरारोग्यमैश्वर्यमेति ॥ ४० ॥

१९. शिवताण्डवस्तोत्रम्

(रावणकृतं)

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम् ।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥ १ ॥

जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी–
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥ २ ॥

धराधरेन्द्रनन्दिनी विलासबन्धुबन्धुर–
स्फुरद्दिगन्तसन्तति प्रमोदमानमानसे ।
कृपाकटाक्षधोरणी निरुद्ध दुर्धरापदि
क्वचिद्दिगंबरे मनो विनोदमेतु वस्तुनि ॥ ३ ॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा–
कदंबकुङ्कुमद्रव प्रलिप्त दिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीय मेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥ ४ ॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर–
प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥ ५ ॥

ललाटचत्वरज्वलद्धनन्जयस्फुलिङ्गभा–
निपीतपञ्चसायकम् नमन्निलिंपनायकम् ।
सुधामयूखलेखया विराजमानशेखरम्
महाकपालिसंपदे शिरो जटालमस्तु नः ॥ ६ ॥

करालभालपट्टिका धगद्धगद्धगज्ज्वल–
द्धनन्जयाहुतीकृत प्रचण्ड पञ्चसायके ।
धराधरेन्द्रनन्दिनी कुचाग्रचित्रपत्रक–
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥ ७ ॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुर–
त्कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः ।
निलिंपनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥ ८ ॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा–
वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥ ९ ॥

अखर्व सर्वमङ्गला कलाकदंबमन्जरी–
रसप्रवाहमाधुरी विजृंभणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥ १० ॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस–
द्विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट् ।
धिमिद्धिमिद्धिमिद्ध्वनन्मृदङ्गतुङ्गमङ्गल–
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥ ११ ॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो–
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥ १२ ॥

कदानिलिंपनिर्झरी निकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरःस्थमंजलिं वहन् ।
विलोललोललोचनो ललामभाललग्नकः
शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥ १३ ॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथागतिम्
विमोहनं हि देहिनां सुशंकरस्य चिन्तनम् ॥ १४ ॥

पूजावसानसमये दशवक्त्रगीतम्
यः शंभुपूजनपरं पठति प्रदोषे ।
तस्यस्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखीं प्रददाति शंभुः ॥ १५ ॥

***

२०. लिङ्गाष्टकम्

ब्रह्ममुरारिसुरार्चितलिङ्गं
निर्मलभासितशोभितलिङ्गम् ।
जन्मजदुःखविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ १ ॥

देवमुनिप्रवरार्चितलिङ्गं
कामदहंकरुणाकरलिङ्गम् ।
रावणदर्पविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ २ ॥

सर्वसुगन्धिसुलेपितलिङ्गं
बुद्धिविवर्द्धनकारणलिङ्गम् ।
सिद्धसुरासुरवन्दितलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ३ ॥

कनकमहामणिभूषितलिङ्गं
फणिपतिवेष्टितशोभितलिङ्गम् ।
दक्षसुयज्ञविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ४ ॥

कुङ्कुमचन्दनलेपितलिङ्गं
पङ्कजहारसुशोभितलिङ्गम् ।
सञ्चितपापविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ५ ॥

देवगणार्चितसेवितलिङ्गं
भवैर्भक्तिभिरेव च लिङ्गम् ।
दिनकरकोटिप्रभाकर लिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ६ ॥

अष्टदलोपरिवेष्टितलिङ्गं
सर्वसमुद्भवकारणलिङ्गम् ।
अष्टदरिद्रविनाशकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ७ ॥

सुरगुरुसुरवरपूजितलिङ्गं
सुरवनपुष्पसदार्चितलिङ्गम् ।
परात्परं परमात्मकलिङ्गं
तत्प्रणमामि सदाशिवलिङ्गम् ॥ ८ ॥

लिङ्गाष्टकमिदंपुण्यम्
यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति
शिवेन सह मोदते ॥ ९ ॥

***

२१. बिल्वाष्टकम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुषं ।
त्रिजन्म पापसंहारं एकबिल्वं शिवार्पणम् ॥ १ ॥

त्रिशाखैः बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः ।
शिवपूजां करिष्यामि ह्येकबिल्वं शिवार्पणम् ॥ २ ॥

अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे ।
शुद्ध्यन्ति सर्वपापेभ्यो ह्येकबिल्वं शिवार्पणम् ॥ ३ ॥

सालग्रामशिलामेकां विप्राणां जातु चार्पयेत् ।
सोमयज्ञमहापुण्यं एकबिल्वं शिवार्पणम् ॥ ४ ॥

दन्तिकोटिसहस्राणि वाजपेयशतानि च ।
कोटिकन्यामहादानं ह्येकबिल्वं शिवार्पणम् ॥ ५ ॥

लक्ष्म्यास्तनुत उत्पन्नं महादेवस्य च प्रियं ।
बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं शिवार्पणम् ॥ ६ ॥

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनं ।
अघोरपापसंहारं एकबिल्वं शिवार्पणम् ॥ ७ ॥

काशीक्षेत्रनिवासं च कालभैरवदर्शनं ।
प्रयागेमाधवं दृष्ट्वा ह्येकबिल्वं शिवार्पणम् ॥ ८ ॥

तुलसीबिल्वनिर्गुण्डीजंबीरामलकानि च ।

पञ्चबिल्वमिति प्रोक्तं एकबिल्वं शिवार्पणम् ॥ ९ ॥

***

२२. कालभैरवाष्टकम्

(श्री शंकराचार्यकृतं)

देवराजसेव्यमानपावनाङ्घ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगंबरं
काशिकापुराधिनाथ कालभैरवं भजे ॥ १ ॥

भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमंबुजाक्षमक्षशूलमक्षरं
काशिकापुराधिनाथ कालभैरवं भजे ॥ २ ॥

शूलटङ्कपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्र ताण्डवप्रियं
काशिकापुराधिनाथ कालभैरवं भजे ॥ ३ ॥

भुक्तिमुक्तिदायकं प्रशस्त चारु विग्रहं
भक्तवत्सलं स्थितं समस्तलोकविग्रहम् ।
निक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं
काशिकापुराधिनाथ कालभैरवं भजे ॥ ४ ॥

धर्मसेतुपालकं त्वधर्ममार्गनाशकं
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णशेषपाश शोभिताङ्गमण्डलं
काशिकापुराधिनाथ कालभैरवं भजे ॥ ५ ॥

रत्नपादुकाप्रभाभिरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरंजनम् ।
मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं
काशिकापुराधिनाथ कालभैरवं भजे ॥ ६ ॥

अट्टहासभिन्नपद्मजाण्डकोशसन्ततिं
दृष्टिपातनष्टपापजालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकन्धरं
काशिकापुराधिनाथ कालभैरवं भजे ॥ ७ ॥

भूतसङ्घनायकं विशालकीर्तिदायकं
काशिवासलोकपुण्यपापशोधकं विभुम् ।
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथ कालभैरवं भजे ॥ ८ ॥

कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् ।
शोकमोहदैन्यलोभकोपतापनाशनं
ते प्रयान्ति कालभैरवाङ्घ्रिसन्निधिं ध्रुवम् ॥ ९ ॥

***

२३. चरणशृङ्गरहितनटराजस्तोत्रम्

(श्री पतंजलिकृतम्)

सदञ्चितमुदञ्चित निकुञ्चितपदं झलझलच्चलितमञ्जुकटकं
पतंजलिदृगञ्जनमनञ्जनमचञ्चलपदं जननभञ्जनकरम् ।
कदम्बरुचिमम्बरवसं परममम्बुदकदम्बकविडम्बकगलं
चिदम्बुधिमणिं बुधहृदंबुजरविं परचिदंबरनटं हृदि भज ॥ १ ॥

हरं त्रिपुरभञ्जनमनन्तकृतकङ्कणमखण्डदयमन्तरहितं
विरिञ्चि सुरसंहति पुरन्दर विचिन्तितपदं तरुणचन्द्रमकुटम् ।
परंपदविखण्डितयमं भसितमण्डिततनुं मदनवञ्चनपरं
चिरन्तनममुं प्रणवसञ्चितनिधिं परचिदंबरनटं हृदि भज ॥ २ ॥

अवन्तमखिलं जगदभंगगुणतुङ्गममतं धृतविधुं सुरसरित्
तरङ्गनिकुरम्बधृतिलंपटजटं शमनडंभसुहरं भवहरं ।
शिवं दशदिगन्तरविजृम्भितकरं करलसन्मृगशिशुं पशुपतिं
हरं शशिधनञ्जयपतङ्गनयनं परचिदंबरनटं हृदि भज ॥ ३ ॥

अनन्तनवरत्नविलसत् कटककिङ्किणि झलं झलझलं झलरवं
मुकुन्दविधिहस्तगतमद्दललयध्वनि धिमिद्धिमित नर्तनपदं ।
शकुन्तरथ बर्हिरथ नन्दिमुख भृङ्गिरिटि सङ्गनिकटं
सनन्दसनकप्रमुखवन्दितपदं परचिदंबरनटं हृदि भज ॥ ४ ॥

अनन्तमहसं त्रिदशवन्द्यचरणं मुनिहृदन्तरवसन्तममलं
कबन्धवियदिन्द्ववनिगन्धवहवह्निमखबन्धु रविमञ्जुवपुषम् ।
अनन्तविभवं त्रिजगदन्तरमणिं त्रिणयनं त्रिपुरखण्डनपरं
सनन्दमुनिवन्दितपदं सकरुणं परचिदंबरनटं हृदि भज ॥ ५ ॥

अचिन्त्यमणिबृन्दरुचिबन्धुरगलं कुरितकुन्दनिकुरुंबधवलम्
मुकुन्दसुरबृन्दबलहन्तृकृत वन्दनलसन्तमहिकुण्डलधरम् ।
अकंपमनुकंपितरतिं सुजनमङ्गलनिधिं गजहरं पशुपतिम्
धनञ्जयनुतं प्रणतरञ्जनपरं परचिदंबरनटं हृदि भज ॥ ६ ॥

परं सुखवरं पुरहरं पशुपतिं जनितदन्तिमुखषण्मुखममुं
मृडं कनकपिङ्गलजटं सनकपङ्कजरविं सुमनसं हिमरुचिम् ।
असंगमनसं जलधिजन्मगरलंकबलयन्तमतुलं गुणनिधिं
सनन्दवरदं शमितमिन्दुवदनं परचिदंबरनटं हृदि भज ॥ ८ ॥

अजं क्षितिरथं भुजङ्गपुङ्गवगुणं कनकशृङ्गि धनुषं
करलसत्कुरङ्गपृथुटङ्कपरशुम् रुचिरकुङ्कुमरुचिं डमरुकं च दधतम् ।
मुकुन्दविशिखं नमदवन्ध्यफलदं निगमवृन्दतुरगं निरुपम्
सचण्डिकममुं झटिति संहृतपुरं परचिदंबरनटं हृदि भज ॥ ९ ॥

अनङ्गपरिपन्थिनमजं क्षितिधुरंधरमलं करुणयन्तमखिलं
ज्वलन्तमनलं दधतमन्तकरिपुं सततमिन्द्रसुरवन्दितपदम् ।
उदञ्चदरविन्दकुलबन्धुशतबिंबरुचिसंहति सुगन्धि वपुषं
पतञ्जलिनुतं प्रणवपञ्जरशुकं परचिदंबरनटं हृदि भज ॥ १० ॥

इति स्तवममुं भुजगपुङ्गवकृतं प्रतिदिनं पठति यः कृतमुखः
सदः प्रभु पदद्वितय दर्शनपदं सुललितं चरणशृङ्गरहितम् ।
सरः प्रभवसंभव हरित्पति हरिप्रमुख दिव्यनुत शंकरपदं
स गच्छति परं न तु जनुर्जलनिधिं परमदुःखजनकं दुरितदम् ॥ ११ ॥

***

२४. श्री मार्गबन्धुस्तोत्रम्

(श्री अप्पय्यदीक्षितकृतम्)

शंभो महादेवदेव शिवशंभो महादेवदेवेश शंभो शंभो महादेवदेव

फालावनम्रत्किरीटं फालनेत्रार्चिषादग्धपञ्चेषुकीटम् ।
शूलाहतारातिकूटं शुद्धमर्धेन्दुचूडं भजे मार्गबन्धुम् ॥ १ ॥
शंभो महादेवदेव शिवशंभो महादेवदेवेश शंभो शंभो महादेवदेव

अङ्गेविराजत्भुजङ्गं अभ्रगङ्गातरङ्गाभिरामोत्तमाङ्गम् ।
ओङ्कारवाटीकुरङ्गं सिद्धसंसेविताङ्घ्रिं भजे मार्गबन्धुम् ॥ २ ॥
शंभो महादेवदेव शिवशंभो महादेवदेवेश शंभो शंभो महादेवदेव

नित्यंचिदानन्दरूपं निहनुताशेषलोकेशवैरिप्रतापम् ।
कार्तस्वरागेन्द्रचापं कृत्तिवासं भजे दिव्यसन्मार्गबन्धुम् ॥ ३ ॥
शंभो महादेवदेव शिवशंभो महादेवदेवेश शंभो शंभो महादेवदेव

कन्दर्पदर्पघ्नमीशं कालकण्ठं महेशं महाव्योमकेशम् ।
कुन्दाभदन्तं सुरेशं कोटिसूर्यप्रकाशं भजे मार्गबन्धुम् ॥ ४ ॥
शंभो महादेवदेव शिवशंभो महादेवदेवेश शंभो शंभो महादेवदेव

मन्दारभूतेरुदारं मन्दरागेन्द्रसारं महागौर्यदूरम् ।
सिन्धूरदूरप्रचारं सिन्धुराजातिधीरं भजे मार्गबन्धुम् ॥ ५ ॥
शंभो महादेवदेव शिवशंभो महादेवदेवेश शंभो शंभो महादेवदेव

अप्पय्य यज्वेन्द्रगीतं स्तोत्रराजं पठेद्यस्तु भक्त्या प्रयाणे ।
तस्यार्थ सिद्धिं विधत्ते मार्गमध्येऽभयं चाशुतोषो महेशः ॥ ६ ॥
शंभो महादेवदेव शिवशंभो महादेवदेवेश शंभो शंभो महादेवदेव

***

२५. उमामहेश्वरस्तोत्रम्

(श्री शंकराचार्यकृतम्)

नमः शिवाभ्यां नवयौवनाभ्यां
परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ १ ॥

नमः शिवाभ्यां सरसोत्सवाभ्यां
नमस्कृताभीष्टवरप्रदाभ्याम् ।
नारायणेनार्चितपादुकाभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ २ ॥

नमः शिवाभ्यां वृषवाहनाभ्यां
विरिञ्चिविष्णिवन्द्रसुपूजिताभ्याम् ।
विभूतिपाटीरविलेपनाभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ३ ॥

नमः शिवाभ्यां जगदीश्वराभ्यां
जगत्पतिभ्यां जयविग्रहाभ्याम् ।
जंभारिमुख्यैरभिवन्दिताभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ४ ॥

नमः शिवाभ्यां परमौषधाभ्यां
पन्ञ्चाक्षरीपञ्जररञ्जिताभ्याम् ।
प्रपञ्चसृष्टिस्थितिसंहृताभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ५ ॥

नमः शिवाभ्यामतिसुन्दराभ्यां
अत्यन्तमासक्तहृदंबुजाभ्याम् ।
अशेषलोकैकहितंकराभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ६ ॥

नमः शिवाभ्यां कलिनाशनाभ्यां
कङ्कालकल्याणवपुर्धराभ्याम् ।
कैलासशैलस्थित देवताभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ७ ॥

नमः शिवाभ्यामशुभापहाभ्यां
अशेषलोकैकविशेषिताभ्याम् ।
अकुण्ठिताभ्यां स्मृतिसंभृताभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ८ ॥

नमः शिवाभ्यां रथवाहनाभ्यां
रवीन्दु वैश्वानरलोचनाभ्याम् ।
राकाशशाङ्काभमुखांबुजाभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ९ ॥

नमः शिवाभ्यां जटिलं धराभ्यां
जरामृतिभ्यां च विवर्जिताभ्याम् ।
जनार्दनाब्जोद्भवपूजिताभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ १० ॥

नमः शिवाभ्यां विषमेक्षणाभ्यां
बिल्वच्छदामल्लिकदामभृद्भ्याम् ।
शोभावतीशान्तवतीश्वराभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ ११ ॥

नमः शिवाभ्यां पशुपालकाभ्यां
जगत्त्रयीरक्षणबद्धहृद्भ्याम् ।
समस्तदेवासुरपूजिताभ्यां
नमोनमः शंकरपार्वतीभ्याम् ॥ १२ ॥

स्तोत्रं त्रिसंध्यं शिवपार्वतीभ्यां
भक्त्या पठेत् द्वादशकं नरो यः ।
स सर्व सौभाग्यफलानि भुङ्क्ते
शतायुरन्ते शिवलोकमेति ॥ १३ ॥

***

२६. वेदसारशिवस्तोत्रम्

(श्री शंकराचार्यकृतम्)

पशूनांपतिं पापनाशं परेशं
गजेन्द्रस्यकृत्तिं वसानं वरेण्यम् ।
जटाजूटमध्ये स्फुरद्गाङ्गवारिं
महादेवमेकं स्मरामि स्मरामि ॥ १ ॥

महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेतं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥ २ ॥

गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम् ।
भवं भास्वरं भस्मना भूषितांगं
भवानीकलत्रं भजे पञ्चवक्त्रम् ॥ ३ ॥

शिवाकान्त शंभो शशाङ्कार्धमौले
महेशान शूलिन् जटाजूटधारिन् ।
त्वमेको जगद्व्यापको विश्वरूपः
प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४ ॥

परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोङ्कारवेद्यम् ।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥

न भूमिर्न चापो न वह्निर्न वायुः
न चाकाशमास्ते न तन्द्रा न निद्रा ।
न चोष्णं न शीतं न देशो न वेषो
न यस्यास्तिमूर्तिः त्रिमूर्तिं तमीडे ॥ ६ ॥

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥

नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते ।
नमस्ते नमस्ते तपोयोगगम्य
नमस्तेनमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥

प्रभो शूलपाणे विभो विश्वनाथ
महादेव शंभो महेश त्रिनेत्र ।
शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥

शम्भो महेश करुणामय शूलपाणे
गौरीपते पशुपते पशुपाशनाशिन् ।
काशीपते करुणया जगदेतदेक–
स्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥ १० ॥

त्वत्तो जगत् भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ ।
त्वय्येव गच्छति लयं जगदेतदीश
लिङ्गात्मके हर चराचरविश्वरूपिन् ॥ ११ ॥

***

२७. सुवर्णमालास्तुतिः
(श्री शंकराचार्यकृतम्)

अथ कथमपि मद्रसनां त्वद्गुणलेशैर्विशोधयामि विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १ ॥

आखण्डलमदखण्डनपण्डित तण्डुप्रिय चण्डीश विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २ ॥

इभचर्माम्बर शम्बररिपुवपुरपहरणोज्ज्वलनयन विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३ ॥

ईश गिरीश नरेश परेश महेश बिलेशयभूषण विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४ ॥

उमया दिव्यसुमंगलविग्रहयालिंगितवामांग विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ५ ॥

ऊरीकुरुमामज्ञमनाथं दूरीकुरु मे दुरितं भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ६ ॥

ऋषिवरमानसहंस चराचरजननस्थितिलयकारण ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ७ ॥

ऋक्षाधीशकिरीट महोक्षारूढ विधृतरुद्राक्ष विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ८ ॥

ऌवर्णद्वन्द्वमवृन्तसुकुसुममिवाङ्घ्रौ तवार्पयामि विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ९ ॥

एकं सदिति श्रुत्या त्वमेव सदासीत्युपास्महे मृड भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १० ॥

ऐक्यं स्वभक्तेभ्यो वितरसि विश्वंभरोऽत्र साक्षी भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ११ ॥

ओमिति तव निर्देष्ट्री मायास्माकं मृडोपकर्त्री भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १२ ॥

औदास्यं स्फुटयति विषयेषु दिगम्बरता च तवैव विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १३ ॥

अन्तःकरणविशुद्धिं भक्तिं च त्वयि सतीं प्रदेहि विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् !! १४ ॥

अस्तोपाधिसमस्तव्यस्तैरूपैर्जगन्मयोऽसि विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १५ ॥

करुणावरुणालय मयि दास उदासस्तवोचितो न हि भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १६ ॥

खलसहवासं विघटय घटय सतामेव संगमनिशम् ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १७ ॥

गरलं जगदुपकृतये गिलितं भवता समोऽस्ति कोऽत्र विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १८ ॥

घनसारगौरगात्र प्रचुरजटाजूटबद्धगंग विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ १९ ॥

ज्ञप्तिः सर्वशरीरेष्वखण्डिता या विभाति सा त्वं भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २० ॥

चपलं मम हृदयकपिं विषयद्रुचरं दृढं बधान विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २१ ॥

छाया स्थाणोरपि तव तापं नमतां हरत्यहो शिव भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २२ ॥

जय कैलासनिवास प्रमथगणाधीश भूसुरार्चित भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २३ ॥

झणुतकझङ्किणुझणुतत्किटतकशब्दैर्नटसि महानट भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २४ ॥

ज्ञानं विक्षेपावृतिरहितं कुरु मे गुरुस्त्वमेव विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २५ ॥

टङ्कारस्तव धनुषो दलयति हृदयं द्विषामशनिरिव भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २६ ॥

ठाकृतिरिव तव माया बहिरन्तः शून्यरूपिणी खलु भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २७ ॥

डम्बरमंबुरुहामपि दलयत्यनघं त्वदङ्घ्रियुगलं भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २८ ॥

ढक्काक्षसूत्रशूलदृहिणकरोटीसमुल्लसत्कर भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ २९ ॥

णाकारगर्भिणी चेच्छुभदा ते शरगतिर्नृणामिह भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३० ॥

तव मन्वतिसंजपतः सद्यस्तरति नरो हि भवाब्धिं भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३१ ॥

थूत्कारस्तस्य मुखे भूयात्ते नाम नास्ति यस्य विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३२ ॥

दयनीयश्च दयालुः कोऽस्ति मदन्यस्त्वदन्य इह वद भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३३ ॥

धर्मस्थापनदक्ष त्र्यक्ष गुरो दक्षयज्ञशिक्षक भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३४ ॥

ननु ताडितोऽसि धनुषा लुब्धधिया त्वं पुरा नरेण विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३५ ॥

परिमातुं तव मूर्तिं नालमजस्तत्परात्परोऽसि विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३६ ॥

फलमिह नृतया जनुषस्त्वत्पदसेवा सनातनेश विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३७ ॥

बलमारोग्यं चायुस्त्वद्गुणरुचितां चिरं प्रदेहि विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३८ ॥

भगवन्भर्ग भयापह भूतपते भूतिभूषिताङ्ग विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ३९ ॥

महिमा तव नहि माति श्रुतिषु हि महीधरात्मजाधव भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४० ॥

यमनियमादिभिरङ्गैर्यमिनो यं हृदये भजन्ति स त्वं भो
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४१ ॥

रज्जावहिरिव शुक्तौ रजतमिव त्वयि जगति भान्ति विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४२ ॥

लब्ध्वा भवत्प्रसादाच्चक्रं विष्णुरवति लोकमखिलं भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४३ ॥

वसुधातद्धरतच्छयरथमौर्वीशर पराकृतासुर भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४४ ॥

शर्वदेव सर्वोत्तम सर्वद दुर्वृत्तगर्वहरण विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४५ ॥

षड्रिपु षडूर्मि षड्विकारहर सन्मुख षण्मुखजनक विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४६ ॥

सत्यं ज्ञानमनन्तं ब्रह्मेत्येतल्लक्षणलक्षित भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४७ ॥

हाहाहूहूमुखसुरगायकगीतापदानपद्य विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४८ ॥

ळादिर्न हि प्रयोगस्तदन्तमिह मंगलं सदास्तु विभो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ४९ ॥

क्षणमिव दिवसान्नेष्यति त्वत्पदसेवाक्षणोत्सुकः शिव भो ।
साम्ब सदाशिव शंभो शंकर शरणं मे तव चरणयुगम् ॥ ५० ॥

***

२८. दशश्लोकीस्तुतिः

(श्री शंकराचार्यकृतम्)

साम्बो नः कुलदैवतं पशुपते साम्ब त्वदीया वयं
साम्बं स्तौमि सुरासुरोरगगणाः साम्बेन संतारिताः ।
साम्बायास्तु नमो मया विरचितं साम्बात्परं नो भजे
साम्बस्यानुचरोऽस्म्यहं मम रतिः साम्बे परब्रह्मणि ॥ १ ॥

विष्ण्वाद्याश्च पुरत्रयं सुरगणाः जेतुं न शक्ताः स्वयं
यं शंभुं भगवन्वयं तु पशवोऽस्माकं त्वमेवेश्वरः ।
स्वस्वस्थाननियोजितास्सुमनसः स्वस्था बभूवुस्ततः
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ २ ॥

क्षोणी यस्य रथो रथाङ्गयुगलं चन्द्रार्कबिम्बद्वयं
कोदण्डः कनकाचलो हरिरभूद्बाणो विधिः सारथिः ।
तूणीरो जलधिर्हयाः श्रुतिचयो मौर्वी भुजङ्गाधिपः
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ३ ॥

येनापादितमङ्गजाङ्गभसितं दिव्याङ्गरागैः समं
येन स्वीकृतमब्जसंभवशिरः सौवर्णपात्रैः समम् ।
येनाङ्गीकृतमच्युतस्य नयनं पूजारविन्दैः समं
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ४ ॥

गोविन्दादधिकं न दैवतमिति प्रोच्चार्य हस्तावुभा–
वुद्धृत्याथ शिवस्य सन्निधिगतो व्यासो मुनीनां वरः ।
यस्य स्थंभितपाणिरानतिकृता नन्दीश्वरेणाभवत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ५ ॥

आकाशश्चिकुरायते दशदिशाभोगा दुकूलायते
शीतांशुः प्रसवायते स्थिरतरानन्द स्वरूपायते ।
वेदान्तो निलयायते सुविनयो यस्य स्वभावायते
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ६ ॥

विष्णुर्यस्य सहस्रनामनियमादम्भोरुहाण्यर्चय–
न्नेकोनोपचितेषु नेत्रकमलं नैजं पदाब्जद्वये ।
संपूज्यासुरसंहतिं विदलयंस्त्रैलोक्य पालोऽभवत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ७ ॥

शौरिं सत्यगिरं वराहवपुषं पादाम्बुजादर्शने
चक्रे यो दयया समस्तजगतां नाथं शिरोदर्शने ।
मिथ्यावाचमपूज्यमेव सततं हंसस्वरूपं विधिं
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ८ ॥

यस्यासन्धरणीजलाग्निपवनव्योमार्कचन्द्रादयो
विख्यातास्तनवोऽष्टधा परिणता नान्यत्ततो वर्तते ।
ॐकारार्थविवेचनी श्रुतिरियं चाचष्ट तुर्यं शिवं
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ ९ ॥

विष्णुब्रह्मसुराधिपप्रभृतयः सर्वेऽपि देवा यदा
संभूताज्जलधेर्विषात्परिभवं प्राप्तास्तदा सत्वरम् ।
तानार्तान् शरणागतानिति सुरान्योऽरक्षदर्धक्षणात्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ १० ॥

***

२९. श्री दक्षिणामूर्त्यष्टकम्

(श्री शंकराचार्यकृतम्)

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनर्–
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २ ॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्नपुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभासुरं
ज्ञानं यस्यतु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७ ॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो माया परिभ्रामितः
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८ ॥

भूरंभांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमा–
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किञ्चन विद्यते विमृशतां यस्मात् परस्माद्विभोः
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९ ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥

***

३०. द्वादशज्योतिर्लिंगस्तोत्रम्

(श्री शंकराचार्यकृतम्)

सौराष्ट्रदेशे विशदेऽतिरम्ये
ज्योतिर्मयं चन्द्रकलावतंसम् ।
भक्तिप्रदानाय कृपावतीर्णं
तं सोमनाथं शरणं प्रपद्ये ॥ १ ॥

श्रीशैलशृङ्गे विबुधादिसङ्गे
तुलाद्रितुङ्गेऽपि मुदा वसन्तम् ।
तमर्जुनं मल्लिकपूर्वमेकं
नमामि संसारसमुद्रसेतुम् ॥ २ ॥

अवन्तिकायां विहितावतारं
मुक्तिप्रदानाय च सज्जनानाम् ।
अकालमृत्योः परिरक्षणार्थं
वन्दे महाकालमहासुरेशम् ॥ ३ ॥

कावेरिकानर्मदयोः पवित्रे
समागमे सज्जनतारणाय ।
सदैव मान्धातृपुरे वसन्तं
ओंकारमीशं शिवमेकमीडे ॥ ४ ॥

पूर्वोत्तरे प्रज्वलिकानिधाने
सदा वसन्तं गिरिजासमेतम् ।
सुरासुराराधितपादपद्मं
श्री वैद्यनाथं तमहं नमामि ॥ ५ ॥

यं डाकिनीशाकिनिकासमाजे
निषेव्यमाणं पिशिताशनैश्च ।
सदैव भीमादिपदप्रसिद्धं
तं शंकरं भक्तहितं नमामि ॥ ६ ॥

सुताम्रपर्णीजलराशियोगे
निबध्य सेतुं विशिखैरसंख्यैः ।
श्रीरामचन्द्रेण समर्चितं तं
रामेश्वराख्यं नियतं नमामि ॥ ७ ॥

याम्ये सदंगे नगरेऽतिरम्ये
विभूषिताङ्गं विबुधैश्च भोगैः ।
सद्भक्तिमुक्तिप्रदमीशमेकं
श्री नागनाथं शरणं प्रपद्ये ॥ ८ ॥

सानन्दमानन्दवने वसन्तं
आनन्दकन्दं हतपापवृन्दम् ।
वाराणसीनाथमनाथनाथं
श्री विश्वनाथं शरणं प्रपद्ये ॥ ९ ॥

सह्याद्रिशीर्षे विमले वसन्तं
गोदावरीतीरपवित्रदेशे ।
यद्दर्शनात् पातकमाशु नाशं
प्रयाति तं त्र्यम्बकमीशमीडे ॥ १० ॥

महाद्रिपार्श्वे च तटे रमन्तं
संपूज्यमानं सततं मुनीन्द्रैः ।
सुरासुरैः यक्षमहोरगाद्यैः
केदारमीशं शिवमेकमीडे ॥ ११ ॥

इलापुरे रम्यविशालकेऽस्मिन्
समुल्लसन्तं च जगद्वरेण्यं ।
वन्दे महोदारतरस्वभावं
धृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥

ज्योतिर्मयद्वादशलिंगकानां
शिवात्मनां प्रोक्तमिदं क्रमेण ।
स्तोत्रं पठित्वा मनुजोऽतिभक्त्या
फलं तदालोक्य निजं भजेच्च ॥ १३ ॥

***

३१. दक्षिणामूर्तिस्तोत्रम्

मन्दस्मितं स्फुरितमुग्धमुखारविन्दं
कन्दर्पकोटिशतसुन्दरदिव्यमूर्तिम् ।
आताम्रकोमलजटाघटितेन्दुरेखं
आलोकये वटतटीनिलयं दयालुम् ॥ १ ॥

वटविटपिसमीपे भूमिभागेनिषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ २ ॥

चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥ ३ ॥

सुनिर्मलज्ञानसुखैकरूपं प्रज्ञानहेतुं परमार्थदायिनम् ।
चिदंबुधौ तं विहरन्तमाद्यं आनन्दमूर्तिं गुरुराजमीडे ॥ ४ ॥

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥ ५ ॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥ ६ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ॥ ७ ॥

अंगुष्ठतर्जनीयोगमुद्राव्याजेन देहिनाम् ।
श्रुत्यर्थं ब्रह्मजीवैक्यं बोधयन् नोऽवताच्छिवः ॥ ८ ॥

मुद्रापुस्तकवह्निनागविलसद् बाहुं प्रसन्नाननं
मुक्ताहारविभूषितं शशिकलाभास्वज्जटामण्डलम् ।
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं
न्यग्रोधान्तनिवासिनं परगुरुं ध्यायाम्यभीष्टाप्तये ॥ ९ ॥

***

३२ . श्री दक्षिणामूर्तिस्तोत्रम्

(श्री शंकराचार्यविरचितम्)

उपासकानां यदुपासनीयं
उपात्तवासं वटशाखिमूले ।
तद्धाम दाक्षिण्यजुषा स्वमूर्त्या
जागर्त्तु चित्ते मम बोधरूपम् ॥ १ ॥

अद्राक्षमक्षीणदयानिधानं
आचार्यमाद्यं वटमूलभागे ।
मौनेन मन्दस्मितभूषितेन
महर्षिलोकस्य तमो नुदन्तम् ॥ २ ॥

विद्राविताशेषतमोगुणेन
मुद्राविशेषेण मुहुर्मुनीनाम् ।
निरस्यमायां दयया विधत्ते
देवो महांस्तत्वमसीतिबोधम् ॥ ३ ॥

अपारकारुण्यसुधातरङ्गैः
अपाङ्गपातैरवलोकयन्तम् ।
कठोरसंसारनिदाघतप्तान्
मुनीनहं नौमि गुरुं गुरूणाम् ॥ ४ ॥

ममाद्य देवो वटमूलवासी
कृपाविशेषात् कृतसन्निधानः ।
ओंकाररूपामुपदिश्य विद्याम्
आविद्यकध्वान्तमपाकरोतु ॥ ५ ॥

कलाभिरिन्दोरिवकल्पिताङ्गं
मुक्ताकलापैरिव बद्धमूर्तिम् ।
आलोकये देशिकमप्रमेयं
अनाद्यविद्यातिमिरप्रभातम् ॥ ६ ॥

स्वदक्षजानुस्थितवामपादं
पादोदरालङ्कृतयोगपट्टम् ।
अपस्मृतेराहितपादमङ्गे
प्रणौमि देवं प्रणिधानवन्तम् ॥ ७ ॥

तत्वार्थमन्तेवसतामृषीणां
युवाऽपि यः सन्नुपदेष्टुमीष्टे ।
प्रणौमि तं प्राक्तनपुण्यजालैः
आचार्यमाश्चर्यगुणाधिवासम् ॥ ८ ॥

एकेन मुद्रां परशुं करेण
करेण चान्येन मृगं दधानः ।
स्वजानुविन्यस्तकरः पुरस्तात्
आचार्यचूडामणिराविरस्तु ॥ ९ ॥

आलेपवन्तं मदनाङ्गभूत्या
शार्दूलकृत्त्या परिधानवन्तम् ।
आलोकये कञ्चन देशिकेन्द्रं
अज्ञानवाराकरबाडवाग्निम् ॥ १० ॥

चारुस्मितं सोमकलावतंसं
वीणाधरं व्यक्तजटाकलापम् ।
उपासते केचन योगिनस्त्वां
उपात्तनादानुभवप्रमोदम् ॥ ११ ॥

उपासते यं मुनयः शुकाद्याः
निराशिषो निर्ममताधिवासाः ।
तं दक्षिणामूर्तितनुं महेशं
उपास्महे मोहमहार्तिशान्त्यै ॥ १२ ॥

कान्त्या निन्दितकुन्दकन्दलवपुः न्यग्रोधमूले वसन्
कारुण्यामृतवारिभिर्मुनिजनान् संभावयन् वीक्षितैः ।
मोहध्वान्तविभेदनं विरचयन् बोधेन तत्तादृशा
देवस्तत्वमसीति बोधयतु मां मुद्रावता पाणिना ॥ १३ ॥

अगौरगात्रैरललाटनेत्रैः अशान्तवेषैरभुजंगभूषैः ।
अबोधमुद्रैरनपास्तनिद्रैः अपूरकामैरमरैरलं नः ॥ १४ ॥

दैवतानि कति सन्ति चावनौ नैव तानि मनसो मतानि मे ।
दीक्षितं जडधियामनुग्रहे दक्षिणाभिमुखमेव दैवतम ॥ १५ ॥

मुदिताय मुग्द्धशशिनाऽवतंसिने
भसितावलेपरमणीयमूर्तये ।
जगदिन्द्रजालरचनापटीयसे
महसे नमोऽस्तु वटमूलवासिने ॥ १६ ॥

व्यालंबिनीभिः परितो जटाभिः
कलावशेषेण कलाधरेण ।
स्फुरल्ललाटेन मुखेन्दुना च
प्रकाशसे चेतसि निर्मलानाम् ॥ १७ ॥

उपासकानां त्वमुमासहायः
पूर्णेन्दुभावं प्रकटीकरोषि ।
यदद्य ते दर्शनमात्रतो मे
द्रवत्यहो मानसचन्द्रकान्तः ॥ १८ ॥

यस्ते प्रसन्नामनुसंदधानो
मूर्तिं मुदा मुग्धशशाङ्कमौलेः ।
ऐश्वर्यमायुर्लभते च विद्यां
अन्ते च वेदान्तमहारहस्यम् ॥ १९ ॥

***

३३. शिवस्तोत्रम्

(स्वामि विवेकानन्दकृतम्)

निखिलभुवनजन्मस्थेमभङ्गप्ररोहाः
अकलितमहिमानः कल्पिता यत्र तस्मिन् ।
सुविमलगगनाभे ईशसंज्ञेऽप्यनीशे
मम भवतु भवेऽस्मिन् भासुरो भावबन्धः ॥ १ ॥

निहितनिखिलमोहेऽधीशता यत्र रूढा
प्रकटित परप्रेम्णा यो महादेव संज्ञः ।
अशिथिलपरिरम्भः प्रेमरूपस्य यस्य
हृदि प्रणयति विश्वं व्याजमात्रं विभुत्वम् ॥ २ ॥

वहति विपुलवातः पूर्वसंस्काररूपः
विदलति बलवृन्दं घूर्णितोर्मिमाला ।
प्रचलति खलु युग्मं युष्मदस्मत्प्रतीतं
अतिविकलितरूपं नौमि चित्तं शिवस्थम् ॥ ३ ॥

जनकजनितभावो वृत्तयः संस्कृताश्च
अगणनबहुरूपो यत्र चैको यथार्थः ।
शमितविकृतिवाते यत्र नान्तर्बहिश्च
तमहह हरमीडे चित्तवृत्तेर्निरोधम् ॥ ४ ॥

गलिततिमिरमालः शुभ्रतेजः प्रकाशः
धवलकमलशोभः ज्ञानपुञ्जाट्टहासः ।
यमिजनहृदिगम्यो निष्कलो ध्यायमानः
प्रणतमवतु मां सः मानसो राजहंसः ॥ ५ ॥

दुरितदलनदक्षं दक्षजादत्तदोषं
कलितकलिकलङ्कं कम्रकल्हारकान्तम् ।
परहितकरणाय प्राणप्रच्छेदप्रीतम्
नतनयननियुक्तं नीलकण्ठं नमामः ॥ ६ ॥

***

३४. पशुपत्यष्टकम्

(श्री पृथिवीपतिसूरिविरचितम्)

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ १ ॥

पशुपतिं द्युपतिं धरणीपतिं
भुजगलोकपतिं सतीपतिम् ।
प्रणतभक्तजनार्तिहरं
भजत रे मनुजा गिरिजापतिम् ॥ २ ॥

न जनको जननी न सोदरो
न तनयो न च भूरिबलं कुलम् ।
अवति कोऽपि कालवशं गतं
भजत रे मनुजा गिरिजापतिम् ॥ ३ ॥

मुरजडिण्डिमवाद्यविलक्षणं
मधुरपञ्चमनादविशारदम् ।
प्रमथभूतगणैरपिसेवितं
भजत रे मनुजा गिरिजापतिम् ॥ ४ ॥

शरणदं सुखदं शरणान्वितं
शिव शिवेति शिवेति नतं नृणाम् ।
अभयदं करुणावरुणालयं
भजत रे मनुजा गिरिजापतिम् ॥ ५ ॥

नरशिरोरचितं मणिकुण्डलं
भुजगहारमुदं वृषभध्वजम् ।
चितिरजोधवलीकृतविग्रहं
भजत रे मनुजा गिरिजापतिम् ॥ ६ ॥

मखविनाशकरं शशिशेखरं
सततमध्वरभाजि फलप्रदम् ।
प्रलयदग्धसुरासुरमानवं
भजत रे मनुजा गिरिजापतिम् ॥ ७ ॥

मदमपास्य चिरं हृदिसंस्थितं
मरणजन्मजराभयपीडनम् ।
जगदुदीक्ष्य समीपभयाकुलं
भजत रे मनुजा गिरिजापतिम् ॥ ८ ॥

हरिविरिञ्चिसुराधिपपूजितं
यमजनेशधनेशनमस्कृतम् ।
त्रिनयनं भुवनत्रितयाधिपं
भजत रे मनुजा गिरिजापतिम् ॥ ९ ॥

पशुपतेरिदमष्टकमद्भुतं
विरचितं पृथिवीपतिसूरिणा ।
पठति संशृणुते मनुजः सदा
शिवपुरीं वसते लभते मुदम् ॥ १० ॥

***

३५. श्री पार्वतीपरमेश्वरध्यानम्

ध्यायेन्निरामयंवस्तु सर्गस्थितिलयाधिककं ।
निर्गुणं निष्कलं नित्यं मनोवाचामगोचरम् ॥ १ ॥

गंगाधरं शशिधरं जटामकुटशोभितं ।
श्वेतभूतित्रिपुण्ड्रेण विराजितललाटकम् ॥ २ ॥

लोचनत्रयसंपन्नं स्वर्णकुण्डलशोभितं ।
स्मेराननं चतुर्बाहुं मुक्ताहारोपशोभितम् ॥ ३ ॥

अक्षमालां सुधाकुम्भं चिन्मयीं मुद्रिकामपि ।
पुस्तकं च भुजैर्द्दिव्यैः दधानं पार्वतीपतिम् ॥ ४ ॥

श्वेताम्बरधरं श्वेतं रत्नसिंहासनस्थितं ।
सर्वाभीष्टप्रदातारं वटमूलनिवासिनम् ॥ ५ ॥

वामाङ्के संस्थितां गौरीं बालार्कायुतसन्निभां ।
जपाकुसुमसाहस्रसमानश्रियमीश्वरीम् ॥ ६ ॥

सुवर्णरत्नखचितमकुटेन विराजितां ।
ललाटपट्टसंराजत्संलग्नतिलकाञ्चिताम् ॥ ७ ॥

राजीवायतनेत्रान्तां नीलोत्पलदलेक्षणां ।
संतप्तहेमरचित ताटङ्कभरणान्विताम् ॥ ८ ॥

तम्बूलचर्वणरत रक्तजिह्वाविराजितां ।
पताकाभरणोपेतां मुक्ताहारोपशोभिताम् ॥ ९ ॥

स्वर्णकङ्कणसंयुक्तैः चतुर्भिर्बाहुभिर्युतां ।
सुवर्णरत्नखचित काञ्चीदामविराजिताम् ॥ १ ० ॥

कदलीललितस्तम्भसन्निभोरुयुगान्वितां ।
श्रिया विराजितपदां भक्तत्राणपरायणाम् ॥ ११ ॥

अन्योन्याश्लिष्टहृद्बाहू गौरीशंकरसंज्ञकं ।
सनातनं परं ब्रह्म परमात्मानमव्ययम् ॥ १२ ॥

सदा ध्यायामि जगतामीश्वरं परमेश्वरम् ।

***

३६. शिवजयजयकारध्यानस्तोत्रम्

स्फटिकप्रतिभटकान्त विरचितकलिमलशान्त ।
शिव शंकर शिव शंकर जय कैलासपते ॥ १ ॥

गंगाधरपिंगलजट हृतशरणागतसङ्कट ।
शिव शंकर शिव शंकर जय कैलासपते ॥ २ ॥

बालसुधाकरशेखर भाललसद्वैश्वानर ।
शिव शंकर शिव शंकर जय कैलासपते ॥ ३ ॥

पद्मदलायतलोचन दृढभववन्धनमोचन ।
शिव शंकर शिव शंकर जय कैलासपते ॥४ ॥

मन्दमधुरहासवदन निर्जितदुर्लसितमदन ।
शिव शंकर शिव शंकर जय कैलासपते ॥ ५ ॥

सनकादिकवन्द्यचरण दुस्तरभवसिन्धुतरण ।
शिव शंकर शिव शंकर जय कैलासपते ॥ ६ ॥

लालितबालगजानन कलितमहापितृकानन ।
शिव शंकर शिव शंकर जय कैलासपते ॥ ७ ॥

सच्चिद्घनसुखसार लीलापीतमहागर ।
शिव शंकर शिव शंकर जय कैलासपते ॥ ८ ॥

गिरिजाश्लिष्टार्धतनो कल्पितगिरिराजधनो ।
शिव शंकर शिव शंकर जय कैलासपते ॥ ९ ॥

***

३७. शिवरक्षास्तोत्रम्

(याज्ञवल्क्यकृतम्)

चरितं देवदेवस्य महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गस्यसाधनम् ॥ १ ॥

गौरीविनायकोपेतं पञ्चवक्त्रं त्रिनेत्रकम् ।
शिवं ध्यात्वा दशभुजं शिवरक्षांपठेन्नरः ॥ २ ॥

गंगाधरः शिरः पातु फालमर्द्धेन्दुशेखरः ।
नयने मदनध्वंसी कर्णौ सर्पविभूषणः ॥ ३ ॥

घ्राणं पातु पुरारातिः मुखं पातु जगत्पतिः ।
जिह्वां वागीश्वरः पातु कन्धरं शितिकन्धरः ॥ ४ ॥

श्रीकण्ठः पातु मे कण्ठं स्कन्धौ विश्वधुरन्धरः ।
भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक् ॥ ५ ॥

हृदयं शंकरः पातु जठरं गिरिजापतिः ।
नाभिं मृत्युंजयः पातु कटिं व्याघ्राजिनाम्बरः ॥ ६ ॥

सक्थिनी पातु दीनार्तशरणागतवत्सलः ।
ऊरू महेश्वरः पातु जानुनी जगदीश्वरः ॥ ७ ॥

जङ्घे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः ।
चरणौ करुणासिन्धुः सर्वांगानि सदाशिवः ॥ ८ ॥

एतां शिवबलोपेतां रक्षां यः सुकृती पठेत् ।
स भुक्त्वा सकलान् कामान् शिवसायूज्यमाप्नुयात् ॥ ९ ॥

ग्रहभूतपिशाचाद्याः त्रैलोक्ये विचरन्ति ये ।
दूरादाशु पलायन्ते शिवनामाभिरक्षणात् ॥ १० ॥

अभयङ्करनामेदं कवचं पार्वतीपतेः ।
भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्त्रयम् ॥ ११ ॥

***

३८. शिवाष्टोत्तरशतनामस्तोत्रम्

शिवो महेश्वर शंभुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १ ॥

शंकरः शूलपाणिश्च खट्वांगी विष्णुवल्लभः ।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥ २ ॥

भवः शर्वः त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिः अन्धकासुरसूदनः ॥ ३ ॥

गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४ ॥

कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥ ५ ॥

सामप्रियः स्वरमयः त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ ६ ॥

हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ ७ ॥

हिरण्यरेताः दुर्धर्षः गिरीशो गिरिशोऽनघः ।
भुजंगभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८ ॥

कृत्तिवासाः पुरारातिः भगवान् प्रमथाधिपः ।
मृत्युंजयः सूक्ष्मतनुः जगद्व्यापी जगत्गुरुः ॥ ९ ॥

व्योमकेशो महासेनजनकश्चारुविक्रमः ।
रुद्रो भूतपतिः स्थाणुः अहिर्बुद्ध्न्यो दिगंबरः ॥ ११ ।

अष्टमूर्तिरनेकात्मा सात्विकः शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचनः ॥ १२ ॥

मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥ १३ ॥

भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात् ।
अपवर्गप्रदोऽनन्तः तारकः परमेश्वरः॥ १४ ॥

***

३९. प्रदोषस्तोत्रम्
(स्कान्दपुराणान्तर्गतम्)

सत्यं ब्रवीमि परलोकहितं ब्रवीमि
सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ।
संसारमुल्बणमसारमवाप्य जन्तोः
सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥ १ ॥

ये नार्चयन्ति गिरिशं समये प्रदोषे
ये नार्चितं शिवमपि प्रणमन्ति चान्ये ।
ये तत्कथां श्रुतिपुटैः न पिबन्ति मूढाः
ते जन्मजन्मसु भवन्ति नराः दरिद्राः ॥ २ ॥

ये वै प्रदोषसमये परमेश्वरस्य
कुर्वन्त्यनन्यमनसोऽङ्घ्रिसरोजपूजाम् ।
नित्यं प्रवृद्धधनधान्यकलत्रपुत्र–
सौभाग्यसंपदधिकास्त इहैव लोके ॥ ३ ॥

कैलासशैलभवने त्रिजगज्जनित्रीम्
गौरीं निवेश्य कनकाञ्चितरत्नपीठे ।
नृत्यं विधातुमभिवाञ्छति शूलपाणौ
देवाः प्रदोष समये नु भजन्ति सर्वे ॥ ४ ॥

वाग्देवी धृतवल्लकी शतमखो वेणुं दधत् पद्मजः
तालोन्निद्रकरा रमा भगवती गेयप्रयोगान्विता ।
विष्णुः सान्द्रमृदङ्गवादनपटुः देवाः समन्तात् स्थिताः
सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥ ५ ॥

गन्धर्वयक्षपतगोरगसिद्धसाध्य–
विद्याधरामरवराप्सरसां गणाश्च ।
येऽन्ये त्रिलोकनिलयाः सहभूतवर्गाः
प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥ ६ ॥

अतः प्रदोषे शिव एक एव
पूज्योऽथ नान्ये हरिपद्मजाद्याः ।
तस्मिन् महेशे विधिनेज्यमाने
सर्वे प्रसीदन्ति सुराधिनाथाः ॥ ७ ॥

***

४०. शिवस्तोत्रम्

(अगस्त्यकृतम्)

अद्य मे सफलं जन्म चाद्य मे सफलं तपः ।
अद्य मे सफलं ज्ञानं शंभो त्वत्पाददर्शनात् ॥ १ ॥

कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहं महेश्वर ।
अद्य ते पादपद्मस्य दर्शनात् भक्तवत्सल ॥ २ ॥

शिवः शंभुः शिवः शंभुः शिवः शंभुः शिवः शिवः ।
इति व्याहरतो नित्यं दिनान्यायान्तु यान्तु मे ॥ ३ ॥

शिवे भक्तिः शिवे भक्तिः शिवे भक्तिर्भवे भवे ।
सदा भूयात् सदा भूयात् सदा भूयात् सुनिश्चला ॥ ४ ॥

वयं धन्या वयं धन्या वयं धन्या जगत्त्रये ।
आदिदेवो महादेवो यदस्मत् कुलदैवतम् ॥ ५ ॥

हर शंभो महादेव विश्वेशामरवत्सल ।
शिवशंकर सर्वात्मन् नीलकण्ठ नमोऽस्तु ते ॥ ६ ॥

***

४१. अपराधाष्टकम्

(हालास्यमाहात्म्यान्तर्गतम्)

परिपूर्ण परानन्द परचित् सत्यविग्रह ।
सुन्दरेश्वर सर्वज्ञ त्राहि मामपराधिनम् ॥ १ ॥

फालाक्षिजातज्वलनलेलिहानमनोभव ।
जीवन्मुक्तिपुरीनाथ त्राहि मामपराधिनम् ॥ २ ॥

पारिजातगुणातीतपादपङ्कजवैभव ।
कदंबकाननाध्यक्ष त्राहि मामपराधिनम् ॥ ३ ॥

भक्तप्रार्थितसर्वार्थकामधेनो पुरान्तक ।
करुणावरुणावास त्राहि मामपराधिनम् ॥ ४ ॥

कैवल्यदाननिरत कालकूटभयापह ।
कन्यकानगरीनाथ त्राहि मामपराधिनम् ॥ ५ ॥

कमलापतिवागीशशचीशप्रमुखामरैः ।
परिपूजितपादाब्ज त्राहि मामपराधिनम् ॥ ६ ॥

पञ्चास्यपन्नगाकार परानन्दप्रदायक ।
पर्वताधीशजामतः त्राहि मामपराधिनम् ॥ ७ ॥

परात्पर पदांभोजपरिध्यानरतात्मनां ।
काङ्क्षितार्थप्रद स्वामिन् त्राहि मामपराधिनम् ॥ ८ ॥

सुन्दरेश्वर सर्वेश स्मरसौभाग्यसिद्धिद ।
श्रीमन् सुन्दरपाण्ड्येश त्राहि मामपराधिनम् ॥ ९ ॥

अपराधाष्टकस्तोत्रं यः पठेत् तव सन्निधौ ।
तस्यानन्तापराधं च क्षमस्व करुणाम्बुधे ॥ १० ॥

***

४२. शंकराष्टकम्

(श्री ब्रह्मानन्दविरचितम्)

शीर्षजटागणभारं गरलाहारं समस्तसंहारं ।
कैलासाद्रिविहारं पारं भववारिधेरहं वन्दे ॥ १ ॥

चन्द्रकलोज्ज्वलफालं कण्ठव्यालं जगत्रयीपालं ।
कृतनरमस्तकमालं कालं कालस्य कोमलं वन्दे ॥ २ ॥

कोपेक्षणहतकामं स्वात्मारामं नगेन्द्रजावामं ।
संसृतिशोकविरामं श्यामं कण्ठेन कारणं वन्दे ॥ ३ ॥

कटितटविलसितनागं खण्डितयागं महाद्भुतत्यागं ।
विगतविषयरसरागं भागं यज्ञेषु बिभ्रतं वन्दे ॥ ४ ॥

त्रिपुरादिकदनुजान्तं गिरिजाकान्तं सदैवसंशान्तम् ।
लीलाविजितकृतान्तं भान्तं स्वान्तेषु देहिनां वन्दे ॥ ५ ॥

सुरसरिदाप्लुतकेशं त्रिदशकुलेशं हृदयालयावेशम् ।
विगताशेषक्लेशं देशं सर्वेष्टसंपदां वन्दे ॥ ६ ॥

करतलकलितपिनाकं विगतजराकं सुकर्मणां पाकम् ।
परपदनीतवराकं नाकंगमपूगवन्दितं वन्दे ॥ ७ ॥

भूतिविभूषितकायं दुस्तरमायं विवर्जितापायम् ।
प्रमथसमूहसहायं सायं प्रातर्निरन्तरं वन्दे ॥ ८ ॥

यस्तु शिवाष्टकमेतद् ब्रह्मानन्देन निर्मितं नित्यम् ।
पठति समाहितचेताः प्राप्नोत्यन्ते स शैवमेवपदम् ॥ ९ ॥

***

४३. शिवाष्टकम्

आशावशादष्टदिगन्तरालें
देशान्तरभ्रान्तमशान्तबुद्धिम् ।
आकारमात्रादवनीसुरं मां
अकृत्यकृत्यं शिव पाहि शंभो ॥ १ ॥

मांसास्थिमज्जामलमूत्रपात्र–
गात्राभिमानोज्झितकृत्यजालम् ।
मद्भावनं मन्मथपीडितांगम्
मायामयं मां शिव पाहि शंभो ॥ २ ॥

संसारमायाजलधिप्रवाह–
संमग्नमुद्भ्रान्तमशान्तचित्तम् ।
त्वत्पादसेवाविमुखं सकामं
सुदुर्जनं मां शिव पाहि संभो ॥ ३ ॥

इष्टानृतं भ्रष्टमनिष्टधर्मं
नष्टात्मबोधं नयलेशहीनम् ।
कष्टारिषड्वर्गनिपीडिताङ्गं
दुष्टोत्तमं मां शिव पाहि संभो ॥ ४ ॥

वेदागमाभ्यः सरसानभिज्ञं
पादारविन्दं तव नार्चयन्तम् ।
वेदोक्तकर्माणि विलोपयन्तं
वेदाकृते मां शिव पाहि संभो ॥ ५ ॥

अन्यायवित्तार्जनसक्तचित्तं
अन्यासु नारीष्वनुरागवन्तम् ।
अन्यान्नभोक्तारमशुद्धदेहं
आचारहीनं शिव पाहि संभो ॥ ६ ॥

पुरात्तितापत्रयतप्तदेहं
परां गतिं गंतुमुपायवर्जम् ।
परावमानैकपरात्मभावं
नराधमं मां शिव पाहि संभो ॥ ७ ॥

पिता यथा रक्षति पुत्रमीश
जगत्पिता त्वं जगतः सहायः ।
कृतापराधं तव सर्वकार्ये
कृपानिधे मां शिव पाहि संभो ॥ ८ ॥

***

४४. विश्वमूर्त्यष्टकम्

(दक्षकृतम्)

अकारणायाखिलकारणाय
नमो महाकारणकारणाय ।
नमोऽस्तु कालानललोचनाय
कृतागसं मामव विश्वमूर्ते ॥ १ ॥

नमोऽस्त्वहीनाभरणाय नित्यं
नमः पशूनां पतये मृडाय ।
वेदान्तवेद्याय नमो नमस्ते
कृतागसं मामव विश्वमूर्ते ॥ २ ॥

नमोऽस्तु भक्तेहितदानदात्रे
सर्वौषधीनां पतये नमोऽस्तु ।
ब्रह्मण्यदेवाय नमो नमस्ते
कृतागसं मामव विश्वमूर्ते ॥ ३ ॥

कालाय कालानलसन्निभाय
हिरण्यगर्भाय नमो नमस्ते ।
हालाहलादाय नमो नमस्ते
कृतागसं मामव विश्वमूर्ते ॥ ४ ॥

विरिञ्चिनारायणशक्रमुख्यैः
अज्ञातवीर्याय नमो नमस्ते ।
सूक्ष्मातिसूक्ष्माय नमो नमस्ते
कृतागसं मामव विश्वमूर्ते ॥ ५ ॥

अनेककोटीन्दुनिभाय तेऽस्तु
नमो गिरीणां पतयेऽघहन्त्रे ।
नमोऽस्तु ते भक्तविपद्धराय
कृतागसं मामव विश्वमूर्ते ॥ ६ ॥

यज्ञाय यज्ञादिफलप्रदात्रे
यज्ञस्वरूपाय नमो नमस्ते ।
नमो महानन्दमयाय नित्यं
कृतागसं मामव विश्वमूर्ते ॥ ७ ॥

सर्वान्तरस्थाय विशुद्धधाम्ने
नमोऽस्तु ते दुष्टकुलान्तकाय ।
समस्ततेजोनिधये नमस्ते
कृतागसं मामव विश्वमूर्ते ॥ ८ ॥

***

४५. चन्द्रशेखराष्टकम्

(मार्कण्डेयकृतं)

संसारसर्पदष्टानां जन्तूनामविवेकिनां
चन्द्रशेखरपादाब्जस्मरणं परमौषधम् ।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर पाहि मां
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष मां ॥ १ ॥

रत्नसानुशरासनं रजतादिशृङ्गनिकेतनं
शिञ्जिनीकृतपन्नगेश्वरमच्युताननसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदिवालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ २ ॥

पंचपादपपुष्पगन्धपदाम्बुजद्वयशोभितं
फाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेबरं भवनाशनं भवमव्ययं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ३ ॥

मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं
पङ्कजासन पद्मलोचनपूजितांघ्रिसरोरुहम् ।
देवसिन्धुतरंगशीकरसिक्तशुभ्रजटाधरं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ४ ॥

यक्षराजसखं भगाक्षहरं भुजंगविभूषणं
शैलराजसुतापरिष्कृतचारुवामकलेबरम् ।
क्ष्वेलनीलगलं परश्वधधारिणं मृगधारिणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ५ ॥

कुण्डलीकृतकुण्डलीश्वरमण्डलं वृषवाहनं
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।
अन्धकान्तकमाश्रितामरपादपं शमनान्तकं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ६ ॥

भेषजं भवरोगिणामखिलापदामपहारिणं
दक्षयज्ञविनाशनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्ति मुक्ति फलप्रदं सकलाघसंघनिबर्हणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ७ ॥

भक्तवत्सलमर्चतां निधिमक्षयं हरिदम्बरं
सर्वभूतपतिं परात्परमप्रमेयमनुत्तमम् ।
सोमवारिनभूहुताशनसोमपानिलखाकृतिं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ८ ॥

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरन्तमपि प्रपञ्चमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमन्वितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥ ९ ॥

मृत्युभीतमृकण्डुसूनुकृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्न हि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगतामखिलार्थसंपदमादरात्
चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ॥ १० ॥

***

४६. महामृत्युञ्जयस्तोत्रम्

(मार्कण्डेयकृतम्)

रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १ ॥

कालकण्ठं कालमूर्तिं कलाग्निं कालनाशनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ २ ॥

नीलकन्ठं विरूपाक्षं निर्मलं निरुपद्रवम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ३ ॥

वामदेवं महादेवं लोकनाथं जगद्गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ४ ॥

देवदेवं जगन्नाथं देवेशं वृषभध्वजम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ५ ॥

त्र्यक्षं चतुर्भुजं शान्तं जटामकुटधारिणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ६ ॥

भस्मोद्धूलितसर्वांगं नागाभरणभूषितम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ७ ॥

अनन्तमव्ययं शान्तं अक्षमालाधरं हरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ८ ॥

आनन्दं परमं नित्यं कैवल्यपददायिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ९ ॥

अर्द्धनारीश्वरं देवं पार्वतीप्राणवल्लभम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १० ॥

प्रलयस्थितिकर्तारं आदिकर्तारमीश्वरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ ११ ॥

व्योमकेशं विरूपाक्षं चन्द्रार्द्धकृतशेखरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १२ ॥

गंगाधरं शशिधरं शंकरं शूलपाणिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १३ ॥

स्वर्गापवर्गदातारं सृष्टिस्थित्यन्तकारिणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १४ ॥

कल्पायुर्देहि मे नित्यं यावदायुररोगताम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १५ ॥

शिवेशानं महादेवं वामदेवं सदाशिवम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १६ ॥

उत्पत्तिस्थितिसंहारकर्त्तारं ईश्वरं गुरुं ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥ १७ ॥

मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति नाग्निचोरभयं क्वचित् ॥ १८ ॥

शतावृत्तं प्रकीर्त्तव्यं संकटे कष्टनाशनम् ।
शुचिर्भूत्वा पठेत्स्तोत्रं सर्वसिद्धिप्रदायकम् ॥ १९ ॥

मृत्युञ्जय महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥ २० ॥

तावकस्त्वद्व्रतप्राणः त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं त्र्यंबकाख्यममुं जपेत् ॥ २१ ॥

नमः शिवाय सांबाय हरये परमात्मने ।
प्रणतक्लेशनाशाय योगिनां पतये नमः ॥ २२ ॥

***

४७. नटराजध्यानम्

सप्तार्णवपरिक्षिप्तां द्वीपैः सप्तभिरन्विताम् ।
पञ्चाशत्कोटि विस्तीर्णां ध्यायेत्सर्वां सभां महीम् ॥ १ ॥

तस्याश्च हृदयाम्भोजे मातृकाक्षरकेसरम् ।
ध्यायेदष्टदलं धीमान् महाहृदयमत्र च ॥ २ ॥

तस्य मध्ये त्रिकोणे तु तरुणेन्दुशिखामणिम् ।
चारुचूडजटापाशं चलद्भोगीन्द्रकुण्डलम् ॥ ३ ॥

त्रिपुण्ड्रविलसत्फालं चन्द्रार्कानललोचनम् ।
वामभागस्थितां देवीं वीक्षयन्तमपांगतः ॥ ४ ॥

अधरोल्लङ्घनाकारसंजिहानस्मितांकुरम् ।
कस्तूरिकासितोद्दामकालकूटलसद्गलम् ॥ ५ ॥

महाडमरुवाद्यूद्ध्वदक्षपाणिसरोरुहम् ।
तदन्यकरपद्मान्तचलदुत्थितपावकम् ॥ ६ ॥

दक्षाधःकरपद्मेन हरन्तं प्राणिनां भयम् ।
विक्षिप्तान्यकरं तिर्यक् कुञ्चितेनाङ्घ्रिणाऽधमम् ॥ ७ ॥

वामेतरप्रकोष्ठान्तनृत्यत् फणधरेश्वरम् ।
कल्पब्रह्मकपालानां मालया लम्बमानया ॥ ८ ॥

स्वतन्त्रमात्मनो रूपं आचक्षाणं स्वभावतः
व्याघ्रचर्माम्बरधरं कटिसूत्रितपन्नगम् ।
दक्षपादाब्जविन्यासात् अधःकृततमोगुणम् ॥ ९ ॥

भस्मोद्धूलितसर्वांगं परमानन्दताण्डवम् ।
एवं ध्यायेत् पुरेशानं पुण्डरीकपुरेश्वरम् ॥ १० ॥

***

४८. श्री चिदंबरेश्वरस्तोत्रम्

कृपासमुद्रं सुमुखं त्रिनेत्रं
जटाधरं पार्वती वामभागम् ।
सदाशिवं रुद्रमनन्तरूपं
चिदम्बरेशं हृदि भावयामि ॥ १ ॥

वाचामतीतं फणिभूषणांगं
गणेशतातं धनदस्य मित्रम् ।
कन्दर्पनाशं कमलोत्पलाक्षं
चिदम्बरेशं हृदि भावयामि ॥ २ ॥

रमेशवन्द्यं रजतादिनाथं
श्रीवामदेवं भवदुःखनाशम् ।
रक्षाकरं राक्षसपीडितानां
चिदम्बरेशं हृदि भावयामि ॥ ३ ॥

देवादिदेवं जगदेकनाथं
देवेशवन्द्यं शशिखण्डचूडम् ।
गौरीसमेतं कृतविघ्नदक्षं
चिदम्बरेशं हृदि भावयामि ॥ ४ ॥

वेदान्तवेद्यं सुरवैरिविघ्नं
शुभप्रदं भक्तिमदन्तराणाम् ।
कालान्तकं श्रीकरुणाकटाक्षं
चिदम्बरेशं हृदि भावयामि ॥ ५ ॥

हेमाद्रिचापं त्रिगुणात्मभावं
गुहात्मजं व्याघ्रपुरीशमाद्यम् ।
श्मशानवासं वृषवाहनस्थं
चिदम्बरेशं हृदि भावयामि ॥ ६ ॥

आद्यन्तशून्यं त्रिपुरारिमीशं
नन्दीशमुख्यस्तुतवैभवाढ्यम् ।
समस्तदेवैः परिपूजिताङ्घ्रिं
चिदम्बरेशं हृदि भावयामि ॥ ७ ॥

तमेव भान्तं ह्यनुभाति सर्वं
अनेकरूपं परमार्थमेकम् ।
पिनाकपाणिं भवनाशहेतुं
चिदम्बरेशं हृदि भावयामि ॥ ८ ॥

विश्वेश्वरं नित्यमनन्तमाद्यं
त्रिलोचनं चन्द्रकलावतंसं ।
पतिं पशूनां हृदि सन्निविष्टं
चिदम्बरेशं हृदि भावयामि ॥ ९ ॥

विश्वाधिकं विष्णुमुखैरुपास्यं
त्रिलोचनं पञ्चमुखं प्रसन्नम् ।
उमापतिं पापहरं प्रशान्तं
चिदम्बरेशं हृदि भावयामि ॥ १० ॥

कर्पूरगात्रं कमनीयनेत्रं
कंसारिमित्रं कमलेन्दुवक्त्रम् ।
कन्दर्पगात्रं कमलेशमित्रं
चिदम्बरेशं हृदि भावयामि ॥ ११ ॥

विशालनेत्रं परिपूर्णगात्रं
गौरीकलत्रं हरिदम्बरेशम् ।
कुबेरमित्रं जगतः पवित्रं
चिदम्बरेशं हृदि भावयामि ॥ १२ ॥

कल्याणमूर्तिं कनकाद्रिचापं
कान्तासमाक्रान्तनिजार्द्धदेहम् ।
कपर्दिनं कामरिपुं पुरारिं
चिदम्बरेशं हृदि भावयामि ॥ १३ ॥

कल्पान्तकालाहितचण्डनृत्तं
समस्तवेदान्तवचोनिगूढम् ।
अयुग्मनेत्रं गिरिजासहायं
चिदम्बरेशं हृदि भावयामि ॥ १४ ॥

दिगंबरं शङ्कसितास्यहासं
कपालिनं शूलिनमप्रमेयम् ।
नगात्मजावक्त्रपयोजसूर्यं
चिदम्बरेशं हृदि भावयामि ॥ १५ ॥

सदाशिवं सत्पुरुषैरनेकैः
सदार्चितं सामशिरस्सुगीतम् ।
वैय्याघ्रचर्मांबरमुग्रमीशं
चिदम्बरेशं हृदि भावयामि ॥ १६ ॥

चिदंबरस्य स्तवनं पठेद्यः
प्रदोषकालेषु पुमान् स धन्यः ।
भोगानशेषाननुभूय भूयः
सायुज्यमप्येति चिदंबरस्य ॥ १७ ॥

***

४९. शिवशंकरस्तोत्रम्

अतिभीषणकटुभाषणयमकिंकरपटली
कृततादनपरिपीडनमरणागतसमये ।
उमया सह मम चेतसि यमशासन निवसन्
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ १ ॥

असदिन्द्रिय विषयोदयसुखसात्कृतसुकृतेः
परदूषणपरिमोक्षणकृतपातकविकृतेः ।
शमनाननभवकाननिरते भव शरणं
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ २ ॥

विषयाभिधबडिशायुधपिशितायितसुखतो
मकरायितगतिसंसृतिकृतसाहसविपदम् ।
परमालय परिपालय परितापितमनिशं
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ ३ ॥

दयिता मम दुहिता मम जननी मम जनको
मम कल्पितमतिसन्ततिमरुभूमिषु निरतम् ।
गिरिजासख जनितासुख वसतिं कुरु सुखिनं
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ ४ ॥

जनिनाशन मृतिमोचन शिवपूजननिरतेः
अभितोऽदृशमिदमीदृशमहमावह इति हा ।
गजकच्छपजनितश्रम विमलीकुरु सुमतिं
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ ५ ॥

त्वयि तिष्ठति सकलस्थितिकरुणात्मनि हृदये
वसुमार्गणकृपणेक्षणमनसा शिव विमुखम् ।
अकृताह्निकमसुपोषकमवताद् गिरिसुतया
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ ६ ॥

पितरावतिसुखदाविति शिशुना कृतहृदयौ
शिवया हृतभयके हृदि जनितं तव सुकृतम् ।
इति मे शिव हृदयं भव भवतात् तव दयया
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ ७ ॥

शरणागतभरणाश्रितकरुणामृतजलधे
शरणं तव चरणौ शिव मम संसृतिवसतेः ।
परिचिन्मय जगदामयभिषजे नतिरवतात्
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ ८ ॥

विविधाधिभिरतिभीतिभिरकृताधिकसुकृतं
शतकोटिषु नरकादिषु हतपातकविवशम् ।
मृड मामव सुकृती भव शिवया सह कृपया
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ ९ ॥

कलिनाशन गरलाशन कमलासनविनुत
कमलापतिनयनार्चितकरुणाकृतिचरण ।
करुणाकर मुनिसेवित भवसागरहरण
हर शंकर शिव शंकर हर मे हर दुरितम् ॥ १० ॥

***

क्षीराम्भोनिधिमन्थनोद्भवविषात् संदह्यमानान् सुरान्
ब्रह्मादीनवलोक्य यः करुणया हलाहलाख्यं विषम् ।
निश्शंकं निजलीलया कबलयन् लोकान् ररक्षादरात्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ १ ॥

क्षीरं स्वादु निपीय मातुलगृहे गत्वा स्वकीयं गृहं
क्षीरालाभवशेन खिन्नमनसे घोरं तपः कुर्वते ।
कारुण्यादुपमन्यवे निरवधिं क्षीरांबुधिं दत्तवान्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ २ ॥

मृत्युं वक्षसि ताडयन् निजपदध्यानैकभक्तं मुनिं
मार्कण्डेयमपालयत् करुणया लिङ्गाद्विनिर्गत्य यः ।
नेत्राम्भोजसमर्पणेन हरयेऽभीष्टं रथांगं ददौ
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ ३ ॥

ऊढं द्रोणजयद्रथादिरथिकैः सैन्यं महत् कौरवं
दृष्ट्वा कृष्णसहायवन्तमपि तं भीतं प्रपन्नार्तिहा ।
पार्थं रक्षितवान् अमोघविषयं दिव्यास्त्रमुद्बोधयन्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ ४ ॥

बालं शैवकुलोद्भवं परिहसत् स्वज्ञातिपक्षाकुलं
खिद्यन्तं तव मूर्ध्नि पुष्पनिचयं दातुं समुद्यत्करम् ।
दृष्ट्वाऽऽनम्य विरिञ्चिरम्यनगरे पूजां त्वदीयं भजन्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ ५ ॥

संत्रस्तेषु पुरा सुरासुरभयात् इन्द्रादिबृन्दारके-
ष्वारूढो धरणीरथं श्रुतिहयं कृत्वा मुरारिं शरम् ।
रक्षन् यः कृपया समस्तविबुधान् जित्वा पुरारीन् क्षणात्
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ ६ ॥

श्रौतस्मार्तपथे पराङ्मुखमपि प्रोद्यन्महापातकं
विश्वातीतमपि त्वमेव गतिरित्यालापयन्तं सकृत् ।
रक्षन् यः करुणापयोनिधिरिति प्राप्तप्रसिद्धिः पुरा
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ ७ ॥

गांगं वेगमवाप्य मान्यविबुधैः सोढुं पुरा याचितो
दृष्ट्वा भक्तभगीरथेन विनतो रुद्रो जटामण्डले ।
कारुण्यादवनीतले सुरनदीं आपूरयन् पावनीं
आर्तत्राणपरायणः स भगवान् गंगाधरो मे गतिः ॥ ८ ॥

***

५१. निर्वाणदशकस्तोत्रम्

न भूमिर्न तोयं न तेजो न वायुः
न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात् सुषुप्त्येकसिद्धः
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥

न वर्णा न वर्णाश्रमाचारधर्माः
न मे धारणाध्यानयोगादयोऽपि ।
अनात्माश्रयोऽहं ममाध्यासहानात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ २ ॥

न माता पिता वा न देवा न लोकाः
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ।
सुषुप्तौ निरस्तादिशून्यात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ३ ॥

न सांख्यं न शैवं न तत् पाञ्चरात्रं
न जैनं न मीमांसकादेर्मतं वा ।
विशिष्टानुभूत्या विशुद्धात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ४ ॥

न शुक्लं न कृष्णं न रक्तं न पीतं
न पीनं न कुब्जं न ह्रस्वं न दीर्घम् ।
न रूपं तथा ज्योतिराकारकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ५ ॥

न जाग्रन्न मे स्वप्नको वा सुषुप्तिः
न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्यात्मकत्वात् त्रयाणां तुरीयं
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ६ ॥

न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपञ्चः ।
स्वरूपावबोधाद्विकल्पासहिष्णुः
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ७ ॥

न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वापरादिक् ।
वियद्व्यापकत्वात् अखण्डैकरूपः
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ८ ॥

अपि व्यापकत्वादितत्वप्रयोगात्
स्वतस्सिद्धभावादनन्याश्रयत्वात् ।
जगत् तुच्छमेतत् समस्तं तदन्यः
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ९ ॥

न चैकं तदन्यत् द्वितीयं कुतः स्यात्
न चाकेवलत्वं न वा केवलत्वं ।
न शून्यं न चाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥

***

५२. शिवमङ्गलाष्टकम्

भवाय चन्द्रचूडाय निर्गुणाय गुणात्मने ।
कालकालाय रुद्राय नीलग्रीवाय मङ्गलम् ॥ १ ॥

वृषारूढाय भीमाय व्याघ्रचर्माम्बराय च ।
पशूनां पतये तुभ्यं गौरीकान्ताय मङ्गलम् ॥ २ ॥

भस्मोद्धूलितदेहाय व्यालयज्ञोपवीतिने ।
रुद्राक्षमालाभूषाय व्योमकेशाय मङ्गलम् ॥ ३ ॥

सूर्यचन्द्राग्निनेत्राय नमः कैलासवासिने ।
सच्चिदानन्दरूपाय प्रमथेशाय मङ्गलम् ॥ ४ ॥

मृत्युंजयाय सांबाय सृष्टिस्थित्यन्तकारिणे ।
त्र्यंबकाय सुशान्ताय त्रिलोकेशाय मङ्गलम् ॥ ५ ॥

गंगाधराय सोमाय नमो हरिहरात्मने ।
उग्राय त्रिपुरघ्नाय वामदेवाय मङ्गलम् ॥ ६ ॥

सद्योजाताय शर्वाय दिव्यज्ञानप्रदायिने ।
ईशानाय नमस्तुभ्यं पञ्चवक्त्राय मङ्गलम् ॥ ७ ॥

सदाशिवस्वरूपाय नमस्तत्पुरुषाय च ।
अघोरायच घोराय महादेवाय मङ्गलम् ॥ ८ ॥

मङ्गलाष्टकमेतद्वै शंभोर्यः कीर्तयेद्दिने ।
तस्य मृत्युभयं नास्ति रोगपीडाभयं तथा ॥ ९ ॥

***

५३. श्री वैद्यनाथाष्टकम्

श्रीराम सौमित्रि जटायुवेद–
षडाननादित्य कुजार्चिताय ।
श्री नीलकण्ठाय दयामयाय
श्री वैद्यनाथाय नमः शिवाय ॥ १ ॥

गंगाप्रवाहेन्दु–जटाधराय
त्रिलोचनाय स्मरकालहन्त्रे ।
समस्त देवैरपि पूजिताय
श्री वैद्यनाथाय नमः शिवाय ॥ २ ॥

भक्तप्रियाय त्रिपुरान्तकाय
पिनाकिने दुष्टहराय नित्यम् ।
प्रत्यक्षलीलाय मनुष्यलोके
श्री वैद्यनाथाय नमः शिवाय ॥ ३ ॥

प्रभूतवातादि समस्त रोग–
प्रणाशकर्त्रे मुनिवन्दिताय ।
प्रभाकरेन्द्वग्निविलोचनाय
श्री वैद्यनाथाय नमः शिवाय ॥ ४ ॥

वाक्श्रोत्रनेत्राङ्घ्रिविहीनजन्तोः
वाक्श्रोत्रनेत्राङ्घ्रिमुखप्रदाय ।
कुष्ठादिसर्वोन्नतरोगहन्त्रे
श्री वैद्यनाथाय नमः शिवाय ॥ ५ ॥

वेदान्तवेद्याय जगन्मयाय
योगीश्वरध्येयपदांबुजाय ।
त्रिमूर्तिरूपाय सहस्रनाम्ने
श्री वैद्यनाथाय नमः शिवाय ॥ ६ ॥

स्वतीर्थ मृत् भस्मभृदंगभाजां
पिशाचदुःखार्तिभयापहाय ।
आत्म स्वरूपाय शरीरभाजां
श्री वैद्यनाथाय नमः शिवाय ॥ ७ ॥

श्री नीलकण्ठाय वृषध्वजाय
स्रग्गन्धभस्माद्यपिशोभिताय ।
सुपुत्र दारादि सुभाग्यदाय
श्री वैद्यनाथाय नमः शिवाय ॥ ८ ॥

स्वामिन् सर्वजगन्नाथ सर्वरोगचिकित्सक ।
क्षुद्ररोगभयार्तान् नः त्राहि त्राहि महाप्रभो ॥ ९ ॥

देवीस्तोत्राणि

विषयसूची

पृष्ठसंख्या

१.	श्रीललितापञ्चरत्नम्	१२५
२.	श्रीभवान्यष्टकम्	१२६
३.	श्रीमीनाक्षीस्तोत्रम्	१२७
४.	आनन्दलहरी	१२८
५.	देव्यपराधक्षमापणस्तोत्रं	१३१
६.	त्रिपुरसुन्दर्यष्टकम्	१३२
७.	कल्याणवृष्टिस्तवः	१३४
८.	श्रीअंबाष्टकम्	१३६
९.	अंबास्तोत्रम्	१३७
१०.	मीनाक्षीपञ्चरत्नम्	१३८
११.	मीनाक्षीमणिमालाष्टकम्	१३९
१२.	श्रीकामाक्षीस्तोत्रम्	१४०
१३.	आपदुन्मूलनदुर्गास्तोत्रम्	१४१
१४.	श्री देवीमङ्गलाष्टकम्	१४२
१५.	श्रीमन्त्रमातृकापुश्पमालास्तवः	१४३
१६.	गौरीदशकम्	१४५
१७.	देवीभुजंगस्तोत्रम्	१४७
१८.	नवरत्नमालिक	१५१
१९.	भवानीभुजंगम्	१५२
२०.	अन्नपूर्णास्तोत्रम्	१५४
२१.	श्री जगद्धात्रीस्तोत्रम्	१५६
२२.	श्री दुर्गादेवीध्यानम्	१५७
२३.	श्री राजराजेश्वर्यष्टकम्	१५८
२४.	दुर्गाष्टकम्	१५९

देवीस्तोत्राणि

विषयसूची

		पृष्ठसंख्या
२५.	आपदुद्धारकदुर्गास्तोत्रम्	१६०
२६.	शीतलाष्टकम्	१६२
२७.	ज्ञानप्रसूनांबिकास्तोत्रम्	१६३
२८.	दुर्गाकवचम्	१६४
२९.	अंबापंचरत्नम्	१६५
३०.	भुवनेश्वरीपंचरत्नस्तुतिः	१६६
३१.	मूकांबिकास्तोत्रम्	१६७
३२.	श्री कामाक्षीस्तोत्रंम् –२	१६८
३३.	महिषासुरमर्द्दिनीस्तोत्रम्	१७०
३४.	कामाक्ष्यष्टकम्	१७३

***

१. श्रीललितापञ्चरत्नम्

(श्री शंकराचार्यकृतम्)

प्रातः स्मरामि ललितावदनारविन्दं
बिम्बाधरं पृथुलमौक्तिकशोभिनासम् ।
आकर्णदीर्घनयनं मणिकुण्डलाढ्यं
मन्दस्मितं मृगमदोज्ज्वलफालदेशम् ॥ १ ॥

प्रातर्भजामि ललिताभुजकल्पवल्लीं
रत्नाङ्गुलीयलसदङ्गुळिपल्लवाढ्याम् ।
माणिक्यहेमवलयाङ्गदशोभमानां
पुण्ड्रेक्षुचापकुसुमेषुसृणीदधानाम् ॥ २ ॥

प्रातर्नमामि ललिताचरणारविन्दं
भक्तेष्टदाननिरतं भवसिन्धुपोतम् ।
पद्मासनादि सुरनायकपूजनीयं
पद्माङ्कुशध्वजसुदर्शनलाञ्छनाढ्यम् ॥ ३ ॥

प्रातस्तुवे परशिवां ललितां भवानीं
त्रय्यन्तवेद्यविभवां करुणानवद्याम् ।
विश्वस्य सृष्टिविलयस्थितिहेतुभूतां
विश्वेश्वरीं निगमवाङ्मनसातिदूराम् ॥ ४ ॥

प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरेति कमलेति महेश्वरीति ।
श्री शांभवीति जगतां जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥ ५ ॥

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः
सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना
विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम् ॥ ६ ॥

***

२. श्रीभवान्यष्टकम्

न तातो न माता न बन्धुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ १ ॥

भवाब्धावपारे महादुःखभीरुः
पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहम्
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ २ ॥

न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।
न जानामि पूजां न च न्यासयोगं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ३ ॥

न जानामि पुण्यं न जानामि तीर्थं

न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातः
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ४ ॥

कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ५ ॥

प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यत् सदाहं शरण्ये
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ६ ॥

विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ७ ॥

अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रणष्टः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ ८ ॥

***

३. श्रीमीनाक्षीस्तोत्रम्

(श्री शंकराचार्यकृतं)

श्रीविद्ये शिववामभागनिलये श्रीराजराजार्चिते
श्रीनाथादिगुरुस्वरूपविभवे चिन्तामणीपीठिके ।
श्रीवाणीगिरिजानुताङ्घ्रिकमले श्रीशांभवि श्रीशिवे

मध्याह्ने मलयध्वजाधिपसुते मां पाहि मीनाम्बिके ॥ १ ॥

चक्रस्थेऽचपले चराचरजगन्नाथे जगत्पूजिते
आर्तालीवरदे नताभयकरे वक्षोजभारान्विते ।
विद्ये वेदकलापमौलिविदिते विद्युल्लताविग्रहे
मातः पूर्णसुधारसार्द्रहृदये मां पाहि मीनाम्बिके ॥ २ ॥

कोटीराङ्गदरत्नकुण्डलधरे कोदण्डबाणाञ्चिते
कोकाकारकुचद्वयोपरिलसत्प्रालम्बिहारान्विते ।
शिञ्जन्नूपुरपादसारसमणिश्रीपादुकालंकृते
महारिद्र्यभुजंगगारुडखगे मां पाहि मीनाम्बिके ॥ ३ ॥

ब्रह्मेशाच्युतगीयमानचरिते प्रेतासनान्तःस्थिते
पाशोदङ्कुशचापबाणकलिते बालेन्दुचूडाञ्चिते ।
बाले बालकुरङ्गलोलनयने बालार्ककोट्युज्ज्वले
मुद्राराधितदैवते मुनिनुते मां पाहि मीनाम्बिके ॥ ४ ॥

गन्धर्वामरयक्षपन्नगनुते गङ्गाधरालिङ्गिते
गायत्रीगरुडासने कमलजे सुश्यामले सुस्थिते ।
खातीते खलदारुपावकशिखे खद्योतकोट्युज्ज्वले
मन्त्राराधितदैवते मुनिनुते मां पाहि मीनाम्बिके ॥ ५ ॥

नादे नारदतुम्बुराद्यविनुते नादान्तनादात्मिके
नित्ये नीललतात्मिके निरुपमे नीवारशूकोपमे ।
कान्ते कामकले कदम्बनिलये कामेश्वराङ्कस्थिते
मद्विद्ये मदभीष्टकल्पलतिके मां पाहि मीनाम्बिके ॥ ६ ॥

वीणानादनिमीलितार्धनयने विस्रस्तचूलीभरे
ताम्बूलारुणपल्लवाधरयुते ताटङ्कहारान्विते ।
श्यामे चन्द्रकलावतंसकलिते कस्तूरिकाफालके
पूर्णे पूर्णकलाभिरामवदने मां पाहि मीनाम्बिके ॥ ७ ॥

शब्दब्रह्ममयी चराचरमयी ज्योतिर्मयी वाङ्मयी
नित्यानन्दमयी निरञ्जनमयी तत्त्वंमयी चिन्मयी ।
तत्त्वातीतमयी परात्परमयी मायामयी श्रीमयी
सर्वैश्वर्यमयी सदाशिवमयी मां पाहि मीनाम्बिके ॥ ८ ॥

***

४. आनन्दलहरी

(श्री शंकराचार्यकृतं)

भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्नवदनैः
प्रजानामीशानः त्रिपुरमथनः पञ्चभिरपि ।
न षड्भिः सेनानीः दशशतमुखैरप्यहिपतिः
तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥ १ ॥

घृतक्षीरद्राक्षामधुमधुरिमा कैरपिपदैः
विशिष्यानाख्येयो भवति रसनामात्रविषयः ।
तथा ते सौन्दर्यं परमशिवदृङ्मात्र विषयः
कथङ्कारं ब्रूमः सकलनिगमागोचरगुणे ॥ २ ॥

मुखे ते ताम्बूलं नयनयुगले कज्जलकला
ललाटे काश्मीरं विलसति गले मौक्तिकलता ।
स्फुरत् काञ्ची शाटी पृथुकटितटे हाटकमयी
भजामि त्वां गौरीं नगपतिकिशोरीमविरतं ॥ ३ ॥

विराजन्मन्दारद्रुमकुसुमहारस्तनतटी
नदद्वीणानादश्रवणविलसत्कुण्डलगुणा ।
नताङ्गी मातङ्गी रुचिरगतिभङ्गी भगवती
सती शंभोरंभोरुहचटुलचक्षुर्विजयते ॥ ४ ॥

नवीनार्काभ्राजन्मणिकनकभूषापरिकरैः
वृताङ्गी सारङ्गीरुचिरनयनाङ्गीकृतशिवा ।
तडित्पीता पीताम्बरललितमञ्जीरसुभगा
ममापर्णा पूर्णा निरवधिसुखैरस्तु सुमुखी ॥ ५ ॥

हिमाद्रेः संभूता सुललितकरैः पल्लवयुता
सुपुष्पा मुक्ताभिर्भ्रमरकलिताचालकभरैः ।
कृतस्थाणुस्थाना कुचफलनता सूक्तिसरसा
रुजां हन्त्री गन्त्री विलसति चिदानन्दलतिका ॥ ६ ॥

सपर्णामाकीर्णां कतिपयगुणैः सादरमिह
श्रयन्त्यन्ये वल्लीं मम तु मतिरेवं विलसति ।
अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः
पुराणोऽपि स्थाणुः फलति किल कैवल्यपदवीम् ॥ ७ ॥

विधात्री धर्माणां त्वमसि सकलाम्नायजननी
त्वमर्थानां मूलं धनदनमनीयाङ्घ्रिकमले ।
त्वमादिः कामानां जननि कृतकन्दर्पविजये
सतां मुक्तेर्बीजं त्वमसि परब्रह्ममहिषी ॥ ८ ॥

प्रभूता भक्तिस्ते यदपि न ममालोलमनसः
त्वयातु श्रीमत्या सदयमवलोक्योऽहमधुना ।
पयोदः पानीयं दिशति मधुरं चातकमुखे
भृशं शङ्के कैर्वा विधिभिरनुनीता मम मतिः ॥ ९ ॥

कृपापाङ्गालोकं वितर तरसा साधुचरिते
न ते युक्तोपेक्षा मयि शरणदीक्षामुपगते ।
न चेदिष्टं दद्यादनुपदमहो कल्पलतिका
विशेषः सामान्यैः कथमितरवल्लीपरिकरैः ॥ १० ॥

महान्तं विश्वासं तवचरणपङ्केरुहयुगे

निधायन्यन्नैवाश्रितमिह मया दैवतमुमे ।
तथापि त्वच्चेतो यदि मयि न जायेत सदयं
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ११ ॥

अयः स्पर्शे लग्नं सपदि लभते हेमपदवीं
यथा रथ्यापाथः शुचि भवति गङ्गौघमिलितं ।
तथा तत्तत्पापैरतिमलिनमन्तर्मम यदि
त्वयि प्रेम्णासक्तं कथमिव न जायेत विमलम् ॥ १२ ॥

त्वदन्यस्मादिच्छाविषयफललाभे न नियमः
त्वमर्थानामिच्छाधिकमपि समर्था वितरणे ।
इति प्राहुः प्राञ्चः कमलभवनाद्यास्त्वयि मनः
त्वदासक्तं नक्तंदिवमुचितमीशानि कुरु तत् ॥ १३ ॥

स्फुरन्नानारत्न स्फटिकमयभित्तिप्रतिफल–
त्त्वदाकारं चञ्चच्छशधरकलासौधशिखरम् ।
मुकुन्दब्रह्मेन्द्रप्रभृतिपरिवारं विजयते
तवागारं रम्यं त्रिभुवन महाराजगृहिणि ॥ १४ ॥

निवासः कैलासे विधिशतमखाद्याः स्तुतिकराः
कुटुंबं त्रैलोक्यं कृतकरपुटः सिद्धिनिकरः ।
महेशः प्राणेशस्तदवनिधराधीशतनये
न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥ १५ ॥

वृषो वृद्धो यानं विषमशनमाशानिवसनं
श्मशानं क्रीडाभूर्भुजगनिवहो भूषणविधिः ।
समग्रा सामग्री जगति विदितैवं स्मररिपोः
यदेतस्यैश्वर्यं तव जननि सौभाग्यमहिमा ॥ १६ ॥

अशेषब्रह्माण्डप्रलयविधिनैसर्गिकमतिः

श्मशानेष्वासीनः कृतभसितलेपः पशुपतिः ।
दधौ कण्ठे हालाहलमखिलभूगोलकृपया
भवत्याः संगत्याः फलमिति च कल्याणि कलये ॥ १७ ॥

त्वदीयं सौंदर्यं निरतिशयमालोक्य परया
भियैवासीद्गङ्गा जलमयतनुः शैलतनये ।
तदेतस्यास्तस्माद्वदनकमलं वीक्ष्य कृपया
प्रतिष्ठामातन्वन्निजशिरसि वासेन गिरिशः ॥ १८ ॥

विशालश्रीखण्डद्रवमृगमदाकीर्नघुसृण–
प्रसूनव्यामिश्रं भगवति तवाभ्यङ्गसलिलम् ।
समादाय स्रष्टा चलितपदपांसून्निजकरैः
समाधत्ते सृष्टिं विबुधपुरपङ्क्तेरुहदृशाम् ॥ १९ ॥

वसन्ते सानन्दे कुसुमितलताभिः परिवृते
स्फुरन्नानापद्मे सरसि कलहंसालिसुभगे ।
सखीभिः खेलन्तीं मलयपवनान्दोलितजले
स्मरेद्यस्त्वां तस्य ज्वरजनितपीडापसरति ॥ २० ॥

***

५. देव्यपराधक्षमापणस्तोत्रम्

(श्री शंकराचार्यकृतं)

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥ १ ॥

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे

कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २ ॥

पृथिव्यां पुत्रास्ते जननि बहवस्सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३ ॥

जगन्मातर्मातस्तवचरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥

परित्यक्ता देवाः विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥ ८ ॥

नाराधितासि विधिना विविधोपचारैः
किं रूक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥

आपत्सुमग्नः स्मरणं त्वदीयं
करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः
क्षुधातृषार्ताः जननीं स्मरन्ति ॥ १० ॥

जगदंब विचित्रमत्र किं परिपूर्णा करुणास्तिचेन्मयि ।
अपराधपरम्परावृतं नहि माता समुपेक्षते सुतम् ॥ ११ ॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥ १२ ॥

***

६. त्रिपुरसुन्दर्यष्टकम्

(श्री शंकराचार्यकृतं)

कदम्बवनचारिणीम् मुनिकदम्बकादम्बिनीम्
नितम्बजितभूधराम् सुरनितम्बिनीसेविताम् ।

नवाम्बुरुहलोचनामभिनवाम्बुदश्यामलाम्
त्रिलोचनकुटुम्बिनीम् त्रिपुरसुन्दरीमाश्रये ॥ १ ॥

कदम्बवनवासिनीम् कनकवल्लकीधारिणीम्
महार्हमणिहारिणीम् मुखसमुल्लसद्वारुणीम् ।
दयाविभवकारिणीम् विशदरोचनाचारिणीं
त्रिलोचनकुटुम्बिनीम् त्रिपुरसुन्दरीमाश्रये ॥ २ ॥

कदम्बवनशालया कुचभरोल्लसन्मालया
कुचोपमितशैलया गुरुकृपालसद्वेलया ।
मदारुणकपोलया मधुरगीतवाचालया
कयापि घननीलया कवचिता वयम् लीलया ॥ ३ ॥

कदम्बवनमध्यगां कनकमण्डलोपस्थितां
षडम्बुरुहवासिनीम् सततसिद्धसौदामिनीम् ।
विडम्बितजपारुचिं विकचचन्द्रचूडामणिम्
त्रिलोचनकुटुम्बिनीम् त्रिपुरसुन्दरीमाश्रये ॥ ४ ॥

कुचाञ्चितविपञ्चिकां कुटिलकुन्तलालंकृतां
कुशेशयनिवासिनीम् कुटिलचित्तविद्वेषिणीम् ।
मदारुणविलोचनाम् मनसिजारिसम्मोहिनीं
मतङ्गमुनिकन्यकां मधुरभाषिणीमाश्रये ॥ ५ ॥

स्मरेत्प्रथमपुष्पिणीम् रुधिरबिन्दुनीलाम्बरां
गृहीतमधुपत्रिकाम् मदविघूर्णनेत्राञ्चलाम् ।
घनस्तनभरोन्नतां गलितचूलिकां श्यामलां
त्रिलोचनकुटुम्बिनीम् त्रिपुरसुन्दरीमाश्रये ॥ ६ ॥

सकुङ्कुमविलेपनामलकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषांबरां
जपाकुसुमभासुरां जपविधौ स्मराम्यम्बिकाम् ॥ ७ ॥

पुरन्दरपुरन्ध्रिकाचिकुरबन्धसैरन्ध्रिकां
पितामहपतिव्रतापटुपटीरचर्चारताम् ।
मुकुन्दरमणीमणीलसदलङ्क्रियाकारिणीं
भजामि भुवनाम्बिकां सुरवधूटिकाचेटिकाम् ॥ ८ ॥

***

७. कल्याणवृष्टिस्तवः

(श्री शंकराचार्यकृतं)

कल्याणवृष्टिभिरिवामृतपूरिताभिः
लक्ष्मीस्वयंवरण मंगलदीपिकाभिः ।
सेवाभिरम्ब तव पादसरोजमूले
नाकारि किं मनसि भाग्यवतां जनानाम् ॥ १ ॥

एतावदेव जननि स्पृहणीयमास्ते
त्वद्वन्दनेषु सलिलस्थगिते च नेत्रे ।
सान्निद्ध्यमुद्यदरुणायुतसोदरस्य
त्वद्विग्रहस्य परया सुधयाप्लुतस्य ॥ २ ॥

ईशत्वनामकलुषाः कति वा न सन्ति
ब्रह्मादयः प्रतिभवं प्रलयाभिभूताः ।
एकः स एव जननि स्थिरसिद्धिरास्ते
यः पादयोस्तव सकृत्प्रणतिं करोति ॥ ३ ॥

लब्ध्वा सकृत् त्रिपुरसुन्दरि तावकीनं
कारुण्यकन्दलित कान्तिभरं कटाक्षम् ।
कन्दर्पकोटिसुभगास्त्वयि भक्तिभाजः
सम्मोहयन्ति तरुणीर्भुवनत्रयेऽपि ॥ ४ ॥

ह्रींकारमेव तव नाम गृणन्ति वेदाः
मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे ।
त्वत्संस्मृतौ यमभटाभिभवं विहाय
दीव्यन्ति नन्दनवने सह लोकपालैः ॥ ५ ॥

हन्तुः पुरमधिगलं परिपीयमानः
क्रूरः कथं न भविता गरलस्य वेगः ।
नाश्वासनाय यदि मातरिदं तवार्धं

देहस्य शश्वदमृताप्लुतशीतलस्य ॥ ६ ॥

सर्वज्ञतां सदसि वाक्पटुतां प्रसूते
देवि त्वदङ्घ्रि सरसीरुहयोः प्रणामः ।
किं च स्फुरन्मकुटमुज्ज्वलमातपत्रं
द्वे चामरे च महतीं वसुधां ददाति ॥ ७ ॥

कल्पद्रुमैरभिमतप्रतिपादनेषु
कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः ।
आलोकय त्रिपुरसुन्दरि ममनाथम्
त्वय्येव भक्तिभरितं त्वयि बद्धतृष्णम् ॥ ८ ॥

हन्तेतरेष्वपि मनांसि निधाय चान्ये
भक्तिं वहन्ति किल पामरदैवतेषु ।
त्वामेव देवि मनसा समनुस्मरामि
त्वामेव नौमि शरणं जननि त्वमेव ॥ ९ ॥

लक्ष्येषु सत्स्वपि कटाक्षनिरीक्षणानां
आलोकय त्रिपुरसुन्दरि मां कदाचित् ।
नूनं मया तु सदृशः करुणैकपात्रं
जातो जनिष्यति जनो न च जायते वा ॥ १० ॥

ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां
किं नाम दुर्लभमिह त्रिपुराधिवासे ।
मालाकिरीटमदवारणमाननीया
तान् सेवते वसुमती स्वयमेव लक्ष्मीः ॥ ११ ॥

संपत्करणि सकलेन्द्रियनन्दनानि
साम्राज्यदाननिरतानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयन्तु नान्यम् ॥ १२ ॥

कल्पोपसंहृतिषु कल्पिताण्डवस्य
देवस्य खन्डपरशोः परभैरवस्य ।
पाशाङ्कुशैक्षवशरासनपुष्पबाणा
सा साक्षिणी विजयते तव मूर्तिरेका ॥ १३ ॥

लग्नं सदा भवतु मातरिदं तवार्धं
तेजः परं बहुलकुङ्कुमपङ्कशोणम् ।
भास्वत्किरीटममृतांशुकलावतंसं
मध्ये त्रिकोणनिलयं परमामृतार्द्रम् ॥ १४ ॥

ह्रींकारमेव तव नाम तदेव रूपं
त्वन्नाम दुर्लभमिह त्रिपुरे गृणन्ति ।
त्वत्तेजसा परिणतं वियदादिभूतं
सौख्यं तनोति सरसीरुहसंभवादेः ॥ १५ ॥

ह्रींकारत्रयसंपुटेन महता मन्त्रेण संदीपितं
स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिरस्थायिनी
वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं वयः ॥ १६ ॥

***

८. श्री अम्बाष्टकम्

(श्री शंकराचार्यकृतम्)

चाञ्चल्यारुणलोचनाञ्चितकृपां चन्द्रार्धचूडामणिं
चारुस्मेरमुखां चराचरजगत्संरक्षणे तत्पराम् ।
चञ्चच्चम्पकनासिकाग्रविलसन्मुक्तामणीरञ्जितां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ १ ॥

कस्तूरीतिलकाञ्चितेन्दुविलसत्प्रोद्भासिफालस्थलीं

कर्पूरद्रवमिश्रचूर्णखदिरामोदोल्लसद्वीटिकाम् ।
लोलापाङ्गतरङ्गितैरधिकृपासारैर्नतानन्दिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ २ ॥

राजन्मत्तमरालमन्दगमनां राजीवपत्रेक्षणां
राजीवप्रभवादिदेवमकुटाराजत्पदांभोरुहाम् ।
राजीवायतपत्रमण्डितकुचां राजाधिराजेश्वरीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ३ ॥

षट्कोणाङ्गणदीपिकां शिवसतीं षड्वैरिवर्गापाहां
षट्चक्रान्तरसंस्थितां वरसुतां षड्योगिनीवेष्टिताम् ।
षट्चक्राञ्चितपादुकाञ्चितपदां षड्भावगां षोडशीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ४ ॥

श्रीनाथाकृतिपालितत्रिभुवनां श्रीचक्रसञ्चारिणीं
ज्ञानासक्तमनोजयौवनलसत् गन्धर्वकन्यावृताम् ।
दीनानामतिवेलभाग्यकलनीं दिव्याम्बरालङ्कृतां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ५ ॥

लावण्याधिकभूषिताङ्गलतिकां लाक्षारसद्राविणीं
सेवायातसमस्तदेववनितां सीमन्तभूषान्विताम् ।
भावोल्लासवशीकृतप्रियतमां भण्डासुरच्छेदिनीम्
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ६ ॥

धन्यां सोमविभावनीयचरितां धाराधरश्यामलां
मान्याराधनमेदिनीं सुमनसां मुक्तिप्रदानव्रताम् ।
कन्यापूजनसुप्रसन्नहृदयां काञ्चीलसन्मध्यमां
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ७ ॥

कर्पूरागरुकुङ्कुमाङ्कितकुचां कर्पूरवर्णस्थितां
कृष्टोत्कृष्टसुकृष्टकर्मदहनां कामेश्वरीं कामिनीम् ।

कामाक्षीं करुणारसार्द्रहृदयां कल्पान्तरस्थायिनीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ८ ॥

गायत्रीं गरुडध्वजां गगनगां गान्धर्वगानप्रियां
गंभीरां गजगामिनीं गिरिसुतां गन्धाक्षतालंकृताम् ।
गंगागौतमगर्गसन्नुतपदां गां गौतमीं गोमतीं
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ९ ॥

***

९. अम्बास्तोत्रं

(स्वामि विवेकानन्दकृतं)

का त्वं शुभे शिवकरे सुखदुःखहस्ते
आघूर्णितं भवजलं प्रबलोर्मिभङ्गैः ।
शान्तिं विधातुमिह किं बहुधा विभग्नाम्
मातः प्रयत्नपरमासि सदैव विश्वे ॥ १ ॥

संपादयन्त्यविरतं त्वविरामवृत्ता
या वै स्थिता कृतफलं त्वकृतस्य नेत्री ।
सा मे भवत्वनुदिनं वरदा भवानी
जानाम्यहं ध्रुवमियं धृतकर्मपाशा ॥ २ ॥

किं वा कृतं किमकृतं क्व कपाललेखः
किं कर्म वा फलमिहास्ति हि यां विना भोः ।
इच्छागुणैर्नियमिता नियमः स्वतन्त्रैः
यस्याः सदा भवतु सा शरणं ममाद्या ॥ ३ ॥

सन्तानयन्ति जलधिं जनिमृत्युजालं
संभावयन्त्यविकृतं विकृतं विभग्नम् ।
यस्याः विभूतयः इहामितशक्तिपालाः
नाश्रित्य तां वद कुतः शरणं व्रजामः ॥ ४ ॥

मित्रे रिपौ त्वविषमं तव पद्मनेत्रम्
स्वस्थेऽसुखे त्वविततथस्तव हस्तपातः ।
छाया मृतेस्तव दयात्वमृतं च मातः
मुञ्चन्तु मां न परमे शुभदृष्टयस्ते ॥ ५ ॥

क्वाम्बा शिवा क्व गृणनं मम हीनबुद्धेः
दोर्भ्यां विधर्तुमिव यामि जगद्विधात्रीम् ।
चिन्त्यं श्रिया सुचरणं त्वभयप्रतिष्ठं
सेवापरैरभिनुतं शरणं प्रपद्ये ॥ ६ ॥

या मा चिराय विनयत्यतिदुःखमार्गैः
आसिद्धितः स्वकलितैर्ललितैर्विलासैः ।
या मे मतिं सुविदधे सततं धरण्याम्
साम्बा शिवा मम गतिः सफलेऽफले वा ॥ ७ ॥

***

१०. मीनाक्षीपञ्चरत्नम्

(श्री शंकराचार्यकृतम्)

उद्यद्भानुसहस्रकोटिसदृशां केयूरहारोज्ज्वलां
बिम्बोष्ठीं स्मितदन्तपङ्क्तिरुचिरां पीताम्बरालङ्कृताम् ।
विष्णुब्रह्मसुरेन्द्रसेवितपदां तत्वस्वरूपां शिवां
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्य वारांनिधिम् ॥ १ ॥

मुक्ताहारलसत्किरीटरुचिरां पूर्णेन्दुवक्त्रप्रभां
शिञ्जन्नूपुरकिङ्किणीमणिधरां पद्मप्रभाभासुराम् ।
सर्वाभीष्टफलप्रदां गिरिसुतां वाणीरमासेवितां
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्य वारांनिधिम् ॥ २ ॥

श्रीविद्यां शिववामभागनिलयां ह्रीङ्कारमन्त्रोज्ज्वलां
श्रीचक्राङ्कितबिन्दुमध्यवसतिं श्रीमत्सभानायिकाम् ।
श्रीमत्षण्मुखविघ्नराजजननीं श्रीमज्जगन्मोहिनीं
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्य वारांनिधिम् ॥ ३ ॥

श्रीमत्सुन्दरनायिकां भयहरां ज्ञानाप्रदां निर्मलां
श्यामाभां कमलासनार्चितपदां नारायणस्यानुजाम् ।
वीणावेणुमृदङ्गवाद्यरसिकां नानाविधाम्बिकां
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्य वारांनिधिम् ॥ ४ ॥

नानायोगिमुनीन्द्रहृत्सुवसतिं नानार्थसिद्धिप्रदां
नानापुष्पविराजिताङ्घ्रियुगलां नारायणेनार्चिताम् ।
नादब्रह्ममयीं परात्परतरां नानार्थतत्वात्मिकां
मीनाक्षीं प्रणतोस्मि सन्ततमहं कारुण्य वारांनिधिम् ॥ ५ ॥

***

११. श्रीमीनाक्षीमणिमालाष्टकम्

मधुरापुरि नायिके नमस्ते मधुरालापिशुकाभिरामहस्ते ।
मलयध्वजपाण्ड्यराजकन्ये मयि मीनाक्षि कृपां विधेहि धन्ये ॥ १ ॥

कचनिर्जितकालमेघकान्ते कमलासेवितपादपङ्कजान्ते ।
मधुरापुरवल्लभेष्टकान्ते मयि मीनाक्षि दयां विधेहि शान्ते ॥ २ ॥

कुचयुग्मविधूतचक्रवाके कृपयापालितसर्वजीवलोके ।
मलयध्वजसन्ततेः पताके मयि मीनाक्षि कृपां निधेहि पाके ॥ ३ ॥

विधिवाहनजेतृकेलियाने विमतामोटनपूजितापदाने ।
मधुरेक्षणभावभूतमीने मयि मीनाक्षि कृपां विधेहि दीने ॥ ४ ॥

तपनीयपयोजिनीतटस्थे तुहिनप्रायमहीधरोदरस्थे ।
मदनारिपरिग्रहे कृतार्थे मयि मीनाक्षि कृपां निधेहि सार्थे ॥ ५ ॥

कलकीरकलोक्तिनाददक्षे कलितानेकजगन्निवासिरक्षे ।
मदनाशुगहल्लकान्तपाणे मयि मीनाक्षि कृपां कुरु प्रवीणे ॥ ६ ॥

मधुवैरिविरिञ्चिमुख्यसेव्ये मनसा भावितचन्द्रमौलिसव्ये ।
तरसा परिपूरितयज्ञहव्ये मयि मीनाक्षि कृपां विधेहि भव्ये ॥ ७ ॥

जगदम्ब कदम्बमूलवासे कमलामोदमुखेन्दुमन्दहासे ।
मदमन्दिरहारिदृग्विलासे मयि मीनाक्षि कृपां विधेहि दासे ॥ ८ ॥

पठतामनिशं प्रभातकाले मणिमालाष्टकमष्टभूतिदायी ।
घटिकाशतचातुरीं प्रदद्यात् करुणापूर्णकटाक्षसन्निवेशात् ॥ ९ ॥

***

१२. श्रीकामाक्षीस्तोत्रम्

कामाक्षिमातर्नमस्ते कामदानैकदक्षे स्थिते भक्तपक्षे

कामारिकान्ते कुमारि कालकालस्य भर्तुः करे दत्तहस्ते ।
कामाय कामप्रदात्रि कामकोटिस्थपूज्ये गिरं देहि मह्यम् ॥ १ ॥
कामाक्षिमातर्नमस्ते कामदानैकदक्षे स्थिते भक्तपक्षे

श्रीचक्रमध्येवसन्तीं भूतरक्षः पिशाचातिदुष्टान् हरन्तीम् ।
श्रीकामकोट्यां ज्वलन्तीं कामहीनैस्सुगम्यां भजे देहि वाचं ॥ २ ॥
कामाक्षिमातर्नमस्ते कामदानैकदक्षे स्थिते भक्तपक्षे

इन्द्रादिमान्ये सुधन्ये ब्रह्मविष्ण्वादिवन्द्ये गिरीन्द्रस्य कन्ये ।
मान्यां न मन्ये त्वदन्यं मानिताङ्घ्रिं मुनीन्द्रैः भजे मातरं त्वाम् ॥ ३ ॥
कामाक्षिमातर्नमस्ते कामदानैकदक्षे स्थिते भक्तपक्षे

सिंहाधिरूढे नमस्ते साधुहृत्पद्मगूढे हताशेषमूढे ।

रूढं हर त्वं गदं मे कण्ठशब्दं दृढं देहि वाग्वादिनि त्वं ॥ ४ ॥
कामाक्षिमातर्नमस्ते कामदानैकदक्षे स्थिते भक्तपक्षे

कल्याणदात्रीं जनित्रीं कञ्जपत्राभनेत्रां कलानाथवक्त्रां ।
श्री स्कन्दपुत्रां सुवस्त्रां सच्चरित्रां शिवे त्वां भजे देहि वाचम् ॥ ५ ॥
कामाक्षिमातर्नमस्ते कामदानैकदक्षे स्थिते भक्तपक्षे

चन्द्रापीडां चतुरवदनां चञ्चलापाङ्गलीलां
कुन्दस्मेरां कुचभरनतां कुन्तलोद्धूतभृंगाम् ।
मारारातेर्मदनशिखिनं मांसलं दीपयन्तीं
कामाक्षीं तां कविकुलगिरां कल्पवल्लीमुपासे ॥ ६ ॥

***

१३. आपदुन्मूलनदुर्गास्तोत्रम्

लक्ष्मीशे योगनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पा–
दुत्पन्नौ दानवौ तच्छ्रवणमलमयाङ्गौ मधुं कैटभं च ।
दृष्ट्वा भीतस्य धातुः स्तुतिभिरभिनुतां आशु तौ नाशयन्तीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ १ ॥

युद्धे निर्जित्य दैत्यस्त्रिभुवनमखिलं यस्तदीय धिष्ण्ये–
ष्वास्थाप्य स्वान् विधेयान् स्वयमगमदसौ शक्रतां विक्रमेण ।
तं सामात्याप्तमित्रं महिषमभिनिहत्यास्यमूर्धाधिरूढां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ २ ॥

विश्वोत्पत्तिप्रणाशस्थितिविहृतिपरे देवि घोरामरारि–
त्रासात् त्रातुं कुलं नः पुनरपि च महासङ्कटेष्वीदृशेषु ।
आविर्भूयाः पुरस्तादिति चरणनमत् सर्वगीर्वाण वर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ३ ॥

हन्तुं शुंभं निशुंभं विबुधगणनुतां हेमडोलां हिमाद्रा–

वारूढां व्यूढदर्पान् युधि निहतवतीं धूम्रदृक् चण्डमुण्डान् ।
चामुण्डाख्यां दधानां उपशमितमहारक्तबीजोपसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ४ ॥

ब्रह्मेशस्कन्दनारायणकिटिनरसिंहेन्द्रशक्तीः स्वभृत्याः
कृत्वा हत्वा निशुंभं जितविबुधगणं त्रासिताशेषलोकम् ।
एकीभूयाथ शुंभं रणशिरसि निहत्यास्थितां आत्तखड्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ५ ॥

उत्पन्ना नन्दजेति स्वयमवनितले शुंभमन्यं निशुंभं
भ्रामर्याख्याऽरुणाख्या पुनरपि जननी दुर्गमाख्यं निहन्तुम् ।
भीमा शाकंभरीति त्रुटितरिपुभटां रक्तदन्तेति जातां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ६ ॥

त्रैगुण्यानां गुणानां अनुसरणकलाकेलि नानावतारैः
त्रैलोक्यत्राणशीलां दनुजकुलवनी वह्निलीलां सलीलाम् ।
देवीं सच्चिन्मयीं तां वितरितविनमत्सत्रिवर्गापवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ७ ॥

सिंहारूढां त्रिनेत्रां करतलविलसत् शंखचक्रासिरम्यां
भक्ताभीष्टप्रदात्रीं रिपुमथनकरीं सर्वलोकैकवन्द्याम् ।
सर्वालङ्कारयुक्तां शशियुतमकुटां श्यामलाङ्गीं कृशाङ्गीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ८ ॥

त्रायस्वस्वामिनीति त्रिभुवनजननि प्रार्थना त्वय्यपार्था
पाल्यन्तेऽभ्यर्थनायां भगवति शिशवः किन्त्वनन्याः जनन्या ।
तत्तुभ्यं स्यान्नमस्येत्यवनतविबुधाह्लादिवीक्षाविसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ९ ॥

एतं सन्तः पठन्तु स्तवमखिलविपज्जालतूलानलाभं

हृन्मोहध्वान्तभानुप्रतिममखिलसङ्कल्पकल्पद्रुकल्पम् ।
दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमंहोगजेन्द्र–
श्रेणीपञ्चास्यदेश्यं विपुलभयदकालाहिताक्ष्यप्रभावम् ॥ १० ॥

***

१४. श्रीदेवीमङ्गलाष्टकम्

कनत्कनकताटङ्कविलसन्मुखपङ्कजे ।
कारुण्यवारिधे त्वं मे सन्ततं मङ्गलं कुरु ॥ १ ॥

खण्डिताखिलदैतेये खर्वशून्यास्त्रवैभवे ।
गिरिराजसुते देवि सन्ततं मङ्गलं कुरु ॥ २ ॥

घनराजिनिभाखर्वसुगन्धिकुटिलालके ।
चण्डमुण्डादिदर्पघ्नि सन्ततं मङ्गलं कुरु ॥ ३ ॥

छत्रीकृतयशोराशे छेदिताखिलपातके ।
जगदाधारसन्मूर्ते सन्ततं मङ्गलं कुरु ॥ ४ ॥

तत्वमस्यादिलक्ष्यार्थे तापत्रयविभंजिनि ।
दण्डनीतिस्थिते देवि सन्ततं मङ्गलं कुरु ॥ ५ ॥

धराधरसुते देवि धनधान्यविवर्धनि ।
दयमानासितापाङ्गे सन्ततं मङ्गलं कुरु ॥ ६ ॥

पञ्चप्रेतासनासीने पञ्चसंख्योपचारिणि ।
परमानन्दनिलये सन्ततं मङ्गलं कुरु ॥ ७ ॥

अकारादिक्षकारन्त वर्णरूपे महेश्वरि ।
अविद्यामूलविच्छेत्रि सन्ततं मङ्गलं कुरु ॥ ८ ॥

मंगलाष्टकमेतद्वै यः पठेत् भक्तिसंयुतः ।
आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिकं लभेत् ॥ ९ ॥

***

१५. श्रीमंत्रमातृकापुष्पमालास्तवः

(श्रीशंकराचार्यकृतं)

कल्लोलोल्लसितामृताब्धिलहरीमध्येविराजन्मणि–
द्वीपे कल्पकवाटिका परिवृते कादम्बवाट्युज्ज्वले ।
रत्नस्तंभसहस्रनिर्मितसभामध्ये विमानोत्तमे
चिन्तारत्न विनिर्मितं जननि ते सिंहासनं भावये ॥ १ ॥

एणाङ्कानलभानुमण्डललसत् श्रीचक्रमध्येस्थितां
बालार्कद्युतिभासुरां करतलैः पाशाङ्कुशौ बिभ्रतीम् ।
चापं बाणमपि प्रसन्नवदनां कौसुम्भवस्त्रान्वितां
तां त्वां चन्द्रकलावतंसमकुटां चारुस्मितां भावये ॥ २ ॥

ईशानादिपदं शिवैकफलकं रत्नासनं ते शुभं
पाद्यं कुङ्कुमचन्दनादिभरितैरर्घ्यं सरत्नाक्षतैः ।
शुद्धैराचमनीयकं तव जलैर्भक्त्या मया कल्पितं
कारुण्यामृतवारिधे तदखिलं सन्तुष्टये कल्पताम् ॥ ३ ॥

लक्ष्ये योगिजनस्य रक्षितजगज्जाले विशालेक्षणे
प्रालेयांबु पटीरकुङ्कुमलसत् कर्पूरमिश्रोदकैः ।
गोक्षीरैरपि नारिकेलसलिलैः शुद्धोदकैर्मन्त्रितैः
स्नानं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ॥ ४ ॥

ह्रीङ्काराङ्कितमन्त्रलक्षिततनो हेमाचलात्संचितैः
रत्नैरुज्ज्वलमुत्तरीयसहितं कौसुंभवर्णांशुकम् ।
मुक्तासन्तति यज्ञसूत्रममलं सौवर्णतन्तूद्भवं
दत्तं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ॥ ६ ॥

हंसैरप्यतिलोभनीयगमने हारावलीमुज्ज्वलां
हिन्दोलद्युतिहीरपूरिततरे हेमाङ्गदे कङ्कणे ।
मंजीरौ मणिकुण्डले मकुटमप्यर्धेन्दुचूडामणिं
नासामौक्तिकमङ्गुलीयकटकौ कञ्चीमपि स्वीकुरु ॥ ७ ॥

सर्वाङ्गे घनसारकुङ्कुमलसत् श्रीगन्धपङ्काङ्कितं
कस्तूरीतिलकं च फालफलके गोरोचनापत्रकम् ।
गण्डादर्शनमण्डले नयनयोर्दिव्याञ्जनं तेऽञ्चितं
कण्ठाब्जे मृगनाभिपङ्कममलं त्वत्प्रीतये कल्पताम् ॥ ८ ॥

कल्हारोत्पलमल्लिकामरुवकैः सौवर्णपङ्केरुहैः
जातीचंपकमालतीवकुलकैः मन्दारकुन्दादिभिः ।
केतक्या करवीरकैर्बहुविधैः क्लृप्ताः स्रजोमालिकाः
सङ्कल्पेन समर्पयामि वरदे संतुष्टये गृह्यताम् ॥ ९ ॥

हन्तारं मदनस्य नन्दयसियैरङ्गैरनंगोज्ज्वलैः
यैर्भृङ्गावलिनीलकुन्तलभरैः बद्ध्नासि तस्याशयम् ।
तानीमानि तवाम्ब कोमलतराण्यामोदलीलागृहा–
ण्यामोदाय दशाङ्गगुग्गुलुकृतैः धूपैरहं धूपये ॥ १० ॥

लक्षीमुज्ज्वलयामि रत्ननिवहोद्भास्वत्तरे मन्दिरे
मालारूपविलम्बितैर्मणिमयस्तम्भेषु सम्भावितैः ।
चित्रैर्हाटकपुत्रिकाकरधृतैः गव्यैर्घृतैवर्धितैः
दिव्यैर्दीपगणैर्धिया गिरिसुते संतुष्टये कल्पताम् ॥ ११ ॥

ह्रीङ्कारेश्वरि तप्तहाटककृतैः स्थालीसहस्रैर्भृतं
दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदं तथा ।
शाल्यन्नं मधुशर्करादधियुतं माणिक्यपात्रेस्थितम्
माषापूपसहस्रमम्बसफलं नैवेद्यमावेदये ॥ १२ ॥

सच्छायैर्वरकेतकीदलरुचा ताम्बूलवल्लीदलैः
पूगैर्भूरिगुणैर्सुगन्धिमधुरैः कर्पूरखण्डोज्ज्वलैः ।
मुक्ताचूर्णविराजितैर्बहुविधैः वक्त्राम्बुजामोदनैः
पूर्णा रत्नकलाचिका तव मुदे न्यस्ता पुरस्तादुमे ॥ १३ ॥

कन्याभिः कमनीयकान्तिभिरलङ्कारामलारार्तिका
पात्रे मौक्तिकचित्रपंक्तिविलसत् कर्पूरदीपालिभिः ।
तत्तत्तालमृदङ्गगीतसहितं नृत्यत्पदाम्भोरुहम्
मन्त्राराधनपूर्वकं सुविहितं नीराजनं गृह्यताम् ॥ १४ ॥

लक्ष्मीर्मौक्तिकलक्षकल्पितसितच्छत्रं तु धत्ते रसात्
इन्द्राणी च रतिश्च चामरवरे धत्ते स्वयं भारती ।
वीणामेणविलोचनाः सुमनसां नृत्यन्ति तद्रागवद्
भावैरङ्गिकसात्विकैः स्फुटरसं मातस्तदाकर्ण्यताम् ॥ १५ ॥

ह्रीङ्कारत्रयसंपुटेन मनुनोपास्ये त्रयीमौलिभिर्–
वाक्यैर्लक्ष्यतनो तवस्तुतिविधौ को वा क्षमेताम्बिके ।
सल्लापाः स्तुतयः प्रदक्षिणशतं सञ्चार एवास्तुते
संवेशो नमनः सहस्रमखिलं त्वत्प्रीतये कल्पताम् ॥ १६ ॥

श्रीमन्त्राक्षरमालया गिरिसुतां यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं सुनियतस्तस्यामलं स्यान्मनः ।
चित्तांभोरुहमण्डपे गिरिसुता नृत्तं विधत्ते रसात्
वाणी वक्त्र सरोरुहे जलधिजा गेहे जगन्मङ्गला ॥ १७ ॥

इति गिरिवरपुत्री पादरजीवभूषा
भुवनममलयन्ती सूक्तिसौरभ्यसारैः ।
शिवपदमकरन्दस्यन्दिनीयं निबद्धा
मदयतु कविभृङ्गान् मातृकापुष्पमाला ॥ १८ ॥

***

१६. गौरीदशकम्

(श्री शङ्कराचार्यकृतम्)

लीलालब्धस्थापितलुप्ताखिललोकां
लोकातीतैर्योगिभिरन्तश्चिरमृग्याम् ।
बालादित्यश्रेणिसमानद्युतिपुञ्जां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ १ ॥

अशापाशक्लेशविनाशं विदधानां
पादांभोजध्यानपराणां पुरुषाणाम् ।
ईशामीशार्धाङ्गहरां तामभिरामां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ २ ॥

नानाकारैश्शक्तिकदम्बैर्भुवानानि
व्याप्य स्वैरं क्रीडति येयं स्वयमेका ।
कल्याणीं तां कल्पलतामानतिभाजां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ३ ॥

मूलाधारादुत्थितरीत्या विधिरन्ध्रं
सौरं चान्द्रं व्याप्य विहारज्वलितांगीम् ।
येयं सूक्ष्मात् सूक्ष्मतनुस्तां सुखरूपां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ४ ॥

यस्यामोतं प्रोतमशेषं मणिमाला–
सूत्रे यद्वत् क्वापि चरं चाप्यचरं च ।
तामध्यात्मज्ञानपदव्या गमनीयां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ५ ॥

प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्यं चित्ते निर्वृतिकाष्ठां कलयन्तीम् ।

सत्यज्ञानानन्दमयीं तां तनुमध्यां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ६ ॥

चन्द्रापीडानन्दितमन्दस्मितवक्त्रां
चन्द्रापीडालंकृतनीलालकभाराम् ।
इन्द्रोपेन्द्रार्चितपादांबुजयुग्मां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ७ ॥

आदिक्षान्तामक्षरमूर्त्या विलसन्तीं
भूते भूते भूतकदम्बप्रसवित्रीम् ।
शब्दब्रह्मानन्दमयीं तां तडिदाभां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ८ ॥

यस्याः कुक्षौ लीनमखण्डं जगदण्डं
भूयो भूयः प्रादुरभूदुत्थितमेव ।
पत्या सार्धं राजतशैले विहरन्तीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ ९ ॥

नित्यः शुद्धो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ संहरेण च ।
विश्वत्राणक्रीडनलोलां शिवपत्नीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ॥ १० ॥

प्रातःकाले भावविशुद्धिं विदधानो
भक्त्या नित्यं जल्पति गौरीदशकं यः ।
वाचां सिद्धिं संपदमुच्चैश्शिवभक्तिं
तस्यावश्यं पर्वतपुत्री विदधाति ॥ ११ ॥

***

१७. देवीभुजङ्गस्तोत्रम्

(श्री शंकराचार्यकृतम्)

विरिञ्च्यादिभिः पञ्चभिर्लोकपालैः
समूढे महानन्दपीठे निषण्णम् ।
धनुर्बाणपाशाङ्कुशप्रोतहस्तं
महस्त्रैपुरं शंकराद्वैतमव्यात् ॥ १ ॥

यदन्नादिभिः पञ्चभिः कोशजालैः
शिरः पक्षपुच्छात्मकैरन्तरन्तः ।
निगूढे महायोगपीठे निषण्णं
पुरारेरथान्तःपुरं नौमि नित्यम् ॥ २ ॥

विनोदाय चैतन्यमेकं विभज्य
द्विधा देवि जीवः शिवश्चेति नाम्ना ।
शिवस्यापि जीवत्वमापादयन्ती
पुनर्जीवमेनं शिवं वा करोषि ॥ ३ ॥

समाकुञ्च्य मूलं हृदि न्यस्य वायुं
मनो भ्रूबिलं प्रापयित्वा निवृत्ताः ।
ततः सच्चिदानन्दरूपे पदे ते
भवत्यंब जीवाः शिवत्वेन केचित् ॥ ४ ॥

शरीरेऽतिकष्टे रिपौ पुत्रवर्गे
सदाभीतिमूले कलत्रे धने वा ।
न कश्चिद्विरज्यत्यहो देवि चित्रं
कथं त्वत् कटाक्षं विना तत्वबोधः ॥ ५ ॥

शरीरे धनेऽपत्यवर्गे कलत्रे
विरक्तस्य सद्देशिकादिष्टबुद्धेः ।
यदाकस्मिकं ज्योतिरानन्दरूपं
समाधौ भवेत्तत्त्वमस्यम्ब सत्यम् ॥ ६ ॥

मृषान्यो मृषान्यः परो मिश्रमेनं
परः प्राकृतं चापरो बिद्धिमात्रम् ।
प्रपञ्चं मिमीते मुनीनां गणोऽयं
तदेतत्त्वमेवेति न त्वां जहीमः ॥ ७ ॥

कीर्तिः प्रतिष्ठा च विद्या च शान्ति–
स्तथा शान्त्यतीतेति पञ्चीकृताभिः ।
कलाभिः परैः पञ्चविंशात्मकाभि–
स्त्वमेकैव सेव्या शिवाभिन्नरूपा ॥ ८ ॥

अगाधेऽत्र संसारपङ्के निमग्नं
कलत्रादिभारेण खिन्नं नितान्तम् ।
महामोहपाशौघबद्धं चिरान्मां
समुद्धर्तुमम्ब त्वमेकैव शक्ता ॥ ९ ॥

गणेशैर्ग्रहैरम्ब नक्षत्रपङ्क्त्या
तथा योगिनीराशिपीठैरभिन्नम् ।
महाकालमात्मानमामृश्य लोकं
विधत्से कृतिं वा स्थितिं वा महेशि ॥ १० ॥

लसत्तारहारामतिस्वच्छचेलां
वहन्तीं करे पुस्तकं चाक्षमालाम् ।
शरच्चन्द्रकोटिप्रभाभासुरां त्वां
सकृद्भावयन् भारतीवल्लभः स्यात् ॥ ११ ॥

समुद्यत्सहस्रार्कबिम्बाभवक्त्रां
स्वभासैवसिन्दूरिताजाण्डकोटिम् ।
धनुर्बाणपाशाङ्कुशान् धारयन्तीं
स्मरन्तः स्मरं चापि सम्मोहयेयुः ॥ १२ ॥

मणिस्यूततताटङ्कशोणास्यबिम्बां
तडित्पीतवस्त्रां त्वगुल्लासिभूषाम् ।
सदा भावयन् तप्तहेमप्रभां त्वां
श्रियो नाशयत्यम्ब चाञ्चल्यभावम् ॥ १३ ॥

महामन्त्रराजान्तबीजं पराख्यं
स्वतो न्यस्तबिन्दुं स्वयं न्यस्त हार्दम् ।
भवद्वक्त्रवक्षोजगुह्याभिधानं
स्वरूपं सकृद्भावयेत्सत्वमेव ॥ १४ ॥

तथान्ये विकल्पेषु निर्विण्णचित्ताः
तदेवं समाधाय बिन्दुत्रयं ते ।
परानन्दसंधानसिन्धौ निमग्नाः
पुनर्गर्भरन्ध्रं न पश्यन्ति धीराः ॥ १५ ॥

त्वदुन्मेषलीलानुबन्धाधिकारान्
विरिञ्च्यादिकांस्त्वद्गुणाम्भोधिबिन्दून् ।
भजन्तस्तितीर्षन्ति संसारसिन्धुं
शिवे तावकानां सुसम्भावनेयम् ॥ १६ ॥

कदा वा भवत्पादपोतेन तूर्णं
भवाम्भोधिमुत्तीर्य पूर्णान्तरङ्गः ।
निमज्जन्तमेनं दुराशाविषाब्धौ
समालोक्य लोकं कथं पर्युदास्से ॥ १७ ॥

कदा वा हृषीकाणि साम्यं भजेयुः
कदा वा न शत्रुर्न मित्रं भवानि ।
कदा वा दुराशा विषूची विलोपः
कदा वा मनो मे समूलं विनश्येत् ॥ १८ ॥

नमोवाकमाशास्महे देवि युष्मत्–

पदाम्भोजयुग्माय तिग्माय गौरि ।
विरिञ्च्यादिभास्वत्किरीटप्रतोली–
प्रदीपप्रतानप्रभाभास्वराय ॥ १९ ॥

कचे चन्द्ररेखं कुचे तारहारं
करे स्वादु चापं शरे षट्पदौघम् ।
स्मरामि स्मरारेरभिप्रायमेकं
मदाघूर्णनेत्रं मदीयं निधानम् ॥ २० ॥

शरेष्वेव नासा धनुष्वेव जिह्वा
जपापाटले लोचने ते स्वरूपे ।
त्वगेष भवच्चन्द्रखण्डे श्रवो मे
गुणे ते मनोवृतिरम्ब त्वयि स्यात् ॥ २१ ॥

जगत्कर्मधीरान् वचोधूतकीरान्
कुचन्यस्तहारान् कृपासिन्धुपूरान ।
भवाम्भोदिपारान् महापापदूरान्
भजे वेदसारान् शिवप्रेमदारान् ॥ २२ ॥

सुधासिन्धुसारे चिदानन्दनीरे
समुत्फुल्लनीपे सुरत्नान्तरीप ।
मणिव्यूहसाले स्थिते हैमशाले
मनोजारिवामे निषण्णं मनो मे ॥ २३ ॥

दृगन्ते विलोला सुगन्धीषुमाला
प्रपञ्चेन्द्रजाला विपत्सिन्धुकूला ।
मुनिस्वान्तशाला नमल्लोकपाला
हृदि प्रेमलोलाऽमृतस्वादुलीला ॥ २४ ॥

जगज्जालमेतत्त्वयैवाम्ब सृष्टं
त्वमेवाददासीन्द्रियैरर्थजालम् ।

त्वमेकैवकर्त्री त्वमेकैवभोक्त्री
न मे पुण्यपापे न मे बन्धमोक्षौ ॥ २५ ॥

इति प्रेमभारेण किञ्चिन्मयोक्तं
न बुद्ध्वैव तत्त्वं मदीयं त्वदीयम् ।
विनोदाय बालस्य मौर्ख्यं हि मातः
तदेतत् प्रलापस्तुतिं मे गृहाण ॥ २६ ॥

***

१८. नवरत्नमालिका

(श्रीशंकराचार्यकृतम्)

हारनूपरकिरीटकुण्डलविभूषितावयवशोभिनीं
कारणेशवरमौलिकोटिपरिकल्प्यमानपदपीठिकाम् ।
कालकालफणिपाशबाणधनुरङ्कुशामरुणमेखलां
फालभूतिलकलोचनां मनसि भावयामि परदेवताम् ॥ १ ॥

गन्धसारघनसारचारुनवनागवल्लिरसवासिनीं
सान्ध्यरागमधुराधराभरणसुन्दराननशुचिस्मिताम् ।
मन्धरायतविलोचनाममलबालचन्द्रकृतशेखरीं
इन्दिरारमणसोदरीं मनसि भावयामि परदेवताम् ॥ २ ॥
स्मेरचारुमुखमण्डलां विमलगण्डलम्बिमणिमण्डलां
हारदामपरिशोभमानकुचभारभीरुतनुमध्यमाम् ।
वीरगर्वहरनूपुरां विविधकारणेशवरपीठिकां
मारवैरिसहचारिणीं मनसि भावयामि परदेवताम् ॥ ३ ॥

भूरिभारधरकुण्डलीन्द्रमणिबद्धभूवलयपीठिकां
वारिराशिमणिमेखलावलयवह्निमण्डलशरीरिणीम् ।
वारिसारवहकुण्डलां गगनशेखरीं च परात्मिकां
चारुचन्द्रविलोचनां मनसि भावयामि परदेवताम् ॥ ४ ॥

कुण्डलत्रिविधकोणमण्डलविहारषड्दलसमुल्लसत्–
पुण्डरीकमुखभेदिनीं तरुणचण्डभानुतडिदुज्ज्वलाम् ।
मण्डलेन्दुपरिवाहितामृततरङ्गिणीमरुणरूपिणीं
मण्डलान्तमणिदीपिकां मनसि भावयामि परदेवताम् ॥ ५ ॥

वारणाननमयूरवाहमुखदाहवारणपयोधरां
चारणादिसुरसुन्दरीचिकुरशेखरीकृतपदांबुजाम् ।
कारणाधिपतिपञ्चकप्रकृतिकारणप्रथममातृकां
वारणान्तमुखपारणां मनसि भावयामि परदेवताम् ॥ ६ ॥

पद्मकान्तिपदपाणिपल्लवपयोधराननसरोरुहां
पद्मरागमणिमेखलावलयनीविशोभितनितम्बिनीम् ।
पद्मसम्भवसदाशिवान्तमयपञ्चरत्नपदपीठिकां
पद्मिनीं प्रणवरूपिणीं मनसि भावयामि परदेवताम् ॥ ७ ॥

आगमप्रणवपीठिकाममलवर्णमंगलशरीरिणीं
आगमावयवशोभिनीमखिलवेदसारकृतशेखरीम् ।
मूलमन्त्रमुखमण्डलां मुदितनादबिन्दुनवयौवनां
मातृकां त्रिपुरसुन्दरीं मनसि भावयामि परदेवताम् ॥ ८ ॥

कालिकातिमिरकुन्तलान्तघनभृङ्गमङ्गलविराजिनीं
चूलिकाशिखरमालिकावलयमल्लिकासुरभिसौरभाम् ।
वालिकामधुरगण्डमण्डलमनोहराननसरोरुहाम्
कालिकामखिलनायिकां मनसि भावयामि परदेवताम् ॥ ९ ॥

नित्यमेव नियमेन जपतां
भुक्तिमुक्तिफलदामभीष्टदाम् ।
शंकरेण रचितां सदा जपे–
न्नामरत्ननवरत्नमालिकाम् ॥ १० ॥

१९. भवानीभुजङ्गम्

षडाधारपङ्केरुहान्तर्विराजत्
सुषुम्नान्तरालेऽतितेजोल्लसन्तीम् ।
सुधामण्डलं द्रावयन्तीं पिबन्तीं
सुधामूर्तिमीडे चिदानन्दरूपाम् ॥ १ ॥

ज्वलत्कोटिबालार्कभासारुणांगीं
सलावण्यशृंगारशोभाभिरामाम् ।
महापद्मकिञ्जल्कमध्येविराजत्
त्रिकोणे निषण्णां भजे श्री भवानीम् ॥ २ ॥

क्वणत्किङ्किणीनूपुरोद्भासिरत्न–
प्रभालीढलाक्षार्द्रपादाब्जयुग्मम् ।
अजेशाच्युताद्यैः सुरैः सेव्यमानं
महादेवि मन्मूर्ध्नि ते भावयामि ॥ ३ ॥

सुशोणाम्बराबद्धनीवीविराज–
न्महारत्नकाञ्चीकलापं नितम्बम् ।

स्फुरद्दक्षिणावर्तनाभिं च तिस्रो
वलीरम्ब ते रोमराजीं भजेऽहम् ॥ ४ ॥

लसद्वृत्तमुत्तुङ्गमाणिक्यकुंभो–
पमश्री स्तनद्वन्द्वमम्बाम्बुजाक्षि ।
भजे दुग्धपूर्णाभिरामं तवेदं
महाहारदीप्तं सदा प्रस्नुतास्यम् ॥ ५ ॥

शिरीषप्रसूनोल्लसद्बाहुदन्डैर्–
ज्वलद्बाणकोदण्डपाशाङ्कुशैश्च ।
चलत्कङ्कणोदारकेयूरभूषो–
ज्ज्वलद्विर्लसन्तीं भजे श्री भवानीम् ॥ ६ ॥

शरत्पूर्णचन्द्रप्रभापूर्णबिम्बा–
धरस्मेरवक्त्रारविन्दां सुशान्ताम् ।
सुरत्नावलीहारताटङ्कशोभां
महासुप्रसन्नां भजे श्री भवानीम् ॥ ७ ॥

सुनासापुटं सुन्दरभ्रूललाटं
तवौष्ठश्रियं दानदक्षं कटाक्षम् ।
ललाटे लसद्गन्धकस्तूरिभूषं
स्फुरच्छ्रीमुखाम्भोजमीड्ये ऽहमम्ब ॥ ८ ॥

चलत्कुन्तलान्तर्भ्रमत्भृङ्गबृन्दं
घनस्निग्द्धधम्मिल्लभूषोज्ज्वलं ते ।
स्फुरन्मौलिमाणिक्यबद्धेन्दुरेखा–
विलासोल्लसद्दिव्यमूर्धानमीडे ॥ ९ ॥

इति श्रीभवानी स्वरूपं तवेदं
प्रपञ्चात्परं चातिसूक्ष्मं प्रसन्नम् ।
स्फुरत्वम्ब डिंभस्य मे हृत्सरोजे
सदा वाङ्मयं सर्वतेजोमयं च ॥ १० ॥

गणेशाभिमुख्याखिलैः शक्तिवृन्दैर्–
वृतां वै स्फुरच्चक्रराजोल्लसन्तीम् ।
परां राजराजेश्वरि त्रैपुरि त्वां
शिवाङ्कोपरिस्थां शिवां भावयामि ॥ ११ ॥

त्वमर्कस्त्वमिन्दुस्त्वमग्निस्त्वमाप–
स्त्वमाकाशभूवायवस्त्वं महत्त्वम् ।
त्वदन्यो न कश्चित्प्रपञ्चोऽस्ति सर्वं
त्वामानन्दसंवित्स्वरूपां भजेऽहम् ॥ १२ ॥

श्रुतीनामगम्ये सुवेदागमज्ञा
महिम्नो न जानन्ति पारं तवाम्ब ।
स्तुतिं कर्तुमिच्छामि ते त्वं भवानि
क्षमस्वेदमत्र प्रमुग्द्धः किलाहम् ॥ १३ ॥

गुरुस्त्वं शिवस्त्वं च शक्तिस्त्वमेव
त्वमेवासिमाता पिता च त्वमेव ।
त्वमेवासि विद्या त्वमेवासि बन्धुर्–
गतिर्मे मतिर्देवि सर्वं त्वमेव ॥ १४ ॥

इतीमां महच्छ्रीभवानीभुजंगं
स्तुतिं यः पठेद्भक्तियुक्तश्च तस्मै ।
स्वकीयं पदं शाश्वतं वेदसारं
श्रियं चाष्टसिद्धिं भवानी ददाति ॥ १५ ॥

भवानी भवानी भवानी त्रिवार–
मुदारं मुदा सर्वदा ये जपन्ति ।
न शोकं न मोहं न पापं न भीतिः
कदाचित् कथंचित् कुतश्चिज्जनानाम् ॥ १६ ॥

***

२०. अन्नपूर्णास्तोत्रम्
(श्री शंकराचार्यकृतम्)

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपापनिकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १ ॥

नानारत्नविचित्र भूषणकरी हेमाम्बराडम्बरी
मुक्ताहार–विलम्बमान–विलसद्–वक्षोजकुम्भान्तरी ।
काश्मीरगरुवासितारुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ २ ॥

योगानन्दकरी रिपुक्षयकरी धर्मैकनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यकरी तपःफलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ३ ॥

कैलासाचलकन्दरालयकरी गौरीह्युमाशंकरी
कौमारी निगमार्थगोचरकरी ओंकारबीजाक्षरी ।
मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ४ ॥

दृश्यादृश्यविभूतिभावनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रखेलनकरी विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ५ ॥

उर्वी सर्वजनेश्वरी जयकरी माता कृपासगरी
नारी नीलसमानकुन्तलधरी नित्यान्नदानेश्वरी ।
सर्वानन्दकरी दशाशुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ६ ॥

आदिक्षान्तसमस्तवर्णनिकरी शंभोस्त्रिभावाकरी
काश्मीरा त्रिपुरेश्वरी त्रिलहरी नित्याङ्कुरी शर्वरी ।
कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ७ ॥

देवी सर्वविचित्ररत्नरुचिरा दाक्षायणी सुन्दरी

वामा स्वादुपयोधरा प्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदाशुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ८ ॥

चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशकाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ ९ ॥

क्षत्रत्राणकरी महाभयकरी माता कृपासागरी
साक्षान्मोक्षकरी सदाशिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ १० ॥

अन्नपूर्णे सदापूर्णे
शंकरप्राणवल्लभे ।
ज्ञानवैराग्यसिध्यर्थं
भिक्षां देहि च पार्वति ॥ ११ ॥

माता च पर्वती देवी
पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च
स्वदेशो भुवनत्रयम् ॥ १२ ॥

***

२१. श्रीजगद्धात्रीस्तोत्रम्

(श्रीजगद्धात्री कल्पांतर्गतम्)

आधारभूतेचाधेये धृतिरूपे धुरंधरे ।
ध्रुवे ध्रुवपदे धीरे जगद्धात्रि नमोऽस्तु ते ॥ १ ॥

शिवाकारे शक्तिरूपे शक्तिस्थे शक्तिविग्रहे ।
शाक्ताचार प्रिये देवि जगद्धात्रि नमोऽस्तु ते ॥ २ ॥

जयदे जगदानन्दे जगदेकप्रपूजिते ।
जय सर्वगते दुर्गे जगद्धात्रि नमोऽस्तु ते ॥ ३ ॥

सूक्ष्मातिसूक्ष्मरूपे च प्राणापानादिरूपिणि ।
भावाभावस्वरूपे च जगद्धात्रि नमोऽस्तु ते ॥ ४ ॥

कालादिरूपे कालेशे कालकाल विभेदिनि ।
सर्वस्वरूपे सर्वज्ञे जगद्धात्रि नमोऽस्तु ते ॥ ५ ॥

महाविघ्ने महोत्साहे महामाये वरप्रदे ।
प्रपञ्चसारे साध्वीशे जगद्धात्रि नमोऽस्तु ते ॥ ६ ॥

अगम्ये जगतामाद्ये माहेश्वरि वरांगने ।
अशेषरूपे रूपस्थे जगद्धात्रि नमोऽस्तु ते ॥ ७ ॥

तीर्थयज्ञतपोदानयोगसारे जगन्मयि ।
त्वमेव सर्वं सर्वस्थे जगद्धात्रि नमोऽस्तु ते ॥ ८ ॥

दयारूपे दयादृष्टे दयार्द्रे दुःखमोचनि ।
सर्वापत्तारिके दुर्गे जगद्धात्रि नमोऽस्तु ते ॥ ९ ॥

अगम्यधामधामस्थे महायोगीशहृत्पुरे ।
अमेयभावकूटस्थे जगद्धात्रि नमोऽस्तु ते ॥ १० ॥

***

२२. श्री दुर्गादेवीध्यानम्

(बृहन्नन्दिकेश्वरपुराणांतर्गतम्)

ओं जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥ १ ॥

अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसंपन्नां सर्वाभरणभूषिताम् ॥ २ ॥

सुचारुदशनां तद्वत् पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ॥ ३ ॥

मृणालायतसंस्पर्शदशबाहुसमन्विताम् ।
त्रिशूलं दक्षिणे ध्येयं खड्गं चक्रं क्रमादधः ॥ ४ ॥

तीक्ष्णबाणं तथा शक्तिं दक्षिणेन विचिन्तयेत् ।
खेटकं पूर्णचापं च पाशमङ्कुशमेवच ॥ ५ ॥

घण्टां वा परशुं वाऽपि वामतः सन्निवेशयेत् ।
अधस्तान्महिषं तद्वत् विशिरस्कं प्रदर्शयेत् ॥ ६ ॥

शिरच्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ।
हृदिशूलेन निर्भिन्नं निर्यदान्त्रविभूषितम् ॥ ७ ॥

रक्तारक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम् ।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ॥ ८ ॥

सपाशवामहस्तेन धृतकेशञ्च दुर्गया ।
वमद्रुधिरवक्त्रंच देव्याः सिंहं प्रदर्शयेत् ॥ ९ ॥

देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ।
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ॥ १० ॥

[प्रसन्नवदनां देवीं सर्वकामफलप्रदाम् ।

शत्रुक्षयकरीं देवीं दैत्यदानवदर्पहाम्] ॥ ११ ॥

स्तूयमानञ्च तदूपममरैः सन्निवेशयेत् ॥ १२ ॥

उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपाऽतिचण्डिका ॥ १३ ॥

आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत् जगतां धात्रीं धर्मकामार्थमोक्षदाम् ॥ १४ ॥

***

२३. श्रीराजराजेश्वर्यष्टकम्

अम्बा शाम्भवि चन्द्रमौलिरबलाऽपर्णा उमा पार्वती
काली हैमवती शिवा त्रिनयनी कात्यायनी भैरवी ।
सावित्री नवयौवना शुभकरी साम्राज्यलक्ष्मीप्रदा
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ १ ॥

अम्बा मोहिनि देवता त्रिभुवनी अनन्दसन्दायिनी
वाणी पल्लवपाणिवेणुमुरलीगानप्रियालोलिनी ।
कल्याणी उडुराजबिम्बवदना धूम्राक्षसंहारिणी
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ २ ॥

अम्बा नूपुररत्नकङ्कणधरी केयूरहारावली
जातीचंपकवैजयन्तिलहरी ग्रैवेयवैराजिता ।
वीणावेणुविनोदमण्डितकरा वीरासनासंस्थिता
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ३ ॥

अम्बा रौद्रिणि भद्रकालि बगला ज्वालामुखी वैष्णवी
ब्रह्माणी त्रिपुरान्तकी सुरनुता देदीप्यमनोज्ज्वला ।
चामुण्डाश्रितरक्षपोषजननी दाक्षायणी वल्लवी
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ४ ॥

अम्बा शूलधनुः कुशाङ्कुशधरी अर्द्धेन्दुबिम्बाधरी
वाराही मधुकैटभप्रशमनी वाणीरमासेविता ।
मल्लाद्यासुरमूकदैत्यदमनी माहेश्वरी अम्बिका
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ५ ॥

अम्बा सृष्टिविनाशपालनकरी आर्याविशंशोभिता
गायत्री प्रणवाक्षरामृतरसा पूर्णानुसन्धीकृता ।
ओङ्कारी विनतासुतार्चितपदा उद्दण्डदैत्यापहा
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ६ ॥

अम्बा शाश्वत आगमादिविनुता आर्या महादेवता
या ब्रह्मादि पिपीलिकान्तजननी या वै जगन्मोहिनी ।
या पञ्चप्रणवादिरेफजननी या चित्कलामालिनी
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ७ ॥

अम्बापालितभक्तराजरनिशं अम्बाष्टकं यः पठेत्
अम्बा लोककटाक्षवीक्षललितं चैश्वर्यमव्याहतम् ।
अम्बा पावन मन्त्रराजपठनादन्ते च मोक्षप्रदा
चिदूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ८ ॥

***

२४. दुर्गाष्टकम्

कात्यायनि महामाये खड्गबाणधनुर्धरे ।
खड्गधारिणि चण्डिश्री दुर्गे देवि नमोऽस्तु ते ॥ १ ॥
वसुदेवसुते कालि वासुदेवसहोदरि ।
वसुन्धराश्रिये नन्दे दुर्गे देवि नमोऽस्तु ते ॥ २ ॥

योगनिद्रे महानिद्रे योगमाये महेश्वरि ।
योगसिद्धिकरे शुद्धे दुर्गे देवि नमोऽस्तु ते ॥ ३ ॥

शङ्खचक्रगदापाणे शार्ङ्गज्यायतबाहवे ।
पीताम्बरधरे धन्ये दुर्गे देवि नमोऽस्तु ते ॥ ४ ॥

ऋग्यजुस्सामाथर्वाणश्चतुस्सामन्तलोकिनि ।
ब्रह्मस्वरूपिणि ब्राह्मी दुर्गे देवि नमोऽस्तु ते ॥ ५ ॥

वृष्णीनांकुलसंभूते विष्णुनाथसहोदरि ।
वृष्णिरूपधरे धन्ये दुर्गे देवि नमोऽस्तु ते ॥ ६ ॥

सर्वज्ञे सर्वगे शर्वे सर्वेशे सर्वसाक्षिणि ।
सर्वामृतजटाभारे दुर्गे देवि नमोऽस्तु ते ॥ ७ ॥

अष्टबाहुमहासत्वे अष्टमीनवमिप्रिये ।
अट्टहासप्रिये भद्रे दुर्गे देवि नमोऽस्तु ते ॥ ८ ॥

दुर्गाष्टकमिदं पुण्यं भक्तितो यः पठेन्नरः ।
सर्वान्कामानवाप्नोति दुर्गालोकं स गच्छति ॥ ९ ॥

***

२५. आपदुद्धारकदुर्गास्तोत्रम्

(श्री सिद्धेश्वरीतन्त्रान्तर्गतम्)

नमस्ते शरण्ये शिवे सानुकम्पे
नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्य पादारविन्दे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ १ ॥

नमस्ते जगत्चिन्त्यमानस्वरूपे
नमस्ते महायोगिनि ज्ञानरूपे ।
नमस्ते नमस्ते सदानन्दरूपे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ २ ॥

अनाथस्य दीनस्य तृष्णातुरस्य
भयार्तस्य भीतस्य बद्धस्य जन्तोः ।
त्वमेका गतिर्देवि निस्तारकर्त्री
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ३ ॥

अरण्ये रणे दारुणे शत्रुमध्ये–
ऽनले सागरे प्रान्तरे राजगेहे ।
त्वमेकागतिर्देवि निस्तारनौका
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ४ ॥

अपारे महादुस्तरेऽत्यन्तघोरे
विपत्सागरे मज्जतां देहभाजाम् ।
त्वमेका गतिर्देवि निस्तारहेतुः
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ५ ॥

नमश्चण्डिके चण्डदुर्दण्डलीला–
समुत्खण्डिताखण्डिताशेषशत्रो ।
त्वमेका गतिर्देवि निस्तारबीजं
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ६ ॥

त्वमेवाघभावाधृता सत्यवादी
नजाताजित क्रोधनात्क्रोधनिष्ठा ।
इडा पिङ्गलात्वं सुषुम्नाच नाडी
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ७ ॥

नमो देवि दुर्गे शिवे भीमनादे
सरस्वत्यरुन्धत्यमोघस्वरूपे ।
विभूतिः शची कालरात्रिः सती त्वं
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ ८ ॥

शरणमसि सुराणां सिद्धविद्याधराणां

मुनिमनुजपशूनां दस्युभिस्त्रासितानाम् ।
नृपतिगृहगतानां व्याधिभिः पीडितानां
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥ ९ ॥

सर्वं वा श्लोकमेकं वा यः पठेद्भक्तिमान् सदा ।
स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम्
पठनादस्य भूतेशि किं न सिध्यति भूतले ॥ १० ॥

***

२६. शीतलाष्टकम्

(स्कान्दपुराणान्तर्गतम्)

वन्देऽहं शीतलां देवीं रासभस्थां दिगंबराम् ।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥ १ ॥

वन्देऽहं शीतलां देवीं सर्वरोगभयापहाम् ।
यामासाद्य निवर्तेत विस्फोटकभयं महत् ॥ २ ॥

शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः ।
विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥ ३ ॥

यस्त्वामुदकमध्येतु ध्यात्वा संपूजयेन्नरः ।
विस्फोटकभयं घोरं गृहे तस्य न जायते ॥ ४ ॥

शीतले ज्वरदग्धस्य पूतिगन्धयुतस्य च ।
प्रणष्टचक्षुषः पुंसः त्वामाहुर्जीवनौषधम् ॥ ५ ॥

शीतले तनुजान् रोगान् नृणां हरसि दुस्त्यजान् ।

विस्फोटकविदीर्णानां त्वमेकामृतवर्षिणी ॥ ६ ॥

गलगण्डग्रहा रोगाः येचान्ये दारुणा नृणाम् ।
त्वदनुध्यानमात्रेण शीतले यान्ति संक्षयम् ॥ ७ ॥

न मन्त्रो नौषधं तस्य पापरोगस्य विद्यते ।
त्वामेकां शीतले धात्रीं नान्यां पश्यामि देवताम् ॥ ८ ॥

मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थिताम् ।
यस्त्वां संचिन्तयेत् देवि तस्य मृत्युर्न जायते ॥ ९ ॥

अष्टकं शीतला देव्याः यो नरः प्रपठेत् सदा ।
विस्फोटकभयं घोरं गृहे तस्य न जायते ॥ १० ॥

श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्वितैः ।
उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥ ११ ॥

शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ।
शीतले त्वं जगद्धात्री शीतलायै नमोनमः ॥ १२॥

रासभो गर्दभश्चैव खरो वैशाखनन्दनः ।
शीतलावाहनश्चैव दूर्वाकन्दनिकृन्तनः ॥ १३ ॥

एतानि खरनामानि शीतलाग्रे तु यः पठेत् ।
तस्य गेहे शिशूनां च शीतला रुङ् न जायते ॥ १४ ॥

शीतलाष्टकमेवेदं न देयं यस्य कस्यचित् ।
दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै ॥ १५ ॥

***

२७. ज्ञानप्रसूनाम्बिकास्तोत्रम्

माणिक्यान्ञ्चितभूषणां मणिरवां माहेन्द्रनीलोज्ज्वलां
मन्दारद्रुममाल्यभूषितकचां मत्तेभकुम्भस्तनीम् ।
मौलिस्तोमनुतां मरालगमनां माध्वीरसानन्दिनीं
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ १ ॥

श्यामां राजनिभाननां रतिहितां राजीवपत्रेक्षणां
राजत्काञ्चनरत्नभूषणयुतां राज्यप्रदानेश्वरीम् ।
रक्षोगर्वनिवारणां त्रिजगतां रक्षैकचिन्तामणिं
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ २ ॥

कल्याणीं करिकुम्भभासुरकुचां कामेश्वरीं कामिनीं
कल्याणाचलवासिनीं कलरवां कन्दर्पविद्याकलाम् ।
कञ्जाक्षीं कलबिन्दुकल्पलतिकां कामारिचित्तप्रियां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ३ ॥

भवातीत मनःप्रभावभरितां ब्रह्माण्डभाण्डोदरीं
बालां बालकुरङ्गनेत्रयुगलां भानुप्रभाभासिताम् ।
भास्वत्क्षेत्ररुचाभिरामनिलयां भव्यां भवानीं शिवां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ४ ॥

वीणागानविनोदिनीं विजयिनीं वेतण्डकुम्भस्तनीं
विद्वद्वन्दितपादपद्मयुगलां विद्याप्रदां शंकरीम् ।
विद्वेषिण्यरिभञ्जिनीं स्तुतिभवां वेदान्तवेद्यां शिवां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ५ ॥

नानाभूषितभूषणादिविमलां लावण्यपाथोनिधिं
काञ्चीचंचलघाटिका कलरवां कञ्जातपत्रेक्षणाम् ।

कर्पूरागरुकुङ्कुमाङ्कितकुचां कैलासनाथप्रियां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ६ ॥

मन्जीराञ्चितपादपद्मयुगलां माणिक्यभूषान्वितां
मन्दारदुममञ्जरीमधुझरी माधुर्यखेलत्गिराम् ।
मातंगीं मधुरालसां करशुकां नीलालकालंकृतां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ७ ॥

कर्णालम्बितहेमकुण्डलयुगां कादम्बवेणीमुमां
अम्भोजासनवासवादिविनुतां अर्द्धेन्दुभूषोज्ज्वलाम् ।
कस्तूरीतिलकाभिरामनिटिलां गानप्रियां श्यामलां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ८ ॥

कौमारीं नवपल्लवाङ्घ्रियुगलां कर्पूरभासोज्ज्वलां
गंगावर्तसमाननाभिकुहरां गांगेयभूषान्विताम् ।
चन्द्रार्कानलकोटिकोटिसदृशां चन्द्रार्कबिम्बाननां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ ९ ॥

बालादित्यनिभाननां त्रिनयनां बालेन्दुना भूषितां
नीलाकारसुकेशिनीं विलसितां नित्यान्नदानप्रदाम् ।
शङ्खं चक्रवराभयं च दधतीं सारस्वतार्थप्रदां
ध्यायेे चेतसि कालहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥ १० ॥

***

२८. श्रीदुर्गाकवचम्

ईश्वर उवाच
शृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम् ।
पठित्वा पाठयित्वा च नरो मुच्येत सङ्कटात् ॥ १ ॥

उमा देवी शिरः पातु ललाटं शूलधारिणी ।

चक्षुषी खेचरी पातु वदनं सर्वधारिणी ॥ २ ॥

जिह्वां च चण्डिका देवी ग्रीवां सौभद्रिका तथा ।
अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी ॥ ३ ॥

हृदयं ललिता देवी उदरं सिंहवाहिनी ।
कटिं भगवती देवी द्वावूरू विन्ध्यवासिनी ॥ ४ ॥

महाबाला च जङ्घे द्वे पादौ भूतलवासिनी
एवं स्थिताऽसि देवि त्वं त्रैलोक्यरक्षणात्मिके ।
रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोऽस्तु ते ॥ ५ ॥

***

२९. श्री अम्बापञ्चरत्नम्

अम्बा शंबरवैरितातभगिनी श्रीचन्द्रबिम्बानना
बिम्बोष्ठी स्मितभाषिणी शुभकरी कादम्बवाट्याश्रिता ।
ह्रीङ्काराक्षरमन्त्रमध्यसुभगा श्रोणी नितम्बाङ्किता
मामम्बापुरवासिनी भगवती हेरम्बमाताऽवतु ॥ १ ॥

कल्याणी कमनीयसुन्दरवपुः कात्यायनी कालिका
कालश्यामलमेचकद्युतिमती गायत्रिपञ्चाक्षरी ।
कामाक्षी करुणानिधिः कलिमलारण्यातिदावानला
मामम्बापुरवासिनी भगवती हेरम्बमाताऽवतु ॥ २ ॥

काञ्चीकङ्कणहारकुण्डलवती कोटी किरीटान्विता
कन्दर्पद्युतिकोटि कोटि सदना पीयूषकुम्भस्तना ।
कौसुम्भारुण काञ्चनाम्बरवृता कैलासवासप्रिया
मामम्बापुरवासिनी भगवती हेरम्बमाताऽवतु ॥ ३ ॥

या सा शुम्भनिशुम्भदैत्यशमनी या रक्तबीजाशनी

या श्री विष्णुसरोजनेत्रभवना या ब्रह्मविद्यासनी ।
या देवी मधुकैटभासुररिपुः या माहिषध्वंसिनी
मामम्बापुरवासिनी भगवती हेरम्बमाताऽवतु ॥ ४ ॥

श्रीविद्या परदेवताऽऽदिजननी दुर्गा जया चण्डिका
बाला श्रीत्रिपुरेश्वरी शिवसती श्रीराजराजेश्वरी ।
श्रीराज्ञी शिवदूतिका श्रुतिनुता शृङ्गारचूडामणिः
मामम्बापुरवासिनी भगवती हेरम्बमाताऽवतु ॥ ५ ॥

अम्बा पञ्चकमद्भुतं पठति चेत् यो वा प्रभातेऽनिशं
दिव्यैश्वर्यशतायुरुत्तममिदं विद्यां श्रियं शाश्वतम् ।
लब्ध्वा भूमितले स्वधर्मनिरतां श्रीसुन्दरीं भामिनीं
अन्ते स्वर्गफलं लभेत् स विबुधैः संस्तूयमानो नरः ॥ ६ ॥

***

३०. श्रीभुवनेश्वरीपञ्चरत्नस्तुतिः

नमो देव्यै प्रकृत्यै च विधात्र्यै सततं नमः ।
कल्याण्यै कामदायै च वृत्त्यै सिद्ध्यै नमो नमः ॥ १ ॥

सच्चिदानन्दरूपिण्यै संसारारण्ये नमो नमः ।
पञ्चकृत्यै विधात्र्यै च भुवनेश्वर्यै नमो नमः ॥ २ ॥

विद्या त्वमेव ननु बुद्धिमतां नराणां ।
शक्तिस्त्वमेव किल शक्तिमतां सदैव ।
त्वं कीर्ति कान्ति कमलामल तुष्टिरूपा
मुक्तिप्रदा विरतिरेव मनुष्यलोके ॥ ३ ॥

त्राता त्वमेव मम मोहमयात् भवाब्धेः
त्वामम्बिके सततमेव महार्तिदे च ।

रागादिभिर्विरचिते विततेऽखिलान्ते
मामेव पाहि बहुदुःखहरे च काले ॥ ४ ॥

नमो देवि महाविद्ये नमामि चरणौ तव
सदा ज्ञानप्रकाशं मे देहि सर्वार्थदे शिवे ।

***

३१. श्री मूकाम्बिकास्तोत्रम्

मूलाम्भोरुहमध्यकोणविलसत्बन्धूकरागोज्ज्वलां
ज्वाला ज्वालजितेन्दुकान्तिलहरीं सानन्द सन्दायिनीम् ।
हेलालालित नीलकुन्तलधरां नीलोत्पलाभांशुकां
कोल्लूराद्रिनिवासिनीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥ १ ॥

बालादित्यनिभाननां त्रिनयनां बालेन्दुनाभूषितां
नीलाकार सुकेशिनीं सुललितां नित्यान्नदानप्रियाम् ।
शङ्खं चक्रगदाभयं च दधतीं सारस्वतार्थप्रदां
तां बालां त्रिपुरीं शिवेनसहितां ध्यायामि मूकाम्बिकाम् ॥ २ ॥

मध्याह्नार्कसहस्रकोटिसदृशां मायान्धकारस्थितां
मध्यन्तादिभिरर्चितां मदकरीं मारेण संसेवितां ।
शूलंपाशकपालपुस्तकधरां शुद्धार्थविज्ञानदां
तां बालां त्रिपुरीं शिवेनसहितां ध्यायामि मूकाम्बिकाम् ॥ ३ ॥
सन्ध्यारागसमाननां त्रिनयनां सन्मानसैः पूजितां
चक्राक्षाभयकंबुशोभितकरां प्रालम्बवेणीयुताम् ।
ईषत्फुल्लसुकेतकीदललसच्चाभ्यर्चितां तां शिवां
तां बालां त्रिपुरीं शिवेनसहितां ध्यायामि मूकाम्बिकाम् ॥ ४ ॥

चन्द्रादित्यसमानकुण्डलधरां चन्द्रार्ककोटिप्रभां
चन्द्रार्काग्निविलोचनां शशिमुखीमिन्द्रादिसंसेविताम् ।
मन्त्राख्यन्त सुन्दर याग पतितां चिन्ताकुलध्वंसिनीं
मन्त्रारति वनेस्थितां मणिमयीं ध्यायामि मूकाम्बिकाम् ॥ ५ ॥

कल्याणीं कमलेक्षणां निरवधिं वन्दारुचिन्तामणिं
कल्याणाचलसंस्थितां घनकृपां मायां महावैष्णवीम् ।
कल्यां कंबुसुदर्शनाभयकरां शम्भुप्रियां कामदां
कल्याणीं त्रिपुरीं शिवेनसहितां ध्यायामि मूकाम्बिकाम् ॥ ६ ॥

कालाम्भोधरकुण्डलाञ्चितमुखां कर्पूरवीटीयुतां
कर्णालम्बितहेमकुण्डलधरां माणिक्यकाञ्चीधराम् ।
कैवल्यैकपरायणां कलिमलप्रध्वंसिनीं कामदां
कल्याणीं त्रिपुरीं शिवेनसहितां ध्यायामि मूकाम्बिकाम् ॥ ७ ॥

नानाकाञ्चि विचित्रवस्त्रसहितां नानाविधैर्भूषितां
नानापुष्पसुगन्धमाल्यसहितां नानाजनासेवितां ।
नानावेदपुराणशास्त्रविनुतां नानाकलत्रप्रदां
नानारूपधरां महेशमहिषीं ध्यायामि मूकाम्बिकाम् ॥ ८ ॥

राकातारकनायकोज्ज्वलमुखीं श्रीकामकाम्यप्रदां
शोकारण्यधनञ्जयप्रतिनिभां कोपाटवीचन्द्रिकाम् ।
श्रीकान्तादि सुरार्चितां स्त्रियमिमां लोकावली नाशिनीं
लोकानन्दकरीं नमामि शिरसा ध्यायामि मूकाम्बिकाम् ॥ ९ ॥

काञ्चीकिङ्किणिकङ्कणाञ्चितकरां मञ्जीरहारोज्ज्वलां
चञ्चत्काञ्चनकिरीटकटिदामाश्लेषभूषोज्ज्वलाम् ।
किञ्चित् काञ्चन कञ्चुके मणिमये पद्मासने संस्थितां
पञ्चाद्यञ्चितसञ्चरीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥ १० ॥

सौवर्णाम्बुजमध्यकाञ्चिनयनां सौदामिनीसन्निभां

शङ्खं चक्रवराभयानिदधतीं इन्दोः कलां बिभ्रतीम् ।
ग्रैवेयासक्तहारकुण्डलधरां आखण्डलादिस्तुतां
मायां विन्ध्यनिवासिनीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥ ११ ॥

श्रीमन्विभवेन सुरैर्मुनिगणैरप्सरोपास्य सेव्यां
मन्त्रादिसमस्तदेववनितैः संशोभमानां शिवां ।
सौवर्णाम्बुजधारिणीं त्रिनयनां मोहादि कामेश्वरीं
मूकाम्बां सकलेश सिद्धिवरदां वन्दे परां देवताम् ॥ १२ ॥

***

३२. श्री कामाक्षीस्तोत्रम्

काञ्चीनूपुररत्नकङ्कणलसत्केयूरहारोज्ज्वलां
काश्मीरारुणकञ्चुकाञ्चितकुचां कस्तूरिकाचर्चिताम् ।
कल्हाराञ्चितकल्पकोज्ज्वलमुखीं कारुण्यकल्लोलिनीं
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ १ ॥

कामारातिमनःप्रियां कमलभूसेव्यां रमाराधितां
कन्दर्पाधिकदर्पदानविलसत् सौन्दर्यदीपाङ्कुराम् ।
कीरालापविनोदिनीं भगवतीं काम्यप्रदानव्रतां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ २ ॥

कादम्बप्रमदां विलासगमनां कल्याणकाञ्चीरवां
कल्याणाचलपादपद्मयुगलां कान्त्या स्फुरन्तीं शुभाम् ।
कल्याणाचलकार्मुकप्रियतमां कादंबमालाश्रियं
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ३ ॥

गन्धर्वामरसिद्धचारणवधूध्येयां पताकाञ्चितां
गौरीं कुङ्कुमपङ्कपङ्कितकुचद्वन्द्वाभिरामां शुभाम् ।
गम्भीरस्मितविभ्रमाङ्कितमुखीं गंगाधरालिङ्गितां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ४ ॥

विष्णुब्रह्ममुखामरेन्द्रविलसत्कोटीरपीठस्थलां
लाक्षारञ्जितपादपद्मयुगलां राकेन्दुबिम्बाननाम् ।
वेदान्तागमवेद्यचिन्त्यचरितां विद्वज्जनैरावृतां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ५ ॥

माकन्दद्रुममूलदेशमहिते माणिक्यसिंहासने
दिव्यां दीपितहेमकान्तिनिवहां वस्त्रावृतां तां शुभाम् ।
दिव्याकल्पितदिव्यदेहभरितां दृष्टिप्रमोदार्पितां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ६ ॥

आधारादिसमस्तचक्रनिलयामाद्यन्तशून्यामुमां
आकाशादिसमस्तभूतनिवहाकारां अशेषात्मिकाम् ।
योगीन्द्रैरपि योगिनीशतगणैराराधितामम्बिकां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ७ ॥

ह्रीङ्कारप्रणवात्मिकां प्रणमतां श्रीविद्यविद्यामयीं
ऐं क्लीं सौं रुचि मन्त्रमूर्तिनिवहाकारामशेषात्मिकाम् ।
ब्रह्मानन्दरसानुभूतिमहितां ब्रह्मप्रियंवादिनीं
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ८ ॥

सिद्धानन्दजनस्य चिन्मयसुखाकारां महायोगिनीं
मायाविश्वविमोहिनीं मधुमतीं ध्यायेत् शुभां ब्राह्मणीम् ।
ध्येयां किन्नरसिद्धचारणवधू ध्येयां सदा योगिभिः
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरीदेवताम् ॥ ९ ॥

कामारिकामां कमलासनस्थां
काम्यप्रदां कङ्कणचूडहस्ता ।
काञ्चीनिवासां कनकप्रभासां
कामाक्षिदेवीं कलयामि चित्ते ॥ १० ॥

***

३३. श्री महिषासुरमर्द्दिनीस्तोत्रम्

अयिगिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते
गिरिवरविन्ध्यशिरोऽधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १ ॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शंकरतोषिणि किल्बिषमोषिणि घोषरते ।
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ २ ॥

अयि जगदम्ब मदम्ब कदम्बवनप्रियवासिनि हासरते
शिखरिशिरोमणि तुङ्गहिमालयशृङ्गनिजालयमध्यगते ।
मधुमधुरे मधुकैटभगञ्जिनि कैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ३ ॥

अयि शतखण्ड विखण्डित रुण्डवितुण्डित शुण्डगजाधिपते
रिपुगजगण्ड विदारण चण्डपराक्रम शुण्डमृगाधिपते ।
निजभुजदण्डनिपातित खण्डविपातित मुण्डभटाधिपते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ४ ॥

अयि रणदुर्मद शत्रुवधोदित दुर्धर निर्ज्जर शक्तिभृते
चतुरविचार धुरीण महाशिव दूतकृत प्रमथाधिपते ।
दुरित दुरीह दुराशय दुर्मति दानवदूतकृतान्तमते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ५ ॥

अयि शरणागत वैरि वधूवर वीरवराभयदायकरे
त्रिभुवनमस्तक शूलविरोधिशिरोऽधिकृतामलशूलकरे ।

धुमिधुमितामर दुन्दुभिनाद महो मुखरीकृत तिग्मकरे
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ६ ॥

अयि निजहुङ्कृतिमात्रनिराकृत धूम्रविलोचनधूम्रशते
समरविशोषितशोणितबीज समुद्भवशोणित बीजलते ।
शिव शिव शुम्भनिशुम्भ महाहव तर्पितभूतपिशाचरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ७ ॥

धनुरनुसंग रणक्षणसंग परिस्फुरदंग नटत्कटके
कनकपिशङ्गपृषत्कनिषङ्ग रसद्भटशृङ्ग हतावटुके ।
कृतचतुरङ्ग बलक्षितिरङ्ग घटद्बहुरङ्ग रटद्बटुके
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ८ ॥

जय जय जप्यजये जयशब्द परस्तुतितत्पर विश्वनुते
भण भण भञ्जिमि भिंकृत नूपर शिञ्जितमोहित भूतपते ।
नटितनटार्ध नटीनटनायक नाटितनाट्य सुगानरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ९ ॥

अयि सुमनः सुमनः सुमनः सुमनोहरकान्तियुते
श्रितरजनी रजनी रजनी रजनीकर वक्त्रवृते ।
सुनयन विभ्रमर भ्रमर भ्रमर भ्रमर भ्रमराधिपते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १० ॥

सहितमहाहवमल्लमतल्लिक मल्लितरल्लक मल्लरते
विरचितवल्लिक पल्लिक मल्लिक भिल्लिक भिल्लिक वर्गवृते ।
सितकृतफुल्लसमुल्लसितारुण तल्लज पल्लव सल्ललिते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ ११ ॥

अविरलगण्डगलन्मद मेदुर मत्तमतङ्गज राजपते
त्रिभुवन भूषण भूतकलानिधि रूपपयोनिधि राजसुते ।
अयि सुदतीजन लालसमानस मोहन मन्मथ राजसुते

जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १२ ॥

कमलदलामलकोमलकान्तिकलाकलितामल फालतले
सकल विलास कलानिलयक्रम केलि चलत् कलहंसकुले ।
अलिकुलसङ्कुलकुवलयमण्डल मौलि मिलद्बकुलालिकुले
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १३ ॥

करमुरलीरव वीजितकूजित लज्जितकोकिलमञ्जुमते
मिलितपुलिन्द मनोहरगुञ्जित रंजित शैलनिकुंजगते ।
निजगणभूतमहाशबरीगण सद्गुण संभृत केलितले
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १४ ॥

कटितटपीतदुकूलविचित्रमयूख तिरस्कृत चन्द्ररुचे
प्रणत सुरासुर मौलिमणिस्फुरदंशुलसन्नखचन्द्ररुचे ।
जितकनकाचल मौलिपदोर्जित निर्भरकुञ्जरकुंभकुचे
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १५ ॥

विजितसहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृतसुरतारक संगरतारक संगरतारक सूनुसुते ।
सुरथसमाधि समानसमाधि समाधि समाधि सुजातरते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १६ ॥

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं स शिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तवपदमेव परंपदमित्यनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १७ ॥

कनकलसत्कलसिन्धुजलैरनुसिञ्चिनुते गुणरङ्गभुवं
भजति स किं न शचीकुचकुम्भ तटीपरिरम्भसुखानुभवम् ।
तव चरणं शरणं करवाणि नतामरवाणि निवासि शिवं
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १८ ॥

तव विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कूलयते
किमु पुरुहूतपुरीन्दुमुखीसुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवनामधने भवती क्रुपया किमुतत्क्रियते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ १९ ॥

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथाऽनुमितासिरते ।
यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते
जय जय हे महिषासुरमर्द्दिनि रम्यकपर्द्दिनि शैलसुते ॥ २० ॥

***

३४. कामाक्ष्यष्टकम्

श्रीकाञ्चीपुरवासिनीं भगवतीं श्रीचक्रमध्ये स्तितां
कल्याणीं कमनीय चारु मकुटां कौसुम्भवस्त्रान्विताम् ।
श्री वाणीशचिपूजिताङ्घ्रियुगलां चारुस्मितां सुप्रभां
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ १ ॥

मालामौक्तिककन्धरां शशिमुखीं शम्भुप्रियां सुन्दरीं
शर्वाणीं शरचापमण्डितकरां शीतांशुबिम्बाननाम् ।
वीणागानविनोदकेलिरसिकां विद्युत्प्रभाभासुरां
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ २ ॥

श्यामां चारुनितम्बिनीं गुरुभुजां चन्द्रावतंसां शिवां
शर्वालिन्ङ्गित नीलचारुवपुषीं शान्तां प्रवालाधराम् ।
बालां बालतमालकान्तिरुचिरां बालार्कबिम्बोज्ज्वलाम्
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ ३ ॥

लीलाकल्पितजीवकोटिनिवहां चिद्रूपिणीं शंकरीं
ब्रह्माणीं भवरोगतापशमनीं भव्यात्मिकां शाश्वतीम् ।
देवीं माधवसोदरीं शुभकरीं पञ्चाक्षरीं पावनीं
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ ४ ॥

वामां वारिजलोचनां हरिहरब्रह्मेन्द्रसंपूजितां
कारुण्यामृतवर्षिणीं गुणमयीं कात्यायनीं चिन्मयीम् ।
देवीं शुम्भनिषूदिनीं भगवतीं कामेश्वरीं देवतां
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ ५ ॥

कान्तां काञ्चनरत्नभूषितगलां सौभाग्यमुक्तिप्रदां
कौमारीं त्रिपुरान्तकप्रणयिनीं कादम्बिनीं चण्डिकाम् ।
देवीं शंकरहृत्सरोजनिलयां सर्वाघहन्त्रीं शुभां
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ ६ ॥

शान्तां चन्ञ्चलचारुनेत्रयुगलां शैलेन्द्रकन्यां शिवां
वाराहीं दनुजान्तकीं त्रिनयनीं सर्वात्मिकां माधवीम् ।
सौम्यां सिन्धुसुतां सरोजवदनां वाग्देवतामम्बिकां
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ ७ ॥

चन्द्रार्कानललोचनां गुरुकुचां सौन्दर्यचन्द्रोदयां
विद्यां विन्ध्यनिवासिनीं पुरहरप्राणप्रियां सुन्दरीम् ।
मुग्द्धस्मेरसमीक्षणेन सततं सम्मोहयन्तीं शिवाम्
कामाक्षीं करुणामयीं भगवतीं वन्दे परां देवताम् ॥ ८ ॥

***

श्री रामस्तोत्राणि

विषयसूची

पृष्ठसंख्या

१.	रामरक्षास्तोत्रम्	१७६
२.	ब्रह्मदेवकृता रामस्तुतिः	१७९
३.	जटायुकृत श्री रामस्तोत्रम्	१८१
४.	इन्द्रकृत श्री रामस्तोत्रम्	१८२
५.	रामाष्टकम् १	१८३
६.	श्री सीतारामाष्टकम	१८४
७.	श्री रामचन्द्रस्तुतिः	१८५
८.	श्री राममंगलाशासनम्	१८६
९.	श्री रामप्रेमाष्टकम्	१८७
१०.	श्री रामचन्द्राष्टकम्	१८९
११.	श्री रामाष्टकम् २	१९०
१२.	श्री राघवाष्टकम्	१९१
१३.	श्री रामभुजंगप्रयातस्तोत्रम्	१९३
१४.	श्री सीतरामस्तोत्रम्	१९७
१५.	श्री नामरामायणम्	१९८

****

१. रामरक्षास्तोत्रम्

(बुधकौशिककृतम्)

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥ २ ॥

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामकुटमण्डितम् ॥ ३ ॥

सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥ ४ ॥

रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघवः पातु भालं दशरथात्मजः ॥ ५ ॥

कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ ६ ॥

जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः ।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ ७ ॥

करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ॥ ८ ॥

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥ ९ ॥

जानुनी सेतुकृत् पातु जङ्घे दशमुखान्तकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥ १० ॥

एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ ११ ॥

पातालभूतलव्योमचारिणः छद्म ारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रमनामभिः ॥ १२ ॥

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥ १३ ॥

जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
यः कण्ठे धरयेत्तस्य करस्थाः सर्वसिद्धयः ॥ १४ ॥

वज्रपञ्जरनामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥ १५ ॥

आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरः ।
तथा लिखितवान् प्राप्तः प्रबुद्धो बुधकौशिकः ॥ १६ ॥

आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिरामस्त्रिलोकानां रामः श्रीमन्स नः प्रभुः ॥ १७ ॥

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १८ ॥

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥

शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥ २० ॥

आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषङ्गसङ्गिनौ
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥ २१ ॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ २२ ॥

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥ २३ ॥

वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥ २४ ॥

इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः ।
अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः ॥ २५ ॥

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्ति नामभिर्दिव्यैः न ते संसारिणो नराः ॥ २६ ॥

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥ २७ ॥

रामाय रामभद्राय रामचन्द्राय वेधस ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ २८ ॥

श्रीराम राम रघुनन्दन राम राम
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥ २९ ॥

श्रीरामचन्द्रचरणौ मनसा स्मरामि
श्रीरामचन्द्रचरणौ वचसा गृणामि ।
श्रीरामचन्द्रचरणौ शिरसा नमामि
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥ ३० ॥

माता रामो मत्पिता रामचन्द्रः
स्वामी रामो मत्सखा रामचन्द्रः ।
सर्वस्वं मे जीवितेशो दयालु-
र्नान्यं दैवं नैव जाने न जाने ॥ ३१ ॥

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ॥ ३२ ॥

लोकाभिरामं रणरङ्गधीरं
राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरूपं करुणाकरं तं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥ ३३ ॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥ ३४ ॥

कूजन्तं रामरामेति मधुरं मधुराक्षरं ।
आरुह्यकविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ३५ ॥

आपदामपहर्तारं दातारं सर्वसंपदाम ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३६ ॥

भर्जनं भवबीजानां अर्जनं सुखसंपदाम् ।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ ३७ ॥

रमो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ ३८ ॥

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥

***

२. <u>ब्रह्मदेवकृता श्रीरामस्तुतिः</u>
(अध्यात्मरामायणांतर्गतम्)

वन्दे देवं विष्णुमशेषस्थितिहेतुं
त्वामध्यात्मज्ञानिभिरन्तर्हृदि भाव्यम् ।
हेयाहेयद्वन्द्वविहीनं परमेकं
सत्तामात्रं सर्वहृदिस्थं दृशिरूपम् ॥ १ ॥

प्राणापानौ निश्चयबुद्ध्या हृदि रुद्ध्वा
छित्त्वा सर्वं संशयबन्धं विषयौघान् ।
पश्यन्तीशं यं गतमोहा यतयस्तं
वन्दे रामं रत्नकिरीटं रविभासम् ॥ २ ॥

मायातीतं योगविधानं जगदादिं
मानातीतं मोहविनाशं मुनिवन्द्यम् ।

योगिध्येयं योगविधानं परिपूर्णं
वन्दे रामं रञ्जितलोकं रमणीयम् ॥ ३ ॥

भावाभावप्रत्ययहीनं भवमुख्यै–
र्योगासक्तैरर्चितपादांबुजयुग्मम् ।
नित्यं शुद्धं बुद्धमनन्तं प्रणवाख्यं
वन्दे रामं वीरमशेषासुरदावम् ॥ ४ ॥

त्वं मे नाथो नाथितकार्याखिलकारी
मानातीतो माधवरूपोऽखिलाधारी ।
भक्त्या गम्यो भावितरूपो भवहारी
योगाभ्यासैर्भावितचेतःसहचारी ॥ ५ ॥

त्वामाद्यन्तं लोकततीनां परमीशं
लोकानां नो लौकिकमानैरधिगम्यम् ।
भक्तिश्रद्धाभावसमेतैर्भजनीयं
वन्दे रामं सुन्दरमिन्दीवरनीलम् ॥ ७ ॥

को वा ज्ञातुं त्वामतिमानं गतमानं
माया सक्तो माधव शक्तो मुनिमान्यम् ।
वृन्दारण्ये वन्दितवृन्दारकवृन्दं
वन्दे रामं भवमुखवन्द्यं सुखकन्दम् ॥ ८ ॥

नानाशास्त्रैर्वेदकदम्बैः प्रतिपाद्यं
नित्यानन्दं निर्विषयज्ञानमनादिम् ।
मत्सेवार्थं मानुषभावं प्रतिपन्नं
वन्दे रामं मरकतवर्णं मथुरेशम् ॥ ९ ॥

श्रद्धायुक्तो यः पठतीमं स्तवमाद्यं
ब्राह्मं ब्रह्मज्ञानविधानं भुवि मर्त्यः ।
रामं श्यामं कामितकामप्रदमीशं

ध्यात्वा पातकजालैर्विगतः स्यात् ॥ १० ॥

***

३. जटायुकृतश्रीरामस्तोत्रम्

(अध्यात्मरामायणान्तर्गतम्)

जटायुरुवाच

अगणितगुणमप्रमेयमाद्यं सकलजगत्स्थितिसंयमादिहेतुम् ।
उपरमपरमं परात्मभूतं सततमहं प्रणतोऽस्मि रामचन्द्रम् ॥ २ ॥

निरवधिसुखमिन्दिराकटाक्षं क्षपितसुरेन्द्रचतुर्मुखादिदुःखम् ।
नरवरमनिशं नतोऽस्मि रामं वरदमहं वरचापबाणहस्तम् ॥ २ ॥

त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहितप्रदानम् ।
शरणदमनिशं सुरागमूले कृतनिलयं रघुनन्दनं प्रपद्ये ॥ ३ ॥

भवविपिनदवाग्निनामधेयं भवमुखदैवतदैवतं दयालुम् ।
दनुजपतिसहस्रकोटिनाशं रवितनयासदृशं हरिं प्रपद्ये ॥ ४ ॥

अविरतभवभावनातिदूरं भवविमुखैर्मुनिभिस्सदैव दृश्यम् ।
भवजलधिसुतारणाङ्घ्रिपोतं शरणमहं रघुनन्दनं प्रपद्ये ॥ ५ ॥

गिरिशगिरिसुतामनोनिवासं गिरिवरधारिणमीहिताभिरामम् ।
सुरवरदनुजेन्द्रसेविताङ्घ्रिं सुरवरदं रघुनायकं प्रपद्ये ॥ ६ ॥

परधनपरदारवर्जितानां परगुणभूतिषु तुष्टमानसानाम् ।
परहितनिरतात्मनां सुसेव्यं रघुवरमम्बुजलोचनं प्रपद्ये ॥ ७ ॥

स्मितरुचिरविकासिताननाब्जमतिसुलभं सुरराजनीलनीलम् ।
सितजलरुहचारुनेत्रशोभं रघुपतिमीशगुरोर्गुरुं प्रपद्ये ॥ ८ ॥

हरिकमलजशंभुरूपभेदात्त्वमिह विभासि गुणत्रयानुवृत्तः ।

रविरिव जलपूरितोदपात्रेष्वमरपतिस्तुतिपात्रमीशमीडे ॥ ९ ॥

रतिपतिशतकोटिसुन्दराङ्गं शतपथगोचरभावनाविदूरम् ।
यतिपतिहृदये सदा विभातं रघुपतिमार्तिहरं प्रभुं प्रपद्ये ॥ १० ॥

इत्येवं स्तुवतस्तस्य प्रसन्नोऽभूद्घूत्तमः ।
उवाच गच्छ भद्रं ते मम विष्णोः परं पदम् ॥ १२ ॥

शृणोति य इदं स्तोत्रं लिखेद्वा नियतः पठेत् ।
स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत् ॥ १३ ॥

इति राघवभाषितं तदा श्रुतवान् हर्षसमाकुलो द्विजः
रघुनन्दनसाम्यमास्थितः प्रययौ ब्रह्मसुपूजितं पदम् ॥ १४ ॥

***

४. इन्द्रकृतश्रीरामस्तोत्रम्

(अध्यात्मरामायणान्तर्गतम्)

इन्द्र उवाच
भजेऽहं सदा राममिन्दीवराभं
भवारण्यदावानलाभाभिधानम् ।
भवानीहृदा भावितानन्दरूपं
भवाभावहेतुं भवादिप्रपन्नम् ॥ १ ॥

सुरानीकदुःखौघनाशैकहेतुं
नराकारदेहं निराकारमीड्यम् ।
परेशं परानन्दरूपं वरेण्यं
हरिं राममीशं भजे भारनाशम् ॥ २ ॥

प्रपन्नाखिलानन्ददोहं प्रपन्नं
प्रपन्नार्तिनिःशेषनाशाभिधानम् ।
तपोयोगयोगीशभावाभिभाव्यं
कपीशादिमित्रं भजे राममित्रम् ॥ ३ ॥

सदा भोगभाजां सुदूरे विभान्तं
सदा योगभाजामदूरे विभान्तम् ।
चिदानन्दकन्दं सदा राघवेशं
विदेहात्मजानन्दरूपं प्रपद्ये ॥ ४ ॥

महायोगमायाविशेषानुयुक्तो
विभासीश लीलानराकारवृत्तिः ।
त्वदानन्दलीलाकथापूर्णकर्णाः
सदानन्दरूपा भवन्तीह लोके ॥ ५ ॥

अहं मानपानाभिमत्तप्रमत्तो
न वेदाखिलेशाभिमानाभिमानः ।
इदानीं भवात्पादपद्मप्रसादात्
त्रिलोकाधिपत्याभिमानो विनष्टः ॥ ६ ॥

स्फुरद्रत्नकेयूरहाराभिरामं
धराभारभूतासुरानीकदावम् ।
शरच्चन्द्रवक्त्रं लसद्पद्मनेत्रं
दुरावारपारं भजे राघवेशम् ॥ ७ ॥

सुराधीशनीलाभ्रनीलाङ्गकान्तिं
विराधादिरक्षोवधाल्लोकशान्तिम् ।
किरीटादिशोभं पुरारातिलाभं
भजे रमचन्द्रं रघूणामधीशम् ॥ ८ ॥

लसच्चन्द्रकोटिप्रकाशादिपीठे
समासीनमङ्के समाधाय सीताम् ।
स्फुरद्धेमवर्णां तडित्पुञ्जभासां
भजे रामचन्द्रं निवृत्तार्तितन्द्रम् ॥ ९ ॥

***

५. रामाष्टकम्

कृतार्तदेववन्दनं दिनेशवंशनन्दनम् ।
सुशोभिभालचन्दनं नमामि राममीश्वरम् ॥ १ ॥

मुनीन्द्रयज्ञकारकं शिलाविपत्तिहारकम् ।
महाधनुर्विदारकं नमामि राममीश्वरम् ॥ २ ॥

स्वतातवाक्यकारिणं तपोवने विहारिणम् ।
करे सुचापधारिणं नमामि राममीश्वरम् ॥ ३ ॥

कुरङ्गमुक्तसायकं जटायुमोक्षदायकम् ।
प्रविद्धकीशनायकं नमामि राममीश्वरम् ॥ ४ ॥

प्लवङ्गसङ्गसम्मतिं निबद्धनिम्नगापतिम् ।
दशास्यवंशसङ्क्षतिं नमामि राममीश्वरम् ॥ ५ ॥

विदीनदेवहर्षणं कपीप्सितार्थवर्षणम् ।
स्ववन्धुशोककर्षणं नमामि राममीश्वरम् ॥ ६ ॥

गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम् ।
कृतास्तमोहलक्षणं नमामि राममीश्वरम् ॥ ७ ॥

हृताखिलाचलाभरं स्वधामनीतनागरम् ।
जगत्तमोदिवाकरं नमामि राममीश्वरम् ॥ ८ ॥

इदं समाहितात्मना नरो रघूत्तमाष्टकम् ।
पठन्निरन्तरं भयं भवोद्भवं न विन्दते ॥ ९ ॥

***

६. श्रीसीतारामाष्टकम्

ब्रह्ममहेन्द्रमुरेन्द्रमरुद्गणरुद्रमुनीन्द्रगणैरतिरम्यं
क्षीरसरित्पतितीरमुपेत्य नुतं हि सतामवितारमुदारम् ।
भूमिभरप्रशमार्थमथ प्रथितप्रकटीकृतचिद्घनमूर्तिं
त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ १ ॥

पद्मदलायतलोचन हे रघुवंशविभूषण देव दयालो
निर्मलनीरदनीलतनोऽखिललोकहृदम्बुजभासक भानो ।
कोमलगात्र पवित्रपदाब्जरजःकणपावितगौतमकान्त
त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ २ ॥

पूर्ण परात्पर पालय मामतिदीनमनाथमनन्तसुखाब्धे
प्रावृडदभ्रतडित्सुमनोहरपीतवराम्बर राम नमस्ते ।
कामविभञ्जन कान्ततरानन काञ्चनभूषण रत्नकिरीट
त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ ३ ॥

दिव्यशरच्छशिकान्तिहरोज्ज्वलमौक्तिकमालविशालसुमौले
कोटिरविप्रभ चारुचरित्रपवित्र विचित्रधनुःशरपाणे ।
चण्डमहाभुजदण्डविखण्डितराक्षसराजमहागजदण्डं
त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ ४ ॥

दोषविहिंस्रभुजङ्गसहस्रसुरोषमहानलकीलकलापे
जन्मजरामरणोर्मिभये मदमन्मथनक्रविचक्रभवाब्धौ ।
दुःखनिधौ च चिरं पतितं कृपयाद्य समुद्धर राम ततो माम्
त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ ५ ॥

संसृतिघोरमदोत्कटकुञ्जर तृट्क्षुदनीरदपिण्डिततुण्डं
दण्डकरोन्मथितं च रजस्तमउन्मदमोहपदोज्झितमार्तम् ।
दीनमनन्यगतिं कृपणं शरणागतमाशु विमोचय मूढम्

त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ ६ ॥

जन्मशतार्जितपापसमन्वितहृत्कमले पतिते पशुकल्पे
हे रघुवीर महारणधीर दयां कुरु मय्यतिमन्दमनीषे ।
त्वं जननी भगिनी च पिता मम तावदसि त्ववितापि कृपालो
त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ ७ ॥

त्वां तु दयालुमकिञ्चनवत्सलमुत्पलहारमपारमुदारं
राम विहाय कमन्यमनामयमीश जनं शरणं ननु यायाम् ।
त्वत्पदपद्ममतः श्रितमेव मुदा खलु देव सदैव ससीत
त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ॥ ८ ॥

यः करुणामृतसिन्धुरनाथजनोत्तमबन्धुरजोत्तमकारी
भक्तभयोर्मिभवाब्धितरिः सरयूतटिनीतटचारुविहारी ।
तस्य रघुप्रवरस्य निरन्तरमष्टकमेतदनिष्टहरं वै
यस्तु पठेदमरः स नरो लभतेऽच्युतरामपदाम्बुजदास्यम् ॥ ९ ॥

***

७. श्रीरामचन्द्रस्तुतिः

(गोस्वामि तुलसीदासकृतम्)

नमामि भक्तवत्सलं कृपालुशीलकोमलं
भजामि ते पदाम्बुजं अकामिनां स्वधामदम् ।
निकामश्यामसुन्दरं भवाम्बुनाथमन्दरं
प्रफुल्लकञ्जलोचनं मदादिदोषमोचनम् ॥ १ ॥

प्रलम्बबाहुविक्रमं प्रभोऽप्रमेयवैभवं
निषङ्गचापसायकं धरं त्रिलोकनायकम् ।
दिनेशवंशमण्डनं महेशचापखण्डनं
मुनीन्द्रसन्तरञ्जनं सुरारिवृन्दभञ्जनम् ॥ २ ॥

मनोजवैरिवन्दितं अजादिदेवसेवितं

विशुद्धबोधविग्रहं समस्तदूषणापहम् ।
नमामि इन्दिरापतिं सुखाकरं सतां गतिं
भजे सशक्तिसानुजं शचीपतिप्रियानुजम् ॥ ३ ॥

त्वदङ्घ्रिमूल ये नरा भजन्ति हीनमत्सराः
पतन्ति नो भवार्णवे वितर्कवीचिसङ्कुले ।
विविक्तवासिनः सदा भजन्ति मुक्तये मुदा
निरस्य इन्द्रियादिकं प्रयान्ति ते गतिं स्वकाम् ॥ ४ ॥

त्वमेकमद्भुतं प्रभुं निरीहमीश्वरं विभुं
जगत्गुरुं च शाश्वतं तुरीयमेव केवलम् ।
भजामि भाववल्लभं कुयोगिनां सुदुर्लभं
स्वभक्तकल्पपादपं समस्तसेव्यमन्वहम् ॥ ५ ॥

अनूपरूपभूपतिं नतोऽहमुर्विजापतिं
प्रसीद मे नमामि ते पदाब्जभक्तिं देहि मे ।
पठन्ति ये स्तवं इदं नरादरेण ते पदं
व्रजन्ति नात्र संशयस्त्वदीयभावसंयुतम् ॥ ६ ॥

***

८. श्रीराममङ्गलाशासनम्

(श्रीवरवरमुनिस्वामिकृतम्)

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्ति तनूजाय सार्वभौमाय मङ्गलम् ॥ १ ॥

वेदवेदान्तवेद्याय मेघश्यामलरूपिणे ।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥ २ ॥

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः ।
भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥ ३ ॥

पितृभक्ताय सततं भ्रातृभिः सह सीतया ।
नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥४ ॥

त्यक्तसाकेतवासाय चित्रकूटविहारिणे ।
सेव्याय सर्वयमिनां धीरोदात्ताय मङ्गलम् ॥ ५ ॥

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।
संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ ६ ॥

दण्डकारण्यवासाय खरदूषणशत्रवे ।
गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ ७ ॥

सादरं शबरीदत्तफलमूलाभिलाषिणे ।
सौलभ्य परिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ ८ ॥

हनुमत्समवेताय हरीशाभीष्टदायिने ।
वालिप्रमथनायास्तु महाधीराय मङ्गलम् ॥ ९ ॥

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।
जितराक्षसराजाय रणधीराय मङ्गलम् ॥ १० ॥

विभीषणकृते प्रीत्या लङ्काभीष्टप्रदायिने ।
सर्वलोकशरण्याय राघवायाऽस्तु मङ्गलम् ॥ ११ ॥

असाद्य नगरीं रम्यां अभिषिक्ताय सीतया ।
राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ १२ ॥

ब्रह्मादिदेवसेव्याय ब्रह्मण्याय महात्मने ।
जानकीप्राणनाथाय रघुनाथाय मङ्गलम् ॥ १३ ॥

श्रीसौम्यजामातृमुनेः कृपयास्मानुपेयुषे ।
महते मम नाथाय रघुनाथाय मङ्गलम् ॥ १४ ॥

मङ्गलाशासनपरैः मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १५ ॥

रम्यजामातृमुनिना मङ्गलाशासनं कृतम् ।
त्रैलोक्याधिपतिः श्रीमान् करोतु मङ्गलं सदा ॥ १६ ॥

***

९. श्रीरामप्रेमाष्टकम्
(यामुनाचार्यकृतम्)

श्यामाम्बुदाभमरविन्दविशालनेत्रं
बन्धूकपुष्पसदृशाधरपाणिपादम् ।
सीतासहायमुदितं धृतचापबाणं
रामं नमामि शिरसा रमणीयवेषम् ॥ १ ॥

पटुजलधरधीरध्वानमादाय चापं
पवनदमनमेकं बाणमाकृष्य तूणात् ।
अभयवचनदायी सानुजः सर्वतो मे
रणहतदनुजेन्द्रो रामचन्द्रः सहायः ॥ २ ॥

दशरथकुलदीपोऽमेयबाहुप्रतापो
दशवदनसकोपः क्षालिताशेषपापः ।
कृतसुररिपुतापो नन्दितानेकभूपो
विगततिमिरपङ्क्तो रामचन्द्रः सहायः ॥ ३ ॥

कुवलयदलनीलः कामितार्थप्रदो मे
कृतमुनिजनरक्षो रक्षसामेकहन्ता ।
अपहृतदुरितोऽसौ नाममात्रेण पुंसा–

मखिलसुरनृपेन्द्रो रामचन्द्रः सहायः ॥ ४ ॥

असुरकुलकृशानुर्मानसाम्भोजभानुः
सुरनरनिकराणामग्रणीर्मे रघूणाम् ।
अगणितगुणसीमा नीलमेघौघधामा
शमदमितमुनीन्द्रो रामचन्द्रः सहायः ॥ ५ ॥

कुशिकतनययागं रक्षिता लक्ष्मणाढ्यः
पवनशरनिकायक्षिप्तमारीचमायः ।
विदलितहरचापो मेदिनीनन्दनाया
नयनकुमुदचन्द्रो रामचन्द्रः सहायः ॥ ६ ॥

पवनतनयहस्तन्यस्तपादाम्बुजात्मा
कलशभववचोभिः प्राप्तमाहेन्द्रधन्वा ।
अपरिमितशरौघैः पूर्णतूणीरधीरो
लघुनिहतकपीन्द्रो रामचन्द्रः सहायः ॥ ७ ॥

कनकविमलकान्त्या सीतयालिङ्गिताङ्गो
मुनिमनुजवरेण्यः सर्ववागीशवन्द्यः ।
स्वजननिकरबन्धुर्लीलया बद्धसेतुः
सुरमनुजकपीन्द्रो रामचन्द्रः सहायः ॥ ८ ॥

यामुनाचार्यकृतं दिव्यं रामाष्टकमिदं शुभम् ।
यः पठेत् प्रयतो भूत्वा स श्रीरामान्तिकं व्रजेत् ॥ ९ ॥

***

१०. श्रीरामचन्द्राष्टकम्

(श्री अमरदासकविकृतम्)

चिदाकारो धाता परमसुखदः पावनतनु–
र्मुनीन्द्रैर्योगीन्द्रैर्यतिपतिसुरेन्द्रैर्हनुमता ।

सदा सेव्यः पूर्णो जनकतनयाङ्गः सुरगुरुः
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ १ ॥

मुकुन्दो गोविन्दो जनकतनयालालितपदः
पदं प्राप्ता यस्याधमकुलभवा चापि शबरी ।
गिरातीतोऽगम्यो विमलधिषणैर्वेदवचसा
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ २ ॥

धराधीशोऽधीशः सुरनरवराणां रघुपतिः
किरीटी केयूरी कनककपिशः शोभितवपुः ।
समासीनः पीठे रविशतनिभे शान्तमनसो
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ३ ॥

वरेण्यः शारण्यः कपिपतिसखश्चान्तविधुरो
ललाटे काश्मीरो रुचिरगतिभङ्गः शशिमुखः ।
नराकारो रामो यतिपतिनुतः संसृतिहरो
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ४ ॥

विरूपाक्षः काश्यामुपदिशति यन्नाम शिवदं
सहस्रं यन्नाम्नां पठति गिरिजा प्रत्युषसि वै ।
स्वलोकेगायान्तीश्वरविधिमुखा यस्य चरितं
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ५ ॥

परो धीरोऽधीरोऽसुरकुलभवश्चासुरहरः
परात्मा सर्वज्ञो नरसुरगणैर्गीतसुयशाः ।
अहल्याशापघ्नः शरकर ऋजुः कौशिकसखो
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ६ ॥

हृषीकेशः शौरिर्धरणिधरशायी मधुरिपु–
रुपेन्द्रो वैकुण्ठो गजरिपुहरस्तुष्टमनसा ।
बलिध्वंसी वीरो दशरथसुतो नीतिनिपुणो

रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ७ ॥

कविः सौमित्रीड्यः कपटमृगधावी वनचरो
रणश्लाघी दान्तो धरणिभरहर्ता सुरनुतः ।
अमानी मानज्ञो निखिलजनपूज्यो हृदिशयो
रमानाथो रामो रमतु मम चित्ते तु सततम् ॥ ८ ॥

इदं रामस्तोत्रं वरममरदासेन रचित–
मुषःकाले भक्त्या यदि पठति यो भावसहितम् ।
मनुष्यः स क्षिप्रं जनिमृतिभयं तापजनकं
परित्यज्य श्रेष्ठं रघुपतिपदं याति विशदम् ॥ ९ ॥

***

११. श्रीरामाष्टकम्

(श्री व्यासविरचितम्)

भजे विशेषसुन्दरं समस्तपापखण्डनम् ।
स्वभक्तचित्तरञ्जनं सदैव राममद्वयम् ॥ १ ॥

जटाकलापशोभितं समस्तपापनाशकं ।
स्वभक्तभीतिभञ्जनं भजे ह राममद्वयम् ॥ २ ॥

निजस्वरूपबोधकं कृपाकरं भवापहम् ।
समं शिवं निरञ्जनं भजे ह राममद्वयम् ॥ ३ ॥

सहप्रपञ्चकल्पितं ह्यनामरूपवास्तवम् ।
निराकृतिं निरामयं भजे ह राममद्वयम् ॥ ४ ॥

निष्प्रपञ्चनिर्विकल्पनिर्मलं निरामयम् ।
चिदेकरूपसन्ततं भजे ह राममद्वयम् ॥ ५ ॥

भवाब्धिपोतरूपकं ह्यशेषदेहकल्पितम् ।
गुणाकरं कृपाकरं भजे ह राममद्वयम् ॥ ६ ॥

महावाक्यबोधकैर्विराजमानवाक्पदैः ।
परं ब्रह्मसद्व्यापकं भजे ह राममद्वयम् ॥ ७ ॥

शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम् ।
विराजमानदेशिकं भजे ह राममद्वयम् ॥ ८ ॥

रामाष्टकं पठति यस्सुखदं सुपुण्यं
व्यासेन भाषितमिदं शृणुते मनुष्यः
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
संप्राप्य देहविलये लभते च मोक्षम् ॥ ९ ॥

***

१२. श्रीराघवाष्टकम्

राम राम नमोऽस्तु ते जय रामभद्र नमोऽस्तु ते
रामचन्द्र नमोऽस्तु ते जय राघवाय नमोऽस्तु ते ।
देवदेव नमोऽस्तु ते जय देवराज नमोऽस्तु ते
वासुदेव नमोऽस्तु ते जय वीरराज नमोऽस्तु ते ॥ १ ॥

राघवं करुणाकरं मुनिसेवितं सुरवन्दितं
जानकीवदनारविन्ददिवाकरं गुणभाजनम् ।
वालिसूनुभृदीक्षणं हनुमत्प्रियं कमलेक्षणं
यातुधानभयंकरं प्रणमामि राघवकुञ्जरम् ॥ २ ॥

मैथिलीकुचभूषणामलनीलमौक्तिकमीश्वरं
रावणानुजपालनं रघुपुङ्गवं मम दैवतम् ।
मेदिनीतनयामुखाम्बुजबोधकारिदिवाकरं
सूर्यवंशविवर्द्धनं प्रणमामि राघवकुञ्जरम् ॥ ३ ॥

हेमकुण्डलमण्डितामलगण्डदेशमरिन्दमं
शातकुंभमयूरनेत्रविभूषणेन विभूषितम् ।
चारुनूपुरहारकौस्तुभकर्णभूषणभूषितं
भानुवंशविवर्द्धनं प्रणमामि राघवकुञ्जरम् ॥ ४ ॥

दण्डकाख्यवने रतं सुरसिद्धयोगिगणाश्रयं
शिष्टपालनतत्परं धृतिशालिवालिकृतस्तुतिम् ।
कुंभकर्णभुजाभुजङ्गविकर्तने सुविशारदं
लक्ष्मणानुजवत्सलं प्रणमामि राघवकुञ्जरम् ॥ ५ ॥

केतकीकरवीरजातिसुगन्धमाल्यसुशोभितं
श्रीधरं मिथिलात्मजाकुचकुङ्कुमारुणवक्षसं ।
देवदेवमशेषभूतमनोहरं जगतां पतिं
दासभूतजनावनं प्रणमामि राघवकुञ्जरम् ॥ ६ ॥

यागदानसमाधिहोमजपादिकर्मकरैर्द्विजैः
वेदपारगतैरहर्निशमादरेण सुपूजितं ।
ताटकावधधीरमङ्गदनाथवालिनिषूदनं
पैतृकोदितपालकं प्रणमामि राघवकुञ्जरम् ॥ ७ ॥

लीलया खरदूषणादिनिशाचरासुविनाशिनं
रावणान्तकमच्युतं हरियूथकोटिसमावृतं ।
नीरजाननमम्बुजाङ्घ्रियुगं हरिं भुवनाश्रयं
देवकार्यविचक्षणं प्रणमामि राघवकुञ्जरम् ॥ ८ ॥

कौशिकेन सुशिक्षितास्त्रकलापमायतलोचनं
चारुहासमनाथबन्धुमशेषलोकनिवासिनं ।
वासवादिसुरारिरावणशासनं च परां गतिं
नीलमेघनिभाकृतिं प्रणमामि राघवकुञ्जरम् ॥ ९ ॥

राघवाष्टकमिष्टसिद्धिदमच्युतालयसाधकं
भुक्तिमुक्तिफलप्रदं धनधान्यपुत्रविवर्धनम् ।
रामचन्द्रकृपाकटाक्षदमादरेण सदा पठेत्
रामचन्द्रपदाम्बुजद्वयसन्ततार्पितमानसः ॥ १० ॥

निगमसरसिरत्नं नित्यमासक्तरत्नं
निखिलसुकृतिरत्नं जानकीरूपरत्नम् ।
भुवनवलयरत्नं भूभृतामेकरत्नं
प्रकृतिसुलभरत्नं मैथिलीप्राणरत्नम् ॥ ११ ॥

१३. श्रीरामभुजङ्गप्रयातस्तोत्रम्

(श्री शंकराचार्यकृतम्)

विशुद्धं परं सच्चिदानन्दरूपं
गुणाधारमाधारहीनं वरेण्यम् ।
महान्तं विभान्तं गुहान्तं गुणान्तं
सुखान्तं स्वयं धाम रामं प्रपद्ये ॥ १ ॥

शिवं नित्यमेकं विभुं तारकाख्यं
सुखाकारमाकारशून्यं सुमान्यम् ।
महेशं कलेशं सुरेशं परेशम्
नरेशं निरीशं महीशं प्रपद्ये ॥ २ ॥

यदावर्णयत्कर्णमूलेऽन्तकाले
शिवो रामरामेति रामेति काश्याम् ।
तदेकं परं तारकब्रह्मरूपं
भजेऽहं भजेऽहं भजेऽहं भजेऽहं ॥ ३ ॥

महारत्नपीठे शुभे कल्पमूले
सुखासीनमादित्यकोटिप्रकाशम् ।

सदा जानकीलक्ष्मणोपेतमेकं
सदा रामचन्द्रं भजेऽहं भजेऽहं ॥ ४ ॥

क्वणद्रत्नमञ्जीरपादारविन्दं
लसन्मेखलाचारुपीताम्बराढ्यम् ।
महारत्नहारोल्लसत्कौस्तुभाङ्गं
नदच्चञ्चरीमञ्जरीलोलमालम् ॥ ५ ॥

लसच्चन्द्रिकास्मेरशोणाधराभं
समुद्यत्पतङ्गेन्दुकोटिप्रकाशम् ।
नमद्ब्रह्मरुद्रादिकोटीररत्न–
स्फुरत्कान्तिनीराजनाराधिताङ्घ्रिम् ॥ ६ ॥

पुरः प्राञ्जलीनाञ्जनेयादिभक्तान्
स्वचिन्मुद्रया भद्रया बोधयन्तम् ।
भजेऽहं भजेऽहं सदा रामचन्द्रं
त्वदन्यं न मन्ये न मन्ये न मन्ये ॥ ७ ॥

यदा मत्समीपं कृतान्तः समेत्य
प्रचण्डप्रकोपैर्भटैर्भीषयेन्माम् ।
तदाविष्करोषि त्वदीयं स्वरूपं
सदापत्प्रणाशं सकोदण्डबाणम् ॥ ८ ॥

निजे मानसे मन्दिरे सन्निधेहि
प्रसीद प्रसीद प्रभो रामचन्द्र ।
ससौमित्रिणा कैकयीनन्दनेन
स्वशक्त्यानुभक्त्या च संसेव्यमान ॥ ९ ॥

स्वभक्ताग्रगण्यैः कपीशैर्महीशै–
रनीकैरनेकैश्च राम प्रसीद ।
नमस्ते नमोऽस्त्वीश राम प्रसीद

प्रशाधि प्रशाधि प्रकाशं प्रभो माम् ॥ १० ॥

त्वमेवासि दैवं परं मे यदेकं
सुचैतन्यमेतत्त्वदन्यं न मन्ये ।
यतोऽभूदमेयं वियद्वायुतेजो–
जलोर्व्यादिकार्यं चरं चाचरं च ॥ ११ ॥

नमः सच्चिदानन्दरूपाय तस्मै
नमो देवदेवाय रामाय तुभ्यम् ।
नमो जानकीजीवितेशाय तुभ्यं
नमः पुण्डरीकायताक्षाय तुभ्यम् ॥ १२ ॥

नमो भक्तियुक्तानुरक्ताय तुभ्यम्
नमः पुण्यपुञ्जैकलभ्याय तुभ्यम् ।
नमो वेदवेद्याय चाद्याय पुंसे
नमः सुन्दरायेन्दिरावल्लभाय ॥ १३ ॥

नमो विश्वकर्त्रे नमो विश्वहर्त्रे
नमो विश्वभोक्त्रे नमो विश्वमात्रे ।
नमो विश्वनेत्रे नमो विश्वजेत्रे
नमो विश्वपित्रे नमो विश्वमात्रे ॥ १४ ॥

नमस्ते नमस्ते समस्तप्रपञ्च–
प्रभोगप्रयोगप्रमाणप्रवीण ।
मदीयं मनः त्वत्पदद्वन्द्वसेवां
विधातुं प्रवृतं सुचैतन्यसिद्ध्यै ॥ १५ ॥

शिलापि त्वदङ्घ्रिक्षमासङ्गिरेणु–
प्रसादाद्धि चैतन्यमाधत्त राम ।
नरस्त्वत्पदद्वन्द्वसेवाविधाना–
त्सुचैतन्यमेतीति किं चित्रमत्र ॥ १६ ॥

पवित्रं चरित्रं विचित्रं त्वदीयं
नरा ये स्मरन्त्यन्वहं रामचन्द्र ।
भवन्तं भवान्तं भरन्तं भजन्तो
लभन्ते कृतान्तं न पश्यन्त्यतोऽन्ते ॥ १७ ॥

स पुण्यः स गण्यः शरण्यो ममायं
नरो वेद यो देवचूडामणिं त्वाम् ।
सदाकारमेकं चिदानन्दरूपं
मनोवागगम्यं परं धाम राम ॥ १८ ॥

प्रचण्डप्रतापप्रभावाभिभूत–
प्रभूतारिवीर प्रभो रामचन्द्र ।
बलं ते कथं वर्ण्यतेऽतीव बाल्ये
यतोऽखण्डि चण्डीशकोदण्डदण्डम् ॥ १९ ॥

दशग्रीवमुग्रं सपुत्रं समित्रं
सरिद्दुर्गमध्यस्थरक्षोगणेशम् ।
भवन्तं विना राम वीरो नरो वाऽ–
सुरो वामरो वा जयेत् कस्त्रिलोक्याम् ॥ २० ॥

सदा राम रामेति रामामृतं ते
सदा राममानन्दनिष्यन्दकन्दम् ।
पिबन्तं नमन्तं सुदन्तं हसन्तं
हनुमन्तमन्तर्भजे तं नितान्तम् ॥ २१ ॥

सदा राम रामेति रामामृतं ते
सदा राममानन्दनिष्यन्दकन्दम् ।
पिबन्नन्वहं नन्वहं नैव मृत्योर्–
बिभेमि प्रसादादसादात्तवैव ॥ २२ ॥

असीतासमेतैरकोदण्डभूषै–
रसौमित्रिवन्द्यैरचण्डप्रतापैः ।
अलङ्केशकालैरसुग्रीवमित्रै–
रामाभिधेयैरलं दैवतैर्नः ॥ २३ ॥

अवीरासनस्थैरचिन्मुद्रिकाढ्यै–
रभक्ताञ्जनेयादितत्वप्रकाशैः ।
अमन्दारमूलैरमन्दारमालै–
रामाभिधेयैरलं दैवतैर्नः ॥ २४ ॥

असिन्धुप्रकोपैरवन्द्यप्रतापै–
रबन्धुप्रयाणैरमन्दस्मिताढ्यैः ।
अदण्डप्रवासैरखण्डप्रबोधै–
रामाभिधेयैरलं दैवतैर्नः ॥ २५ ॥

हरे राम सीतापते रावणारे
खरारे मुरारेऽसुरारे परेति ।
लपन्तं नयन्तं सदाकालमेवं
समालोकयालोकयाशेषबन्धो ॥ २६ ॥

नमस्ते सुमित्रासुपुत्राभिवन्द्य
नमस्ते सदा कैकयीनन्दनेड्य ।
नमस्ते सदा वानराधीशवन्द्य
नमस्ते नमस्ते सदा रामचन्द्र ॥ २७ ॥

प्रसीद प्रसीद प्रचण्डप्रताप
प्रसीद प्रसीद प्रचण्डारिकाल ।

प्रसीद प्रसीद प्रपन्नानुकंपिन्

प्रसीद प्रसीद प्रभो रामचन्द्र ॥ २८ ॥

भुजङ्गप्रयातं परं वेदसारं
मुदा रामचन्द्रस्य भक्त्या च नित्यम् ।
पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे
स एव स्वयं रामचन्द्रः स धन्यः ॥ २९ ॥

***

१४. श्रीसीतारामस्तोत्रम्

अयोध्यापुरनेतारं मिथिलापुरनायिकाम् ।
रघावाणामलङ्कारं वैदेहानामलङ्क्रियाम् ॥ १ ॥

रघूणां कुलदीपं च निमीनां कुलदीपिकाम् ।
सूर्यवंशसमुद्भूतं सोमवंशसमुद्भवाम् ॥ २ ॥

पुत्रं दशरथस्याद्यं पुत्रीं जनकभूपतेः ।
वसिष्ठानुमताचारं शतानन्दमतानुगाम् ॥ ३ ॥

कौसल्यागर्भसंभूतं वेदिगर्भोदितां स्वयम् ।
पुण्डरीकविशालाक्षं स्फुरदिन्दीवरेक्षणाम् ॥ ४ ॥

चन्द्रकान्ताननाम्भोजं चन्द्रबिम्बोपमाननाम् ।
मत्तमातङ्गगमनं मत्तहंसवधूगताम् ॥ ५ ॥

चन्दनार्द्रभुजामध्यं कुंकुमार्द्रकुचस्थलीम् ।
चापालंकृतहस्ताब्जं पद्मालंकृतपाणिकाम् ॥ ६ ॥

शरणागतगोप्तारं प्रणिपातप्रसादिकाम् ।
कालमेघनिभं रामं कार्तस्वरसमप्रभाम् ॥ ७ ॥

दिव्यसिंहासनासीनं दिव्यस्रग्वस्त्रभूषणाम् ।
अनुक्षणं कटाक्षाभ्यां अन्योन्येक्षणकांक्षिणौ ॥ ८ ॥

अन्योन्यसदृशाकारौ त्रैलोक्यगृहदंपती ।
इमौ युवां प्रणम्याहं भजाम्यद्य कृतार्थताम् ॥ ९ ॥

अनेन स्तौति यः स्तुत्यं रामं सीतां च भक्तितः ।
तस्य तौ तनुतां पुण्यास्संपदः सकलार्थदाः ॥ १० ॥

१५. श्रीनामरामायणम्

(बालकाण्डम्)

शुद्धब्रह्मपरात्पर राम
कालात्मक परमेश्वर राम ।
शेषतल्प सुखनिद्रित राम
ब्रह्माद्यमरप्रार्थित राम ॥ १ ॥

चण्डकिरणकुलमण्डन राम
श्रीमद्दशरथनन्दन राम ।
कौसल्यासुखवर्धन राम
विश्वामित्रप्रियधन राम ॥ २ ॥

घोरताटकाघातक राम
मारीचादिनिपातक राम ।
कौशिकमखसंरक्षक राम
श्रीमदहल्योद्धारक राम ॥ ३ ॥

गौतममुनिसंपूजित राम
सुरमुनिवरगणसंस्तुत राम ।
नाविकधावितमृदुपद राम

मिथिलापुरजनमोदक राम ॥ ४ ॥

मैथिलिमानसरञ्जक राम
त्र्यैम्बककार्मुकभञ्जन राम ।
सीतार्पितवरमालिक राम
कृतवैवाहिककौतुक राम ॥ ५ ॥

भार्गवदर्पविनाशक राम
श्रीमदयोध्यापालक राम ॥ ६ ॥

(अयोद्ध्याकाण्डम्)

अगणितगुणगणभूषित राम
अवनीतनयाकामित राम ।
राकाचन्द्रसमानन राम
पितृवाक्यस्थितकानन राम ॥ ७ ॥

प्रियगुहविनिवेदितपद राम
तत्क्षालितनिजमृदुपद राम ।
भारद्वाजसुपूजित राम
चित्रकूटाद्रिनिकेतन राम ॥ ८ ॥

दशरथसन्ततचिन्तित राम
कैकेयीतनयार्थित राम ।
विरचितनिजपितृकर्मक राम
भरतार्पितनिजपादुक राम ॥ ९ ॥

(आरण्यकाण्डम्)

दण्डककाननपावन राम
दुष्टविराधविनाशन राम ।

शरभंगसुतीक्ष्णार्चित राम
अगस्त्यानुग्रह वर्द्धित राम ॥ १० ॥

गृध्राधिपसंसेवित राम
पंचवटीतटसुस्थित राम ।
खरदूषणमुखसूदक राम
सीताप्रियहरिणानुग राम ॥ ११ ॥

मारीचार्तिकृदाशुग राम
विनष्टसीतान्वेषक राम ।
गृध्राधिपगतिदायक राम
शबरीदत्तफलाशन राम
कबन्धबाहूच्छेदन राम ॥ १२ ॥

(किष्किन्धाकाण्डम्)

हनुमत्सेवितनिजपद राम
ातसुग्रीवाभीष्टद राम ।
गर्वितबालिनिषूदन राम
हितकरलक्ष्मणसंयुत राम ॥ १३ ॥

(सुन्दरकाण्डम्)

कपिवरसन्ततसंस्तुत राम
तत्गतिविघ्नध्वंसक राम ।
सीताप्राणाधारक राम
दुष्टदशाननदूषित राम ॥ १४ ॥

शिष्टहनूमद्भूषित राम
सीतारोदितकोपन राम ।
कृतचूडामणिदर्शन राम

कपिवरवचनाश्वासित राम ॥ १५ ॥

(युद्धकाण्डम्)

रावणनिधनप्रस्थित राम
वानरसैन्यसमावृत राम ।
शोषिततटिनीशार्थित राम
विभीषणाभयदायक राम ॥ १६ ॥

सागरसेतुनिबन्धक राम
कुंभकर्णशिरच्छेदक राम ।
राक्षससङ्घविमर्दक राम
अमहितरावण वारण राम ॥ १७ ॥

संहृतदशमुखरावण राम
विधिभवमुखसंस्तुतपद राम ।
खस्थितदशरथवीक्षित राम
सीतादर्शनमोदित राम ॥ १८ ॥

अभिषिक्तविभीषणनत राम
पुष्पकयानारोहण राम ।
भरद्वाजाभिनिषेवण राम
साकेतपुरीभूषण राम ॥ १९ ॥

सकलस्वीयसमानत राम
रत्नलसत्पीठस्थित राम ।
पट्टाभिषेकालंकृत राम
पार्थिवकुलसम्मनित राम ॥ २० ॥

कीशकुलानुग्राहक राम

सकलजगत्परिपालक राम ।
सकलाभीष्टवरप्रद राम ॥ २१ ॥

राम राम जय राजाराम्
राम राम यय सीतराम् ॥ २२ ॥

****

श्री कृष्णस्तोत्राणि

विषयसूची

पृष्ठसंख्या

१. कृष्णाष्टकम् – १
२. श्री कृष्णाष्टकम् – २
३. भींष्मकृता भगवत्स्तुतिः
४. गोविन्दाष्टकम्
५. मधुराष्टकम्
६. श्री नन्दकुमाराष्टकम्
७. चतुः श्लोकी
८. श्री कृष्णस्तोत्रम् – १
९. श्री कृष्णस्तोत्रम् – २
१०. श्री राधाकृष्णस्तोत्रम्
११. गोपिकागीतम्
१२. गोकुलेशाष्टकम्
१३. श्री कृष्णलहरीस्तोत्रम्
१४. श्री कृष्णमानसपूजास्तोत्रम्
१५. श्री वातपुरनाथाष्टकम्
१६. श्री गुरुवातपुरनाथपंचरत्नस्तोत्रम्
१७. श्री कृष्णकेशादिपादवर्णनस्तोत्रम्
१८. श्री कृष्णाष्टकम् – ३
१९. मुकुन्दाष्टकम्
२०. गोविन्ददामोदरस्तोत्रम्

***

१. कृष्णाष्टकम्

(श्री शंकराचार्यकृतं)

श्रियाश्लिष्टो विष्णुः स्थिरचरवपुर्वेदविषयो
धियां साक्षी शुद्धो हरिरसुरहन्ताब्जनयनः ।
गदी शङ्खी चक्री विमलवनमाली स्थिररुचिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ १ ॥

यतः सर्वं जातं वियदनिलमुख्यं जगदिदं
स्थितौ निःशेषं योऽवति निजसुखांशेन मधुहा ।
लये सर्वं स्वस्मिन् हरति कलया यस्तु स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ २ ॥

असूनायम्यादौ यमनियममुख्यैः सुकरणैः
निरुध्येदं चित्तं हृदि विलयमानीय सकलम् ।
यमीड्यं पश्यन्ति प्रवरमतयो मायिनमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ३ ॥

पृथिव्यां तिष्ठन् यो यमयति महीं वेद न धरा
यमित्यादौ वेदो वदति जगतामीशममलम् ।
नियन्तारं ध्येयं मुनिसुरनृणां मोक्षदमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ४ ॥

महेन्द्रादिर्देवो जयति दितिजान्यस्य बलतो
न कस्य स्वातन्त्र्यं क्वचिदपि कृतौ यत्कृतिमृते ।
बलारातेर्गर्वं परिहरति योऽसौ विजयिनः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ५ ॥

विना यस्य ध्यानं व्रजति पशुतां सूकरमुखाम्
विना यस्य ज्ञानं जनिमृतिभयं याति जनता ।
विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ६ ॥

नरातङ्कोत्तङ्कः शरणशरणो भ्रान्तिहरणो
घनश्यामो वामो व्रजशिशुवयस्योऽर्जुनसखः ।
स्वयंभूर्भूतानां जनक उचिताचारसुखदः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ७ ॥

यदा धर्मग्लानिर्भवति जगतां क्षोभणकरी
तदा लोकस्वामी प्रकटितवपुः सेतुधृगजः ।
सतां धाता स्वच्छो निगमगणगीतो व्रजपतिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ८ ॥

इति हरिरखिलात्माराधितः शङ्करेण
श्रुतिविशदगुणोऽसौ मातृमोक्षार्थमाद्यः ।
यतिवरनिकटे श्रीयुक्त आविर्बभूव
स्वगुणवृत उदारः शङ्खचक्राब्जहस्तः ॥ ९ ॥

***

२. श्रीकृष्णाष्टकम्

(श्री शंकराचार्यकृतम्)

भजे व्रजैकमण्डनं समस्तपापखण्डनं
स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम् ।
सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं
अनंगरंगसागरं नमामि कृष्णनागरम् ॥ १ ॥

मनोजगर्वमोचनं विशाललोललोचनं

विधूतगोपशोचनं नमामि पद्मलोचनम् ।
करारविन्दभूधरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम् ॥ २ ॥

कदम्बसूनकुण्डलं सुचारुगण्डमण्डलं
व्रजाङ्गनैकवल्लभं नमामि कृष्ण दुर्लभम् ।
यशोदया समोदया सगोपया सनन्दया
युतं सुखैकदायकं नमामि गोपनायकम् ॥ ३ ॥

सदैव पादपङ्कजं मदीयमानसे निजं
दधानमुत्तमालकं नमामि नन्दबालकम्
समस्तदोषशोषणं समस्तलोकपोषणं
समस्तगोपमानसं नमामि नन्दलालसम् ॥ ४ ॥

भुवोभरावतारकं भवाब्धिकर्णधारकं
यशोमतीकिशोरकं नमामि चित्तचोरकम् ।
दृगन्तकान्तभङ्गिनं सदासदालसङ्गिनं
दिने दिने नवं नवं नमामि नन्दसंभवम् ॥ ५ ॥

गुणाकरं सुखाकरं कृपाकरं कृपापरं
सुरद्विषन्निकन्दनं नमामि गोपनन्दनम् ।
नवीनगोपनागरं नवीनकेलिलंपटं
नमामि मेघसुन्दरं तटित्प्रभालसत्पटम् ॥ ६ ॥

समस्तगोपनन्दनं हृदंबुजैकमोदनं
नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम् ।
निकामकामदायकं दृगन्तचारुसायकं
रसालवेणुगायकं नमामि कुञ्जनायकम् ॥ ७ ॥

विदग्धगोपिकामनोमनोज्ञतल्पशायिनं
नमामि कुञ्जकानने प्रवृद्धवह्निपायिनम् ।

यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम् ॥ ८ ॥

प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान् ।
भवेत्स नन्दनन्दने भवे भवे सुभक्तिमान् ॥ ९ ॥

***

३. भीष्मकृता भगवत्स्तुतिः

(श्रीमद्भागवतान्तर्गतम्)

भीष्म उवाच
इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं
प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ १ ॥

त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं
विजयसखे रतिरस्तुमेऽनवद्या ॥ २ ॥

युधि तुरगरजोविधूम्रविष्वक्–
कचलुलितश्रमवार्यलङ्कृतास्ये ।
मम निशितशरैर्विभिध्यमान–
त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥ ३ ॥

सपदि सखि वचो निशम्य मध्ये
निजपरयोर्बलयो रथं निवेश्य ।
स्थितवति परसैनिकायुरक्ष्णा
हृतवति पार्थसखे रतिर्ममास्तु ॥ ४ ॥

व्यवहितपृतनामुखं निरीक्ष्य
स्वजनवधाद्विमुखस्य दोषबुद्ध्या ।
कुमतिमहरदात्मविद्यया यः
चरणरतिः परमस्य तस्य मेऽस्तु ॥ ५ ॥

स्वनिगममपहाय मत्प्रतिज्ञा–
मृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्गु–
र्हरिरिव हन्तुमिभं गतोत्तरीयः ॥ ६ ॥

शितविशिखहतो विशीर्णदंशः
क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थं
स भवतु मे भगवान् गतिर्मुकुन्दः ॥ ७ ॥

ललितगतिविलासवल्गुहास–
प्रणयनिरीक्षणकल्पितोरुमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः
प्रकृतिमगन्किल यस्य गोपवध्वः ॥ ८ ॥

मुनिगणनृपवर्यसङ्कुलेऽन्तः–
सदसि युधिष्ठिरराजसूय एषाम् ।
अर्हणमुपपेद ईक्षणीयो
मम दृशिगोचर एष आविरात्मा ॥ ९ ॥

तमिममहमजं शरीरभाजां
हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधार्कमेकं
समधिगतोऽस्मि विधूत भेदमोहः ॥ १० ॥

***

४. गोविन्दाष्टकम्

(श्री शंकराचार्यकृतम्)

चिदानन्दाकारं श्रुतिसरससारं समरसं
निराधाराधारं भवजलधिपारं परगुणम् ।
रमाग्रीवाहारं व्रजवनविहारं हरनुतं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ १ ॥

महांभोधिस्थानं स्थिरचरनिदानं दिविजपं
सुधाधारापानं विहगपतियानं यमरतम् ।
मनोज्ञं सुज्ञानं मुनिजननिधानं ध्रुवपदं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ २ ॥

धिया धीरैर्ध्येयं श्रवणपुटपेयं यतिवरै–
र्महावाक्यैर्ज्ञेयं त्रिभुवनविधेयं विधिपरम् ।
मनोमानामेयं सपदि हृदि नेयं नवतनुं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ३ ॥

महामायाजालं विमलवनमालं मलहरं
सुभालं गोपालं निहतशिशुपालं शशिमुखम् ।
कलातीतं कालं गतिहतमरालं मुररिपुं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ४ ॥

नभोबिम्बस्फीतं निगमगणगीतं समगतिं
सुरौघैः संप्रीतं दितिजविपरीतं पुरिशयम् ।
गिरां मार्गातीतं स्वदितनवनीतं नयकरं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ५ ॥

परेशं पद्मेशं शिवकमलजेशं शिवकरं

द्विजेशं देवेशं तनुकुटिलकेशं कलिहरम् ।
खगेशं नागेशं निखिलभुवनेशं नगधरं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ६ ॥
रमाकान्तं कान्तं भवमयभयान्तं भवसुखं
दुराशान्तं दान्तं निखिलहृदिभान्तं भुवनपम् ।
विवादान्तं दान्तं दनुजनिचयान्तं सुचरितं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ७ ॥

जगज्ज्येष्ठं श्रेष्ठं सुरपतिकनिष्ठं ऋतुपतिं
बलिष्ठं भूयिष्ठं त्रिभुवनवरिष्ठं वरवहम् ।
स्वनिष्ठं धर्मिष्ठं गुरुगुणगरिष्ठं गुरुवरं
सदा तं गोविन्दं परमसुखकन्दं भजत रे ॥ ८ ॥

गदापाणेरेतद्दुरितदलनं दुःखशमनं
विशुद्धात्मा स्तोत्रं पठति मनुजो यस्तु सततम् ।
स भुक्त्वा भोगौघं चिरमिह ततोऽपास्तवृजिनः
परं विष्णोः स्थानं व्रजति खलु वैकुण्टभुवनम् ॥ ९ ॥

***

५. मधुराष्टकम्

(वल्लभाचार्यकृतम्)

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ १ ॥

वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ २ ॥

वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ३ ॥

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ४ ॥

करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ५ ॥

गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ६ ॥

गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ७ ॥

गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ८ ॥

***

६. श्रीनन्दकुमाराष्टकम्

(वल्लभाचार्यकृतं)

सुन्दरगोपालं उरवनमालं नयनविशालं दुःखहरम्
वृन्दावनचन्द्रमानन्दकन्दं परमानन्दं धरणिधरम् ।
वल्लभघनश्यामं पूर्णकामं अत्यभिरामं प्रीतिकरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ १ ॥

सुन्दरवारिजवदनं निर्जितमदनं आनन्दसदनं मुकुटधरम्
गुञ्जाकृतिहारं विपिनविहारं परमोदारं चीरहरम् ।
वल्लभपटपीतं कृतउपवीतं करनवनीतं विबुधवरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ २ ॥

शोभितमुखधूलं यमुनाकूलं निपटअतूलं सुखदतरम्

मुखमण्डितरेणुं चारितधेनुं वादितवेणुं मधुरसुरम् ।
वल्लभमतिविमलं शुभपदकमलं नखरुचिअमलं तिमिरहरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ ३ ॥

शिरमुकुटसुदेशं कुञ्चितकेशं नटवरवेषं कामवरम्
मायाकृतमनुजं हलधरअनुजं प्रतिहतदनुजं भारहरम् ।
वल्लभव्रज्पालं सुभगसुचालं हितमनुकालं भाववरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ ४ ॥

इन्दीवरभासं प्रकटसुरासं कुसुमविकासं वंशिधरम्
हृतमन्मथमानं रूपनिधानं कृतकलगानं चित्तहरम् ।
वल्लभमृदुहासं कुञ्जनिवासं विविधविलासं केलिकरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ ५ ॥

परमप्रवीणं पालितदीनं भक्ताधीनं कर्मकरम्
मोहनमतिधीरं फणिबलवीरं हतपरवीरं तरलतरम् ।
वल्लभव्रजरमणं वारिजवदनं हलधरशमनं शैलधरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ ६ ॥

जलधरद्युतिअङ्गं ललितत्रिभङ्गं बहुकृतरङ्गं रसिकवरम्
गोकुलपरिवारं मदनाकारं कुञ्जविहारं गूढतरम् ।
वल्लभव्रजचन्द्रं सुभगसुछन्दं कृतआनन्दं भ्रान्तिहरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ ७ ॥

वन्दितयुगचरणं पावनकरणं जगदुद्धरणं विमलधरम्
कालियशिरगमनं कृतफणिनमनं घातितयमनं मृदुलतरम् ।
वल्लभदुःखहरणं निर्मलचरणम् अशरणशरणम् मुक्तिकरम्
भज नन्दकुमारं सर्वसुखसारं तत्वविचारं ब्रह्मपरम् ॥ ८ ॥

***

७. चतुःश्लोकी

(श्री विट्ठलेश्वरप्रोक्तम्)

सदा सर्वात्मभावेन भजनीयो व्रजेश्वरः ।
करिष्यति स एवास्मदैहिकं पारलौकिकम् ॥ १ ॥

अन्याश्रयो न कर्तव्यः सर्वथा बाधकस्तु सः ।
स्वकीये स्वात्मभावश्च कर्तव्यः सर्वथा सदा ॥ २ ॥

सदा सर्वात्मना कृष्णः सेव्यः कालादिदोषनुत् ।
तद्भक्तेषु च निर्दोषभावेन स्थेयमादरात् ॥ ३ ॥

भगवत्येव सततं स्थापनीयं मनः स्वयम् ।
कालोऽयं कठिनोऽपि श्रीकृष्णभक्तान्न बाधते ॥ ४ ॥

***

८. श्रीकृष्णस्तोत्रम्

(ब्रह्मदेवकृतम्)

रक्ष रक्ष हरे मां च निमग्नं कामसागरे ।
दुष्कीर्तिजलपूर्णे च दुष्पारे बहुसङ्कटे ॥ १ ॥

भक्तिविस्मृतिबीजे च विपत्सोपानदुस्तरे ।
अतीव निर्मलज्ञानचक्षुःप्रच्छन्नकारणे ॥ २ ॥

जन्मोर्मिसङ्गसहिते योषिन्नक्रौघसङ्कुले ।

रतिस्रोतसमायुक्ते गंभीरे घोर एव च ॥ ३ ॥

प्रथमामृतरूपे च परिणामविषालये ।
यमालय प्रवेशाय मुक्तिद्वारादिविस्मृतौ ॥ ४ ॥

बुद्ध्या तरण्या विज्ञानैः उद्धरास्मानतः स्वयं ।
स्वयं च त्वं कर्णधार प्रसीद मधुसूदन ॥ ५ ॥

मद्विधा कतिचिन्नाथ नियोज्या भवकर्मणि ।
सन्ति विश्वेश विधयो हि विश्वेश्वर माधव ॥ ६ ॥

न कर्मक्षेत्रमेवेदं ब्रह्मलोकोऽयमीप्सितः ।
तथापि च स्पृहा कामे त्वद्भक्तिव्यवधायके ॥ ७ ॥

हे नाथ करुणासिन्धो दीनबन्धो कृपां कुरु ।
त्वं महेश महाज्ञाता दुःस्वप्नं मां न दर्शय ॥ ८ ॥

ब्रह्मणा निर्मितं स्तोत्रं भक्तियुक्तश्च यः पठेत् ।
स चैवाकर्मविषये न निमग्नो भवेत् ध्रुवम् ॥ ९ ॥

***

९. श्री कृष्णस्तोत्रम्

(विप्रपत्नीकृतम्)

त्वं ब्रह्म परमं धाम निरीहो निरहंकृतिः ।
निर्गुणश्च निराकारः साकारस्सगुणः स्वयम् ॥ १ ॥

साक्षिरूपश्च निर्लिप्तः परमात्मा निराकृतिः ।
प्रकृतिः पुरुषस्त्वं च कारणं च तयोः परम् ॥ २ ॥

सृष्टिस्थित्यन्तविषये ये च देवास्त्रयः स्मृताः ।

तेे त्वदंशास्सर्वबीजाः ब्रह्मविष्णुमहेश्वराः ॥ ३ ॥

यस्य लोम्नां च विवरे चाखिलं विश्वमीश्वर ।
महाविराण् महाविष्णुः त्वं तस्य जनको विभो ॥ ४ ॥

तेजस्त्वं चापि तेजस्वी ज्ञानं ज्ञानी च तत्परः ।
वेदेऽनिर्वचनीयस्त्वं कस्त्वां स्तोतुमिहेश्वरः ॥ ५ ॥

महदादेस्सृष्टिसूत्रं पञ्चतन्मात्रमेव च ।
बीजं त्वं सर्वशक्तीनां सर्वशक्तिस्वरूपकः ॥ ६ ॥

सर्वशक्तीश्वरः सर्वः सर्वशक्त्याश्रयस्सदा ।
त्वमनीहः स्वयंज्योतिः सर्वानन्दस्सनातनः ॥ ७ ॥

अहो आकारहीनस्त्वं सर्वविग्रहवानपि ।
सर्वेन्द्रियाणां विषयं जानासि नेन्द्रियी भवान् ॥ ८ ॥

सरस्वती जडीभूता यत्स्तोत्रे यन्निरूपणे ।
जडीभूतो महेशश्च शेषो धर्मो विधिः स्वयम् ॥ ९ ॥

पार्वती कमला राधा सावित्री वेदसूरपि ।
वेदश्च जडतां याति को वा शक्ता विपश्चितः ॥ १० ॥

वयं किं स्तवनं कुर्मः स्त्रियः प्राणेश्वरेश्वर ।
प्रसन्नो भव नो देव दीनबन्धो कृपां कुरु ॥ ११ ॥

विप्रपत्नीकृतं स्तोत्रं पूजाकाले च यः पठेत् ।
स गतिं विप्रपत्नीनां लभते नात्र संशयः ॥ १२ ॥

***

१०. श्री राधाकृष्णस्तोत्रम्

(नारदपाञ्चरात्रान्तर्गतम्)

वन्दे नवघनश्यामं पीतकौशेयवाससम् ।
सानन्दं सुन्दरं शुद्धं श्रीकृष्णं प्रकृतेः परम् ॥ १ ॥

राधेशं राधिकाप्राणवल्लभं वल्लवीसुतम् ।
राधासेवितपादाब्जं राधावक्षस्थलस्थितम् ॥ २ ॥

राधानुगं राधिकेष्टं राधापहृतमानसम् ।
राधाधारं भवाधारं सर्वाधारं नमामि तम् ॥ ३ ॥

राधाहृत्पद्ममध्ये च वसन्तं सन्ततं शुभम् ।
राधासहचरं शश्वत् राधाज्ञापरिपालकम् ॥ ४ ॥

ध्यायन्ते योगिनो योगान् सिद्धाः सिद्धेश्वराश्च यम् ।
तं ध्यायेत् सततं शुद्धं भगवन्तं सनातनम् ॥ ५ ॥

निर्लिप्तं च निरीहं च परमात्मानमीश्वरम् ।
नित्यं सत्यं च परमं भगवन्तं सनातनम् ॥ ६ ॥

यः सृष्टेरादिभूतं च सर्वबीजं परात्परम् ।
योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम् ॥ ७ ॥

बीजं नानावताराणां सर्वकारणकारणम् ।
वेदवेद्यं वेदबीजं वेदकारणकारणम् ॥ ८ ॥

योगिनस्तं प्रपद्यन्ते भगवन्तं सनातनम् ।

गन्धर्वेण कृतं स्तोत्रं यः पठेत् प्रयतः शुचिः ।
इहैव जीवन्मुक्तश्च परं याति परां गतिम् ॥ ९ ॥

हरिभक्तिं हरेर्दास्यं गोलोकं च निरामयम् ।
पार्षदप्रवरत्वं च लभते नात्र संशयः ॥ १० ॥

***

११. गोपिकागीतम्
(श्रीमद्भागवतान्तर्गतम्)

जयति तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावकाः
त्वयि धृतासवः त्वां विचिन्वते ॥ १ ॥

शरदुदाशये साधुजातसत्–
सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्क दासिकाः ॥ २ ॥
वरद निघ्नतो नेह किं वधः

विषजलाप्ययात् व्यालराक्षसात्
वर्षमारुतात् वैद्युतानलात् ।
वृषमयात्मजात् विश्वतो भयात्
ऋषभ ते वयं रक्षिताः मुहुः ॥ ३ ॥

न खलु गोपिकानन्दनो भवान्
अखिल देहिनां अन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ॥ ४ ॥

विरचिताभयं वृष्णिधुर्य ते
चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदम्
शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥

व्रजजनार्तिहन् वीर योषिताम्
निजजनस्मय ध्वंसनस्मित ।
भज सखे भवत् किङ्करीः स्म नो
जलरुहाननं चारु दर्शय ॥ ६ ॥

प्रणतदेहिनां पापकर्शनम्
तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदांबुजम्
कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥

मधुरया गिरा वल्गु वाक्यया
बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमाः वीर मुह्यतीः
अधरसीधुनाऽऽप्यायस्व नः ॥ ८ ॥

तव कथामृतं तप्तजीवनम्
कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततम्
भुवि गृणन्ति ये भूरिदा जनाः ॥ ९ ॥

प्रहसितं प्रिय प्रेम वीक्षणम्
विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृहः
कुहक नो मनः क्षोभयन्ति हि ॥ १० ॥

चलसि यद्व्रजात् चारयन् पशून्

नलिन सुन्दरं नाथ ते पदं ।
शिलतृणाङ्कुरैः सीदतीति नः
कलिलतां मनः कान्त गच्छति ॥ ११ ॥

दिनपरिक्षये नीलकुन्तलैः
वनरुहाननं बिभ्रदावृतम् ।
घनरजस्वलं दर्शयन् मुहुः
मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

प्रणतकामदं पद्मजार्चितम्
धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते
रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥
सुरतवर्धनं शोकनाशनम्
स्वरितवेणुना सुष्ठुचुम्बितम् ।
इतररागविस्मारणं नृणाम्
वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥

अटति यत् भवान् अह्नि काननम्
त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते
जड उदीक्षतां पक्ष्मकृत् दृशाम् ॥ १५ ॥

पतिसुतान्वय भ्रातृबान्धवान्
अतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः
कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥

रहसि संविदं हृच्छयोदयम्
प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरः श्रियो वीक्ष्य धाम ते

मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥

व्रजवनौकसां व्यक्तिरङ्ग ते
वृजिनहन्त्र्यलं विश्वमङ्गलम् ।
त्यज मनाक् च नः त्वत्स्पृहात्मनाम्
स्वजनहृत्रुजां यन्निषूदनम् ॥ १८ ॥

यस्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तत् व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ १९ ॥

***

१२. गोकुलेशाष्टकम्

नन्दगोपभूपवंशभूषणं विभूषणं
भूमिभूतिभूरिभाग्यभाजनं भयापहम् ।
धेनुधर्मरक्षणावतीर्णपूर्णविग्रहं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ १ ॥

गोपबालसुन्दरीगणावृतं कलानिधिं
रासमण्डलीविहारकारिकामसुन्दरम् ।
पद्मयोनिशंकरादिदेवबृन्दवन्दितं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ २ ॥

गोपराजरत्नराजिमन्दिरानुरिङ्गणं
गोपबालबालिकाकुलानुरुद्धगायिनम् ।
सुन्दरीमनोजभावभाजनाम्बुजाननं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ ३ ॥

कंसकेशिकुञ्जरादिदुष्टदैत्यदारणं
इन्द्रसृष्टवृष्टिवारिवारणोद्धृताचलम् ।
कामधेनुकारिताभिधानगानशोभितं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ ४ ॥

गोपिकागृहान्तगुप्तगव्यचौर्यचञ्चलं
दुग्धभाण्डभेदभीतलज्जितास्यपङ्कजम् ।
धेनुधूलिधूसराङ्गशोभिहारनूपुरं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ ५ ॥

वत्सधेनुगोपबालभीषणास्यवह्निपं
केकिपिञ्छकल्पितावतंसशोभिताननम् ।
वेणुनादमत्तघोषसुन्दरीमनोहरं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ ६ ॥

गर्वितामरेन्द्रकल्पकल्पितान्नभोजनं
शारदारविन्दबृन्दशोभिहंसजागतम् ।
दिव्यगन्धलुब्धभृङ्गपारिजातमालिनं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ ७ ॥

वासरावसानगोष्ठगामिगोगणानुगं
धेनुदोहदेहगेहमोहविस्मयक्रियम् ।
स्वीयगोकुलेशदानदत्तभक्तरक्षणं
नीलवारिवाहकान्तिगोकुलेशमाश्रये ॥ ८ ॥

***

१३. श्रीकृष्णलहरीस्तोत्रम्

कदा बृन्दारण्ये विपुलयमुनातीरपुलिने
चरन्तं गोविन्दं हलधरसुदामादिसहितम् ।
अहो कृष्ण स्वामिन् मधुरमुरलीमोहन विभो
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ १ ॥

कदा कालिन्दीये हरिचरणमुद्राङ्किततटे
स्मरन् गोपीनाथं कमलनयनं सस्मितमुखम् ।
अहो कृष्णानन्दाम्बुजवदन भक्तैकसुलभ
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ २ ॥

कदाचित् खेलन्तं व्रजपरिसरे गोपतनयैः
कथंचित् संप्राप्तं किमपि भजतं कंजनयनम् ।
अये राधे किल हरसि रसिके कञ्चुकयुगं
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ ३ ॥

कदाचित् गोपीनां हसितचकितं स्निग्धनयनं
स्थितं गोपीवृन्दे नटमिव नटन्तं सुललितम् ।
सुराधीशैः सर्वैः स्तुतपदममुं श्रीहरिमिति
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ ४ ॥

कदाचित् कालिन्द्यां तटतरुकदंबे स्थितममुं
स्मयन्तं साकूतं हृतवसनगोपीस्तनतटम् ।
अहो शक्रानन्दांबुजवदन गोवर्द्धनधर
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ ५ ॥

कदाचित् कान्तारे विजयसखमिष्टं नृपसुतं
वदन्तं पार्थेन्द्रं नृपसुत सखे बन्धुरिति च ।
भ्रमन्तं विश्रान्तं श्रितमुरसि रम्यं हरिमहो
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥ ६ ॥

***

१४. श्रीकृष्णमानसपूजास्तोत्रम्

(श्रीशंकराचार्यविरचितम्)

हृदंभोजे कृष्णस्सजलजलदश्यामलतनुः
सरोजाक्षः स्रग्वी मकुटकटकाद्याभरणवान् ।

शरद्राकानाथप्रतिमवदनः श्रीमुरलिकां
वहन् ध्येयो गोपीगणपरिवृतः कुङ्कुमचितः ॥ १ ॥

पयांभोधेर्द्वीपात् ममहृदयमायाहि भगवन्
मणिव्रातभ्राजत् कनकवरपीठं भजहरे ।
सुचिह्नौ ते पादौ यदुकुलज नेनेज्मि सुजलैः
गृहाणेदं दूर्वादलजलवदर्घ्यं मुररिपो ॥ २ ॥

त्वमाचामोपेन्द्र त्रिदशसरिदंभोऽतिशिशिरं
भजस्वेमं पञ्चामृतरचितमाप्लावमघहन् ।
द्युनद्याः कालिन्द्या अपि कनककुंभस्थमिदं
जलं तेन स्नानं कुरु कुरु कुरुष्वाचमनकम् ॥ ३ ॥

तटिद्वर्णे वस्त्रे भज विजयकान्ताधिहरण
प्रलम्बारिभ्रातः मृदुलमुपवीतं कुरु गले ।
ललाटे पाटीरं मृगमदयुतं धारय हरे
गृहाणेदं माल्यं शतदलतुलस्यादिरचितम् ॥ ४ ॥

दशाङ्गं धूपं सद्वरद चरणाग्रेऽर्पितमिदं
मुखं दीपेनेन्दुप्रभ विरजसं देव कलये ।
इमौ पाणी वाणीपतिनुत सुकर्पूररजसा
विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे ॥ ५ ॥

सदा तृप्तान्नं षड्रसवदखिलव्यंजनयुतं
सुवर्णामत्रे गोघृतचषकयुक्ते स्थितमिदम् ।
यशोदासूनो तत् परमदययाऽशान सखिभिः
प्रसादं वाञ्छद्भिः सह तदनु नीरं पिब विभो ॥ ६ ॥

सचूर्णं ताम्बूलं मुखशुचिकरं भक्षय हरे
फलं स्वादु प्रीत्या परिमलवदास्वादय चिरम् ।
सपर्यापर्याप्त्यै कनकमणिजातं स्थितमिदं

प्रदीपैरारार्तिं जलधितनयाश्लिष्ट रचये ॥ ७ ॥

विजातीयैः पुष्पैरतिसुरभिभिर्बिल्वतुलसी–
युतैश्चेमं पुष्पाञ्जलिमजित ते मूर्ध्नि निदधे ।
तव प्रादक्षिण्यक्रमणमघविद्ध्वंसि रचितं
चतुर्वारं विष्णो जनिपथगतिश्रान्तिद विभो ॥ ८ ॥

नमस्कारोऽष्टाङ्गस्सकलदुरितध्वंसनपटुः
कृतं नृत्यं गीतं स्तुतिरपि रमाकान्त सततं ।
तव प्रीत्यै भूयादहमपि च दासस्तव विभो
कृतं छिद्रं पूर्णं कुरु कुरु नमस्तेऽस्तु भगवन् ॥ ९ ॥

सदा सेव्यः कृष्णस्सजलघननीलः करतले
दधानो दध्यन्नं तदनु नवनीतं मुरलिकाम् ।
कदाचित् कान्तानां कुचकलशपत्रालिरचना–
समासक्तः स्निग्द्धैस्सह शिशुविहारं विरचयन् ॥ १० ॥

मणिकर्णीच्छया जातमिदं मानसपूजनम् ।
यः कुर्वीतोषसि प्राज्ञः तस्य कृष्णः प्रसीदति ॥ १ ॥

***

१५. श्रीवातपुरनाथाष्टकम्

कुन्दसुम बृन्दसममन्दहसितास्यं
नन्दकुलनन्द भर तुन्दलनकन्दम् ।
पूतनिजगीतलवधूत दुरितं तम्
वातपुरनाथमिममातनु हृदब्जे ॥ १ ॥

नीलतर जालधर भालहरि रम्यं
लोलतर शीलयुत बालजनलीलम् ।
जालनति शीलमपि पालयितुकामं

वातपुरनाथमिममातनु हृदब्जे ॥ २ ॥

कंसरणहिंसमिह संसरणजात–
क्लान्तिभरशान्तिकर कान्ति झरवीरम् ।
वातमुख धातुजनि पातभयघातं
वातपुरनाथमिममातनु हृदब्जे ॥ ३ ॥

जातु धुरि पातुकमिहातुरजनं द्राक्
शोक भरमूकमपि तोकमिव पान्तम् ।
भृङ्गरुचिसंगरकृदङ्गलतिकं तं
वातपुरनाथमिममातनु हृदब्जे ॥ ४ ॥

पापभवतापभरकोपशमनार्त्था–
श्वासकर भासमृदुहासरुचिरास्यम् ।
रोगचय भोगभय वेगहरमेकं
वातपुरनाथमिममातनु हृदब्जे ॥ ५ ॥

घोषकुल दोषहर वेषमुपयान्तं
पूषशत भूषक विभूषण गणाढ्यम् ।
भुक्तिमपि मुक्तिमपि भक्तिषु ददानं
वातपुरनाथमिममातनु हृदब्जे ॥ ६ ॥

पापक दुरापमतिचापहर शोभ–
स्वापघनमापतदुमापति समेतम् ।
दीनतर दीनसुखदानकृत दीक्षं
वातपुरनाथमिममातनु हृदब्जे ॥ ७ ॥

पादपतदादरण मोदपरिपूर्णं
जीवमुख देवजन सेवनफलाङ्घ्रिम् ।
रूक्ष भव मोक्षकृत दीक्ष जनवीक्षं
वातपुरनाथमिममातनु हृदब्जे ॥ ८ ॥

***

१६. श्रीगुरुवातपुरनाथपञ्चरत्नस्तोत्रम्

आदित्यादिप्रभृतिकमिदं चक्षुराद्यं च तेजो
ज्ञानाज्ञाने स्फुरितमखिलं येन नित्यं विभाति ।
तत्तादृक्षे सकलवचनागोचरे स्वप्रकाशे
त्वदूपेऽस्मिन् किमिव कथये वातगेहाधिनाथ ॥ १ ॥

आकाशान्तं जगदखिलमप्यंशमात्रं यदीयं
माया सेयं मरुदधिपते त्वत्स्वरूपैकदेशे ।
स त्वं कोणे क्वचन धरणेस्तिष्ठसे देहधारी
कारुण्यं ते जगति कथये नाथ तादृक् कथं वा ॥ २ ॥

दृश्यं सर्वं वरद भवतो देह इत्यामनन्त्यां
श्रुत्यां सत्यामपि बत नृणां जायते नैव बुद्धिः ।
इत्थंकारं कमपिच नवं कल्पयन् देहभेदम्
भासि स्पष्टं तदपि भगवन् भाग्यहीनो जनोऽयम् ॥ ३ ॥

मर्त्यामर्त्यप्रमुखमखिलं क्षेत्रजातं त्वदीया
मायैव श्रीगुरुपुरपते साऽपि नास्ति त्वदन्या ।
एको देवस्त्वमसि सकलक्षेत्र साक्षी चिदात्मा
तत्वं किञ्चित् पृथगिह विभो त्वां विना नैव जाने ॥ ४ ॥

सदूपाढ्यं भवति भवताऽधिष्ठितं सर्वमेतत्
भानं नाम क्वचिदपि जडे नो भवन्तं विनाऽन्यम् ।
प्रेम श्रीमन् जगति भवति त्वत्प्रतिच्छाययाऽस्मिन्
वातेशासावहमपि भवान् सच्चिदानन्दरूपः ॥ ५ ॥

***

१७. श्रीकृष्णकेशादिपादवर्णनस्तोत्रम्

अग्रे पश्यामि तेजो निबिडतरकलायावलीलोभनीयं
पीयूषाप्लावितोऽहं तदनु तदुदरे दिव्यकैशोरवेषम् ।
तारुण्यारम्भरम्यं परमसुखरसास्वादरोमाञ्चिताङ्गै-
रावीतं नारदाद्यैर्विलसदुपनिषद्सुन्दरीमण्डलैश्च ॥ १ ॥

नीलाभं कुञ्चिताग्रं घनममलतरं संयतं चारुभङ्ग्या
रत्नोत्तंसाभिरामं वलयितमुदयच्चन्द्रकैः पिञ्छजालैः ।
मन्दारस्रङ्निवीतं तव पृथुकबरीभारमालोकयेऽहं
स्निग्द्धश्वेतोर्ध्वपुण्ड्रामपि च सुललितां फालबालेन्दुवीथीम् ॥ २ ॥

हृद्यं पूर्णानुकंपार्णवमृदुलहरी चञ्चलभ्रूविलासैः
आनीलस्निग्द्धपक्ष्मावलि परिलसितं नेत्रयुग्मं विभो ते ।
सान्द्रच्छायं विशालारुणकमलदलाकारमामुग्धतारं
कारुण्यालोकलीला शिशिरितभुवनं क्षिप्यतां मय्यनाथे ॥ ३ ॥

उत्तुङ्गोल्लासिनासं हरिमणिमुकुरप्रोल्लसद्गण्डपाली-
व्यालोलत् कर्णपाशाञ्चितमकरमणी कुण्डलद्वन्द्वदीप्रम् ।
उन्मीलद्दन्तपङ्क्तिः स्फुरदरुणतरच्छाय बिम्बाधरान्तः
प्रीतिप्रस्यन्दिमन्दस्मितमधुरतरं वक्त्रमुद्भासतां मे ॥ ४ ॥

बाहुद्वन्द्वेन रत्नाङ्गुलिवलयभृता शोणपाणिप्रवाले-
नोपात्तां वेणुनालीं प्रसृतनखमयूखाङ्गुलीसङ्गशाराम् ।
कृत्वा वक्त्रारविन्दे सुमधुरविकसद्रागमुद्भाव्यमानैः
शब्दब्रह्मामृतैस्त्वं शिशिरितभुवनैः सिञ्च मे कर्णवीथीम् ॥ ५ ॥

उत्सर्पत्कौस्तुभश्रीततिभिररुणितं कोमलं कण्ठदेशं
वक्षः श्रीवत्सरम्यं तरलतरसमुद्दीप्तहारप्रतानम् ।
नानावर्णप्रसूनावलिकिसलयिनीं वन्यमालां विलोल-
ल्लोलम्बां लम्बमानामुरसि तव तथा भावये रत्नमालाम् ॥ ६ ॥

अंगे पंचांगरागैरतिशयविकसत्सौरभाकृष्टलोकं
लीनानेकत्रिलोकीवितितिमपि कृशां बिभ्रतं मध्यवल्लीम् ।
शक्राश्मन्यस्त तप्तोज्ज्वलकनकनिभं पीतचेलं दधानं
ध्यायामो दीप्तरश्मि स्फुटमणिरशनाकिङ्किणी मण्डितं त्वाम् ॥ ७ ॥

ऊरू चारू तवोरू घनमसृणरुचौ चित्तचोरौ रमायाः
विश्वक्षोभं विशङ्क्य ध्रुवमनिशमुभौ पीतचेलावृताङ्गौ ।
आनम्राणां पुरस्तान्न्यसनधृतस्मस्तार्थपालीसमुद्ग-
च्छायं जानुद्वयं च क्रमपृथुलमनोज्ञे च जङ्घे निषेवे ॥ ८ ॥

मञ्जीरं मञ्जुनादैरिव पदभजनं श्रेय इत्यालपन्तं
पादाग्रं भ्रान्तिमज्जत् प्रणतजनमनोमन्दरोद्धारकूर्मम् ।
उत्तुङ्गताम्ररराजन्नखरहिमकरज्योत्स्नया चाश्रितानाम्
संताप ध्वान्तहन्त्रीं ततिमनुकलये मङ्गलामङ्गुलीनाम् ॥ ९ ॥

योगीन्द्राणां त्वदङ्घ्रेष्वधिकसुमधुरं मुक्तिभाजां निवासो
भाक्तानां कामवर्षद्युतरुकिसलयं नाथ ते पादमूलम् ।
नित्यं चित्तस्थितं मे पवनपुरपते कृष्ण कारुण्यसिन्धो
हृत्वा निश्शेषतापान् प्रदिशतु परमानन्दसन्दोहलक्ष्मीम् ॥ १० ॥

***

१८. श्रीकृष्णाष्टकम्

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ १ ॥

अतसीपुष्पसङ्काशं हारनूपुरशोभितम् ।
रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम् ॥ २ ॥

कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननम् ।
विलसत्कुण्डलधरं कृष्णं वन्दे जगद्गुरुम् ॥ ३ ॥

मन्दारगन्धसंयुक्तं चारुहासं चतुर्भुजम् ।
बर्हिपिञ्छावचूडांगं कृष्णं वन्दे जगद्गुरुम् ॥ ४ ॥

उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभम् ।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ ५ ॥

रुग्मिणीकेलिसंयुक्तं पीतांबर सुशोभितम् ।
अवाप्ततुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥ ६ ॥

गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कितवक्षसम् ।
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥ ७ ॥

श्रीवत्साङ्कं महोरस्कं वनमालाविराजितम् ।
शंखचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ ८ ॥

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥ ९ ॥

***

१९. मुकुन्दाष्टकम्

करारविन्देन पदारविन्दं
मुखारविन्दे विनिवेशयन्तम् ।
वटस्यपत्रस्य पुटे शयानं
बालं मुकुन्दं मनसा स्मरामि ॥ १ ॥

संहृत्यलोकान् वटपत्रमध्ये
शयानमाद्यन्तविहीनरूपम् ।
सर्वेश्वरं सर्वहितावतारं
बालं मुकुन्दं मनसा स्मरामि ॥ २ ॥

आलोक्यमातुर्मुखमादरेण
स्तन्यं पिबन्तं सरसीरुहाक्षम् ।
सच्चिन्मयं देवमनन्तरूपं
बालं मुकुन्दं मनसा स्मरामि ॥ ३ ॥

इन्दीवरश्यामलकोमलाङ्गं
इन्द्रादिदेवार्चितपादपद्मम् ।
सन्तानकल्पद्रुममाश्रितानां
बालं मुकुन्दं मनसा स्मरामि ॥ ४ ॥

कलिन्दजान्तस्थितकालियस्य
फणाग्ररङ्गे नटनप्रियं तम् ।
तत्पुच्छहस्तं शरदिन्दुवक्त्रं
बालं मुकुन्दं मनसा स्मरामि ॥ ५ ॥

शिक्येनिधायाज्यपयोदधीनि
कार्यात्गतायां व्रजनायिकायाम् ।
भुक्त्वा यथेष्टं कपटेन सुप्तं
बालं मुकुन्दं मनसा स्मरामि ॥ ६ ॥

लम्बालकं लम्बितहारयष्टिं
शृङ्गारलीलाङ्कुरदंतपंक्तिम् ।
बिम्बाधरापूरितवेणुनादं
बालं मुकुन्दं मनसा स्मरामि ॥ ७ ॥

उलूखले बद्धमुदारचौर्यं
उत्तुङ्गयुग्मार्जुनभङ्गलीलम् ।
उत्फुल्लपद्मायतचारुनेत्रम्
बालं मुकुन्दं मनसा स्मरामि ॥ ९ ॥

एवं मुकुन्दाष्टकमादरेण
सकृत् पठेद्यस्सलभते नित्यम् ।
ज्ञानप्रदं पापहरं पवित्रं
श्रियं च विद्यां च यशश्च मुक्तिम् ॥ १० ॥

***

२०. गोविन्ददामोदरस्तोत्रम्

अग्रे कुरूणामथ पाण्डवानां दुःशासनेनाहृतवस्त्रकेशा ।
कृष्णा तदाक्रोशदनन्यनाथा गोविन्द दामोदर माधवेति ॥ १ ॥

श्री कृष्ण विष्णो मधुकैटभारे भक्तानुकम्पिन् भगवन् मुरारे ।
त्रायस्व मां केशव लोकनाथ गोविन्द दामोदर माधवेति ॥ २ ॥

विक्रेतुकामाखिलगोपकन्या मुरारिपादार्पितचित्तवृत्तिः ।
दध्यादिकं मोहवशादवोचद् गोविन्द दामोदर माधवेति ॥ ३ ॥

उलूखले संभृततण्डुलांश्च संघट्टयन्त्यो मुसलैः प्रमुग्धाः ।
गायन्ति गोप्यो जनितानुरागा गोविन्द दामोदर माधवेति ॥ ४ ॥

काचित्करांभोजपुटे निषण्णं क्रीडाशुकं किंशुकरक्ततुण्डं ।
अध्यापयामास सरोरुहाक्षी गोविन्द दामोदर माधवेति ॥ ५ ॥

गृहे गृहे गोपवधू समूहः प्रतिक्षणं पिञ्जरसारिकाणां ।
स्खलद्गिरं वाचयितुं प्रवृत्तो गोविन्द दामोदर माधवेति ॥ ६ ॥

पर्यङ्किकाभाजमलं कुमारं प्रस्वापयन्त्योऽखिलगोपकन्याः ।
जगुः प्रबन्धं स्वरतालबन्धं गोविन्द दामोदर माधवेति ॥ ७ ॥

रामानुजं वीक्षणकेलिलोलं गोपी गृहीत्वा नवनीतगोलं ।
आबालकं बालकमाजुहाव गोविन्द दामोदर माधवेति ॥ ८ ॥

विचित्रवर्णाभरणाभिरामेऽभिधेहि वक्त्रांबुजराजहंसि ।
सदा मदीये रसनेऽग्रर्ङ्गे गोविन्द दामोदर माधवेति ॥ ९ ॥

अङ्काधिरूढं शिशुगोपगूढं स्तनंधयन्तं कमलैककान्तं ।
संबोधयामास मुदा यशोदा गोविन्द दामोदर माधवेति ॥ १० ॥

क्रीडन्तमन्तर्व्रजमात्मजं स्वं समं वयस्यैः पशुपालबालैः ।
प्रेम्णा यशोदा प्रजुहाव कृष्णं गोविन्द दामोदर माधवेति ॥ ११ ॥

यशोदया गाढमुलूखलेन गोकण्ठपाशेन निबध्यमानः ।
रुरोद मन्दं नवनीतभोजी गोविन्द दामोदर माधवेति ॥ १२ ॥

निजाङ्गणे कङ्कणकेलिलोलं गोपी गृहीत्वा नवनीतगोलं ।
आमर्दयत्पाणितलेन नेत्रे गोविन्द दामोदर माधवेति ॥ १३ ॥

गृहे गृहे गोपवधूकदम्बाः सर्वे मिलित्वा समवाययोगे ।
पुण्यानि नामानि पठन्ति नित्यं गोविन्द दामोदर माधवेति ॥ १४ ॥

मन्दारमूले वदनाभिरामं बिम्बाधरापूरित वेणुनादं ।
गोगोपगोपीजनमध्यसंस्थं गोविन्द दामोदर माधवेति ॥ १५ ॥

उत्थाय गोप्योऽपररात्रभागे स्मृत्वा यशोदासुतबालकेलिं ।
गायन्ति प्रोच्चैर्दधि मन्थयन्त्यो गोविन्द दामोदर माधवेति ॥ १६ ॥

जग्धोऽथ दत्तो नवनीतपिण्डो गृहे यशोदा विचिक्त्सयन्ती ।
उवाच सत्यं वद हे मुरारे गोविन्द दामोदर माधवेति ॥ १७ ॥

अभ्यर्च्य गेहं युवतिः प्रवृद्धप्रेमप्रवाहा दधि निर्ममन्थ ।
गायन्ति गोप्योऽथ सखीसमेता गोविन्द दामोदर माधवेति ॥ १८ ॥

क्वचित् प्रभाते दधिपूर्णपात्रे निक्षिप्य मन्थं युवती मुकुन्दं ।

आलोक्य गानं विविधं करोति गोविन्द दामोदर माधवेति ॥ १९ ॥

क्रीडापरं भोजनमज्जनार्थं हितैषिणी स्त्री तनुजं यशोदा ।
आजूहवत् प्रेमपरिप्लुताक्षी गोविन्द दामोदर माधवेति ॥ २० ॥

सुखं शयानं निलये च विष्णुं देवर्षिमुख्या मुनयः प्रपन्नाः ।
तेनाच्युते तन्मयतां व्रजन्ति गोविन्द दामोदर माधवेति ॥ २१ ॥

विहाय निद्रामरुणोदये च विधाय कृत्यानि च विप्रमुख्याः ।
वेदावसाने प्रपठन्ति नित्यं गोविन्द दामोदर माधवेति ॥ २२ ॥

वृन्दावने गोपगणाश्च गोप्यो विलोक्य गोविन्द वियोगखिन्नाम् ।
राधां जगुः साश्रुविलोचनाभ्यां गोविन्द दामोदर माधवेति ॥ २३ ॥

प्रभातसञ्चारगता नु गावस्तद्रक्षणार्थं तनयं यशोदा ।
प्राबोधयत् पाणितलेन मन्दं गोविन्द दामोदर माधवेति ॥ २४ ॥

प्रवालशोभा इव दीर्घकेशा वाताम्बुपर्णाशनपूतदेहाः ।
मूले तरूणां मुनयः पठन्ति गोविन्द दामोदर माधवेति ॥ २५ ॥

एवं बृवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥ २६ ॥

गोपी कदाचिन्मणिपिञ्जरस्थं शुकं वचो वाचयितुं प्रवृत्ता ।
आनन्दकन्द व्रजचन्द्रकृष्ण गोविन्द दामोदर माधवेति ॥ २७ ॥

गोवत्सबालैः शिशुकाकपक्षं बध्नन्तमम्भोजदलायताक्षम् ।
उवाच माता चिबुकं गृहीत्वा गोविन्द दामोदर माधवेति ॥ २८ ॥

प्रभातकाले वरवल्लवौघा गोरक्षणार्थं धृतवेत्रदण्डाः ।
आकारयामासुरनन्तमाद्यं गोविन्द दामोदर माधवेति ॥ २९ ॥

ालाशये कालियमर्दनाय यदा कदम्बादपतन्मुरारिः ।
गोपाङ्गनाश्चुक्रुशुरित्य गोपा गोविन्द दामोदर माधवेति ॥ ३० ॥

अक्रूरमासाद्य यदा मुकुन्दश्चापोत्सवार्थं मथुरां प्रविष्टः ।
तदा स पौरैर्जयतीत्यभाषि गोविन्द दामोदर माधवेति ॥ ३१ ॥

कंसस्य दूतेन यदैव नीतौ वृन्दावनान्ताद् वसुदेवसूनू ।
रुरोद गोपी भवनस्य मध्ये गोविन्द दामोदर माधवेति ॥ ३२ ॥

सरोवरे कालियनागबद्धं शिशुं यशोदातनयं निशम्य ।
चक्रुर्लुठन्त्यः पथि गोपबाला गोविन्द दामोदर माधवेति ॥ ३३ ॥

अक्रूरयाने यदुवंशनाथं संगच्छमानं मथुरां निरीक्ष्य ।
ऊचुर्वियोगात् किल गोपबाला गोविन्द दामोदर माधवेति ॥ ३४ ॥

चक्रन्द गोपी नलिनीवनान्ते कृष्णेन हीना कुसुमे शयाना ।
प्रफुल्लनीलोत्पललोचनाभ्यां गोविन्द दामोदर माधवेति ॥ ३५ ॥

मातापितृभ्यां परिवार्यमाणा गेहं प्रविष्टा विललाप गोपी ।
आगत्य मां पालय विश्वनाथ गोविन्द दामोदर माधवेति ॥ ३६ ॥

वृन्दावनस्थं हरिमाशु बुद्ध्वा गोपी गता कापि वनं निशायाम् ।
तत्राप्यदृष्ट्वातिभयादवोचद् गोविन्द दामोदर माधवेति ॥ ३७ ॥

सुखं शयाना निलये निजेऽपि नामानि विष्णोः प्रवदन्ति मर्त्याः ।
ते निश्चितं तन्मयतां व्रजन्ति गोविन्द दामोदर माधवेति ॥ ३८ ॥

सा नीरजाक्षीमवलोक्य राधां रुरोद गोविन्दवियोगखिन्नाम् ।
सखी प्रफुल्लोत्पललोचनाभ्यां गोविन्द दामोदर माधवेति ॥ ३९ ॥

जिह्वे रसज्ञे मधुरप्रिया त्वं सत्यं हितं त्वां परमं वदामि ।
आवर्णयेथा मधुराक्षराणि गोविन्द दामोदर माधवेति ॥ ४० ॥

आत्यन्तिकव्याधिहरं जनानां चिकित्सकं वेदविदो वदन्ति ।
संसारतापत्रयनाशबीजं गोविन्द दामोदर माधवेति ॥ ४१ ॥

ताताज्ञया गच्छति रामचन्द्रे सलक्ष्मणेऽरण्यचये ससीते ।
चक्रन्द रामस्य निजा जनित्री गोविन्द दामोदर माधवेति ॥ ४२ ॥

एकाकिनी दण्डककाननान्तात् सा नीयमाना दशकन्धरेण ।
सीता तदाक्रन्ददनन्यनाथा गोविन्द दामोदर माधवेति ॥ ४३ ॥

रामाद्वियुक्ता जनकात्मजा सा विचिन्तयन्ती हृदि रामरूपम् ।
रुरोद सीता रघुनाथ पाहि गोविन्द दामोदर माधवेति ॥ ४४ ॥

प्रसीद विष्णो रघुवंशनाथ सुरासुराणां सुखदुःखहेतो ।
रुरोद सीता तु समुद्रमध्ये गोविन्द दामोदर माधवेति ॥ ४५ ॥

अन्तर्जले ग्राहगृहीतपादो विसृष्टविक्लिष्ट समस्तबन्धुः ।
तदा गजेन्द्रो नितरां जगाद गोविन्द दामोदर माधवेति ॥ ४६ ॥

हंसध्वजः शङ्खयुतो ददर्श पुत्रं कटाहे प्रपन्तमेनं ।
पुण्यानि नामानि हरेर्जपन्तं गोविन्द दामोदर माधवेति ॥ ४७ ॥

दुर्वाससो वाक्यमुपेत्य कृष्णा साचाब्रवीत् काननवासिनीशम् ।
अन्तःप्रविष्टं मनसाजुहाव गोविन्द दामोदर माधवेति ॥ ४८ ॥

ध्येयः सदा योगिभिरप्रमेयश्चिन्ताहरश्चिन्तितपारिजातः ।
कस्तूरिकाकल्पितनीलवर्णो गोविन्द दामोदर माधवेति ॥ ४९ ॥

संसारकूपे पतितोऽत्यगाधे मोहान्धपूर्णे विषयाभितप्ते ।
करावलंबं मम देहि विष्णो गोविन्द दामोदर माधवेति ॥ ५० ॥

त्वामेव याचे मम देहि जिह्वे समागते दण्डधरे कृतान्ते ।
वक्तव्यमेवं मधुरं सुभक्त्या गोविन्द दामोदर माधवेति ॥ ५१ ॥

भजस्व मन्त्रं भवबन्धमुक्त्यै जिह्वे रसज्ञे सुलभं मनोज्ञं ।
द्वैपायनाद्यैर्मुनिभिः प्रजप्तं गोविन्द दामोदर माधवेति ॥ ५२ ॥

गोपाल वंशीधर रूपसिन्धो लोकेश नारायण दीनबन्धो ।
उच्चस्वरैस्त्वं वद सर्वदैव गोविन्द दामोदर माधवेति ॥ ५३ ॥

जिह्वे सदैवं भज सुन्दराणि नामानि कृष्णस्य मनोहराणि ।
समस्तभक्तार्तिविनाशनानि गोविन्द दामोदर माधवेति ॥ ५४ ॥

गोविन्द गोविन्द हरे मुरारे गोविन्द गोविन्द मुकुन्द कृष्ण ।
गोविन्द गोविन्द रथाङ्गपाणे गोविन्द दामोदर माधवेति ॥ ५५ ॥

सुखावसाने त्विदमेव सारं दुःखावसाने त्विदमेव गेयं ।
देहावसाने त्विदमेव जाप्यं गोविन्द दामोदर माधवेति ॥ ५६ ॥

दुर्वारवाक्यं परिगृह्य कृष्णा मृगीव भीता तु कथं कथञ्चित् ।
सभां प्रविष्टा मनसाजुहाव गोविन्द दामोदर माधवेति ॥ ५७ ॥

श्रीकृष्ण राधावर गोकुलेश गोपाल गोवर्धन नाथ विष्णो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ५८ ॥

श्रीनाथ विश्वेश्वर विश्वमूर्ते श्री देवकीनन्दन दैत्यशत्रो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ५९ ॥

गोपीपते कंसरिपो मुकुन्द लक्ष्मीपते केशव वासुदेव ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६० ॥

गोपीजनाह्लादकर व्रजेश गोचारणारण्यकृतप्रवेश ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६१ ॥

प्राणेश विश्वंभर कैटभारे वैकुण्ठ नरायण चक्रपाणे ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६२ ॥

हरे मुरारे मधुसूदनाद्य श्रीराम सीतावर रावणारे ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६३ ॥

श्री यादवेन्द्राद्रिधराम्बुजाक्ष गोगोपगोपीसुखदानदक्ष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६४ ॥

धराभरोत्तारणगोपवेष विहारलीलाकृतबन्धुशेष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६५ ॥

बकीबकाघासुरधेनुकारे केशीतृणावर्तविघातदक्ष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६६ ॥

श्रीजानकीजीवन रामचन्द्र निशाचरारे भरताग्रजेश ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६७ ॥

नारायणानन्त हरे नृसिंह प्रह्लादबाधाहर हे कृपालो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६८ ॥

लीलामनुष्याकृतिरामरूप प्रतापदासीकृतसर्वभूप ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६९ ॥

श्रीकृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ७० ॥

वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनाभिमुख्यम् ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ७१ ॥

श्री विष्णुस्तोत्राणि

विषयसूची

		पृष्ठसंख्या
१.	श्री नारायणाष्टकम्	२३३
२.	कमलापत्यष्टकम्	२३४
३.	श्री दीनबन्ध्वष्टकम्	२३५
४.	श्री भगवच्छरणस्तोत्रम्	२३६
५.	ध्रुवकृत भगवत्स्तुतिः	२३९
६.	षट्पदीस्तोत्रम्	२४१
७.	श्री द्वादशाक्षरमंत्रस्तोत्रम्	२४१
८.	श्री विष्णुभुजंगप्रायतस्तोत्रम्	२४२
९.	संकटनाशविष्णुतोत्रम्	२४५
१०.	अच्युताष्टकम्	२४६
११.	दुःखमोचक श्रीमदच्युताष्टकम्	२४७
१२.	श्री हरिस्तोत्रम्	२४८
१३.	श्री हर्यष्टकम्	२४९
१४.	श्री हरिनामाष्टकम्	२५१
१५.	श्री हरिशरणाष्टकम्	२५२
१६.	श्री जगन्नाथपंचकम्	२५३
१७.	पाण्डुरंगाष्टकम्	२५४
१८.	गोविन्दाष्टकम्	२५५
१९.	श्री रंगनाथाष्टकम्	२५७
२०.	श्री सुदर्शनाष्टकम्	२५८
२१.	दशावतारस्तोत्रम्	२५९

२२. श्री लक्ष्मीनृसिंहस्तोत्रम् २६१
२३. श्री नरसिंहाष्टकम् २६३
२४. श्री नरसिंहपंचामृतस्तोत्रम् २६४
२५. श्री विष्णुशतनामस्तोत्रम् २६५
२६. श्री वेंकटेश द्वादशनामस्तोत्रम् २६६

श्री विष्णुस्तोत्राणि

विषयसूची

पृष्ठसंख्या
२७. श्री वेंकटेशमंगलस्तोत्रम् २६७
२८. पंचायुधस्तोत्रम् २६८
२९. द्वादशनामपंजरम् २६९
३०. श्री मुकुन्दमाला २६९

१. श्री नारायणाष्टकम्

(श्री कूरेशस्वामिकृतम्)

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणा–
दौदार्यादघशोषणादगणितश्रेयःपदप्रापणात् ।
सेव्यः श्रीपतिरेक एव जगतामेतेऽभवन् साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः ॥ १ ॥

प्रह्लादास्ति यदीश्वरो वद हरिः सर्वत्र मे दर्शय
स्तम्भे चैवमिति ब्रुवन्तमसुरं तत्राविरासीद्धरिः ।
वक्षस्तस्य विदारयन् निजनखैः वात्सल्यमापादयन्
आर्तत्राणपरायणः सः भगवान् नारायणो मे गतिः ॥ २ ॥

श्रीरामात्र विभीषणोऽयमनघो रक्षोभयादागतः
सुग्रीवानय पालयैनमधुना पौलस्त्यमेवागतम् ।
इत्युक्त्वाभयमस्य सर्वविदितं यो राघवो दत्तवान्
आर्तत्राणपरायणः सः भगवान् नारायणो मे गतिः ॥ ३ ॥

नक्रग्रस्तपदं समुद्धृतकरं ब्रह्मादयो भो सुराः
पाल्यन्तामिति दीनवाक्यकरिणं देवेष्वशक्तेषु यः ।
मा भैषीरिति यस्य नक्रहनने चक्रायुधः श्रीधरः
आर्तत्राणपरायणः सः भगवान् नारायणो मे गतिः ॥ ४ ॥

भो कृष्णाच्युत भो कृपालय हरे भो पाण्डवानां सखे
क्वासि क्वासि सुयोधनादपहृतां भो रक्ष मामातुराम् ।

इत्युक्तोऽक्षयवस्त्रसंभृततनुं योऽपालयद्द्रौपदीम्
आर्तत्राणपरायणः सः भगवान् नारायणो मे गतिः ॥ ५ ॥

यत्पादाब्जनखोदकं त्रिजगतां पापौघविध्वंसनम्
यन्नामामृतपूरकं च पिबतां संसारसंतारकम् ।
पाषाणोऽपि यदङ्घ्रिपद्मरजसा शापान्मुनेर्मोचितः
आर्तत्राणपरायणः सः भगवान् नारायणो मे गतिः ॥ ६ ॥

पित्रा भ्रातरमुत्तमासनगतं चौत्तानपादिर्ध्रुवो
दृष्ट्वा तत्सममारुरुक्षुरधृतो मात्रावमानं गतः ।
यं गत्वा शरणं यदाप तपसा हेमाद्रिसिंहासनम्
आर्तत्राणपरायणः सः भगवान् नारायणो मे गतिः ॥ ७ ॥

आर्ताः विषण्णाः शिथिलाश्च भीता
घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायण शब्दमात्रम्
विमुक्तदुःखाः सुखिनो भवन्ति ॥ ८ ॥

***

२. कमलापत्यष्टकम्

(स्वामि ब्रह्मानन्दकृतम्)

भुजगतल्पगतं घनसुन्दरं गरुडवाहनमम्बुजलोचनम् ।
नलिनचक्रगदाकरमव्ययं भजत रे मनुजाः कमलापतिम् ॥ १ ॥

अलिकुलासितकोमलकुन्तलं विमलपीतदुकूलमनोहरम् ।
जलधिजाङ्कितवामकलेवरं भजत रे मनुजाः कमलापतिम् ॥ २ ॥

किमु जपैश्च तपोभिरुताध्वरैरपि किमुत्तमतीर्थनिषेवणैः ।
किमुत शास्त्रकदंबविलोकनैः भजत रे मनुजाः कमलापतिम् ॥ ३ ॥

मनुजदेहमिमं भुवि दुर्लभं समधिगम्य सुरैरपि वाञ्छितम् ।
विषयलंपटतामपहाय वै भजत रे मनुजाः कमलापतिम् ॥ ४ ॥

न वनिता न सुतो न सहोदरो न हि पिता जननी न च बान्धवाः ।
व्रजति साकमनेन जनेन वै भजत रे मनुजाः कमलापतिम् ॥ ५ ॥

सकलमेव चलं सचराचरं जगदिदं सुतरां धनयौवनम् ।
समवलोक्य विवेकदृशा द्रुतं भजत रे मनुजाः कमलापतिम् ॥ ६ ॥

विविधरोगयुतं क्षणभङ्गुरं परवशं नवमार्गसमाकुलम् ।
परिनिरीक्ष्य शरीरमिदम् स्वकं भजत रे मनुजाः कमलापतिम् ॥ ७ ॥

मुनिवरैरनिशं हृदि भावितं शिवविरिञ्चिमहेन्द्रनुतं सदा ।
मरणजन्मजराभयमोचनं भजत रे मनुजाः कमलापतिम् ॥ ८ ॥

हरिपदाष्टकमेतदनुत्तमं परमहंसजनेन समीरितम् ।
पठति यस्तु समाहित चेतसा व्रजति विष्णुपदं स नरो ध्रुवं ॥ ९ ॥

***

३. श्रीदीनबन्ध्वष्टकम्

(स्वामि ब्रह्मानन्दकृतम्)

यस्मादिदं जगदुदेति चतुर्मुखाद्यम्
यस्मिन्नवस्थितमशेषमशेषमूले ।
यत्रोपयाति विलयं च समस्तमन्ते
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ १ ॥

चक्रं सहस्रकरचारु करारविन्दे
गुर्वी गदा दरवरश्च विभाति यस्य ।
पक्षीन्द्रपृष्ठपरिरोपितपादपद्मो
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ २ ॥

येनोद्धृता वसुमती सलिले निमग्ना
नग्ना च पाण्डववधूः स्थगिता दुकूलैः ।
सम्मोचितो जलचरस्य मुखाद्गजेन्द्रो
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ ३ ॥

यस्यार्द्रदृष्टिवशतस्तु सुराः समृद्धिम्
कोपेक्षणेन दनुजा विलयं व्रजन्ति ।
भीताश्चरन्ति च यतोऽर्कयमानिलाद्या
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ ४ ॥

गायन्ति सामकुशला यमजं मखेषु
ध्यायन्ति धीरमतयो यतयो विविक्ते ।
पश्यन्ति योगिपुरुषाः पुरुषं शरीरे
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ ५ ॥

आकाररूपगुणयोगविवर्जितोऽपि
भक्तानुकम्पननिमित्तगृहीतमूर्तिः ।
यः सर्वगोऽपि कृतशेषशरीरशय्यो
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ ६ ॥

यस्याङ्घ्रिपङ्कजमनिद्रमुनीन्द्रवृन्दै–
राराध्यते भवदवानलदाहशान्त्यै ।
सर्वापराधमविचिन्त्य ममाखिलात्मा
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ ७ ॥

यन्नामकीर्तनपरः श्वपचोऽपि नूनम्
हित्वाखिलं कलिमलं भुवनं पुनाति ।
दग्ध्वा ममाघमखिलं करुणेक्षणेन
दृग्गोचरो भवतु मेऽद्य स दीनभन्धुः ॥ ८ ॥

दीनबन्ध्वष्टकं पुण्यं ब्रह्मानन्देन भाषितम् ।

यः पठेत् प्रयतो नित्यं तस्य विष्णुः प्रसीदति ॥ ९ ॥

***

४. श्रीभगवच्छरणस्तोत्रम्

(स्वामि ब्रह्मानन्दकृतं)

सच्चिदानन्दरूपाय भक्तानुग्रहकारिणे ।
मायानिर्मितविश्वाय महेशाय नमो नमः ॥ १ ॥

रोगा हरन्ति सततं प्रबलाः शरीरम् ।
कामादयोऽप्यनुदिनं प्रदहन्ति चित्तम् ।
मृत्युश्च नृत्यति सदा कलयन् दिनानि
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ २ ॥

देहो विनश्यति सदा परिणामशील–
श्चित्तं च खिद्यति सदा विषयानुरागि ।
बुद्धिः सदा हि रमते विषयेषु नान्तः
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ३ ॥

आयुर्विनश्यति यथामघटस्थतोयम्
विद्युत्प्रभेव चपला बत यौवनश्रीः ।
वृद्धा प्रधावति यथा मृगराजपत्नी
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ४ ॥

आयाद्व्ययो मम भवत्यधिकोऽविनीते
कामादयो हि बलिनो निबलाः शमाद्याः ।
मृत्युर्यदा तुदति मां बत किं वदेयम्
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ५ ॥

तप्तं तपो नहि कदापि मयेह तन्वा

वाण्या तथा नहि कदापि तपश्च तप्तम् ।
मिथ्याभिभाषणपरेण न मानसं हि
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ६ ॥

स्तब्धं मनो मम सदा नहि याति सौम्यम्
चक्षुश्च मे न तव पश्यति विश्वरूपम् ।
वाचा तथैव न वदेन्मम सौम्यवाणीम्
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ७ ॥

सत्वं न मे मनसि याति रजस्तमोभ्याम्
विद्धे तथा कथमहो शुभकर्मवार्ता ।
साक्षात् परंपरतया सुखसाधनम् तत्
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ८ ॥

पूजाकृता नहि कदापि मया त्वदीया
मन्त्रं त्वदीयमपि मे न जपेद्रसज्ञा ।
चित्तं न मे स्मरति ते चरणौ ह्यवाप्य
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ९ ॥

यज्ञो न मेऽस्ति हुतिदानदयादियुक्तो
ज्ञानस्यसाधनगणो न विवेकमुख्यः ।
ज्ञानं क्व साधनगणेन विना क्व मोक्षः
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १० ॥

सत्सङ्गतिर्हि विदिता तव भक्तिहेतुः
साप्यद्य नास्ति बत पण्डितमानिनो मे ।
तामन्तरेण नहि सा क्वच बोधवार्ता
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ ११ ॥

दृष्टिर्न भूतविषया समताभिधाना
वैषम्यमेव तदियं विषयीकरोति ।

शन्तिः कुतो मम भवेत् समता न चेत्स्यात्
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १२ ॥

मैत्री समेषु न च मेऽस्ति कदापि नाथ
दीने न तथा न करुणा मुदिता च पुण्ये ।
पापेऽनुपेक्षणवतो मम मुद्कथं स्यात्
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १३ ॥

नेत्रादिकं मम बहिर्विषयेषु सक्तम्
नान्तर्मुखं भवति तानविहाय तस्य ।
क्वान्तर्मुखत्वमपहाय सुखस्य वार्ता
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १४ ॥
त्यक्तं गृहाद्यपि मया भवतापशान्त्यै
नासीदसौ हृतहृदो मम मायया ते ।
सा चाधुना किमु विधास्यति नेति जाने
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १५ ॥

प्राप्ता धनं गृहकुटुम्बगजाश्वदारा
राज्यं यदैहिकमथेन्द्रपुरश्च नाथ ।
सर्वं विनश्वरमिदं न फलाय कस्मै
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १६ ॥

प्राणान्निरुद्ध्य विधिना न कृतो हि योगो
योगं विनास्ति मनसः स्थिरता कुतो मे ।
तां वै विना मम न चेतसि शान्तिवार्ता
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १७ ॥

ज्ञानं यथा मम भवेत् कृपया गुरूणाम्
सेवां तथा न विधिनाकरवं हि तेषाम् ।
सेवापि साधनतयाविदितास्ति चित्ते
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १८ ॥

तीर्थादि सेवनमहो विधिना हि नाथ
नाकारि येन मनसो मम शोधनं स्यात् ।
शुद्धिं विना न मनसोऽवगमापवर्गो
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ १९ ॥

वेदान्तशीलनमपि प्रमितिं करोति
ब्रह्मात्मनः प्रमिति साधन संयुतस्य ।
नैवास्ति साधन लवो मयि नाथ तस्याः
तस्मात्त्वमद्य शरणं मम दीनबन्धो ॥ २० ॥

गोविन्द शंकर हरे गिरिजेश मेश
शंभो जनार्दन गिरीश मुकुन्द साम्ब ।
नान्या गतिर्मम कथञ्चन वां विहाय
तस्मात् प्रभो मम गतिः कृपया विधेया ॥ २१ ॥

एवं स्तवं भगवदाश्रयणाभिधानम्
ये मानवा प्रतिदिनं प्रणताः पठन्ति ।
ते मानवाः भवरतिं परिभूय शान्तिम्
गच्छन्ति किं च परमात्मनि भक्तिमद्धा ॥ २२ ॥

५. ध्रुवकृतभगवत्स्तुतिः

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्ताम्
सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥ १ ॥

एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरुगुणया महदाद्यशेषम् ।
सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु

नानेव दारुषु विभावसुवद्विभासि ॥ २ ॥

त्वद्दत्तया वयुनयेदमचष्ट विश्वम्
सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः ।
तस्यापवर्ग्यशरणं तव पादमूलम्
विस्मर्यते कृतविदा कथमार्तबन्धो ॥ ३ ॥

नूनं विमुष्टमतयस्तव मायया ते
ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ।
अर्चन्ति कल्पकतरुं कुणपोपभोग्य–
मिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥ ४ ॥

या निर्वृतिस्तनुभृतां तव पादपद्म–
ध्यानात् भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
किं त्वन्तकासि लुलितात् पततां विमानात् ॥ ५ ॥

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
भूयादनन्त महताममलाशयानाम् ।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिम्
नेष्ये भवद्गुणकथामृतपानमत्तः ॥ ६ ॥

ते न स्मरन्त्यतितरां प्रियमीश मर्त्यम्
ये चान्वदः सुतसुहृद्गृहवित्तदाराः ।
ते त्वब्जनाभ भवदीय पदारविन्द–
सौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥ ७ ॥

तिर्यङ्नगद्विजसरीसृपदेवदैत्य–
मर्त्यादिभिः परिचितं सदसद्विशेषम् ।
रूपं स्थविष्ठमज ते महदाद्यनेकम्

नातः परं परम वेद्मि न यत्र वादः ॥ ८ ॥

कल्पान्त एतदखिलं जठरेण गृह्णन्
शेते पुमान् स्वदृगनन्तसखस्तदङ्के ।
यन्नाभिसिन्धुरुहकाञ्चनलोकपद्म–
गर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै ॥ ९ ॥

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा
कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ।
यद्बुध्यवस्थितिमखण्डितया स्वदृष्ट्या
द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥ १० ॥

यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति
विद्यादयो विविध शक्तयः आनुपूर्व्यात् ।
तत् ब्रह्म विश्वभवमेकमनन्तमाद्यम्
आनन्दमात्रमविकारमहं प्रपद्ये ॥ ११ ॥

सत्याशिषो हि भगवंस्तव पादपद्म–
माशीस्तथानुभजतः पुरुषार्थमूर्तेः ।
अप्येवमर्य भगवान् परिपाति दीनान्
वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ १२ ॥

***

६. षट्पदीस्तोत्रम्

(श्री शंकराचार्यकृतम्)

अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय तारय संसार सागरतः ॥ १ ॥

दिव्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे ।
श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे ॥ २ ॥

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः ॥ ३ ॥

उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे ।
दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४ ॥

मत्स्यादिभिरवतारैरवतारवताऽवता सदा वसुधाम् ।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥ ५ ॥

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।
भवजलधिमथनमन्दर परमं दरमपनय त्वं मे ॥ ६ ॥

नारायण करुणामय शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥

***

७. श्री द्वादशाक्षरमन्त्रस्तोत्रम्

(श्री वेदव्यासकृतम्)

ओमिति ज्ञानवस्त्रेण रागनिर्णेजनीकृतः ।
कर्मनिद्रां प्रपन्नोऽस्मि त्राहि मां मधुसूदन ॥ १ ॥

न गतिर्विद्यते चान्या त्वमेव शरणं मम ।
मायापङ्केनलिप्तोऽस्मि त्राहि मां मधुसूदन ॥ २ ॥

मोहितो मोहजालेन पुत्रदारगृहादिषु ।
तृष्णया पीड्यमानोऽस्मि त्राहि मां मधुसूदन ॥ ३ ॥

भक्तिहीनं तु दीनं च दुःखशोकसमन्वितम्उख ।

अनाश्रयमनाथं च त्राहि मां मधुसूदन ॥ ४ ॥

गतागतपरिश्रान्तो दूरमध्वनि कर्मणाम् ।
संसारभयभीतोऽस्मि त्राहि मां मधुसूदन ॥ ५ ॥

वसितो मातृगर्भेषु पीडितोऽहं जनार्दन ।
गर्भवासक्षयकर त्राहि मां मधुसूदन ॥ ६ ॥

तेन देव प्रपन्नोऽस्मि सत्वाश्रयपरायण ।
जरामरणभीतोऽस्मि त्राहि मां मधुसूदन ॥ ७ ॥

वाचा तूपकृतं पापं कर्मणा यदुपार्जितम् ।
मया देव दुराचारं त्राहि मां मधुसूदन ॥ ८ ॥

सुकृतं न कृतं किञ्चित् दुष्कृतं तु सदा कृतम् ।
तेनाहं परितप्तोऽस्मि त्राहि मां मधुसूदन ॥ ९ ॥
देहान्तरसहस्रेषु कुयोनिः सेविता मया ।
तिर्यक्त्वं मानुषत्वं च त्राहि मां मधुसूदन ॥ १० ॥

वासुदेव हृषीकेश वैकुण्ठ पुरुषोतम ।
सृष्टिसंहारकरण त्राहि मां मधुसूदन ॥ ११ ॥

यत्राहमागमिष्यामि नारी वा पुरुषोऽपि वा ।
तत्र तत्र च ते भक्तिः त्राहि मां मधुसूदन ॥ १२ ॥

द्वादशार्णवस्तुतिमिमां यः पठेच्छृणुयादपि ।
स याति परमं स्थानं यत्र योगेश्वरो हरिः ॥ १३ ॥

***

८. श्री विष्णुभुजङ्गप्रयातस्तोत्रम्

(श्री शंकराचार्यकृतम्)

चिदंशं विभुं निर्मलं निर्विकल्पम्
निरीहं निराकारमोङ्कारवेद्यम् ।
गुणातीतमव्यक्तमेकं तुरीयम्
परं ब्रह्म यं वेद तस्मै नमस्ते ॥ १ ॥

विशुद्धं शिवं शान्तमाद्यन्तशून्यम्
जगज्जीवनं ज्योतिरानन्दरूपम् ।
अदिग्देशकालव्यवच्छेदनीयम्
त्रयी वक्ति यं वेद तस्मै नमस्ते ॥ २ ॥

महायोगपीठे परिभ्राजमाने
धरण्यादितत्वात्मके शक्तियुक्ते ।
गुणाहस्करे वह्निबिम्बार्कमध्ये
समासीनमोंकर्णिकेऽष्टाक्षराब्जे ॥ ३ ॥

समानोदितानेकसूर्येन्दुकोटि–
प्रभापूरतुल्यद्युतिं दुर्निरीक्ष्यम् ।
न शीतं न चोष्णं सुवर्णावभातम्
प्रसन्नं सदानन्दसंवित्स्वरूपम् ॥ ४ ॥

सुनासापुटं सुन्दरभ्रूललाटम्
किरीटोचिताकुञ्चितस्निग्धकेशम् ।

स्फुरत्पुण्डरीकाभिरामायताक्षम्
समुत्फुल्लरत्नप्रसूनावतंसम् ॥ ५ ॥

स्फुरत्कुण्डलामृष्टगण्डस्थलान्तम्
जपारागचोराधरं चारुहासम् ।
कलिव्याकुलामोदिमन्दारमालम्
महोरस्फुरत्कौस्तुभोदारहारम् ॥ ६ ॥

सुरत्नाङ्गदैरन्वितं बाहुदण्डैः
चतुर्भिश्चलत्कङ्कणालंकृताग्रैः ।
उदारोदरालंकृतं पीतवस्त्रम्
पदद्वन्द्वनिर्धूतपद्माभिरामम् ॥ ७ ॥

स्वभक्तेषु सन्दर्शिताकारमेवम्
सदा भावयन् सन्निरुद्धेन्द्रियाश्वः ।
दुरापं नरो याति संसारपारम्
परस्मै तमोभ्योऽपि तस्मै नमस्ते ॥ ८ ॥

श्रिया शातकुंभद्युतिस्निग्धकान्त्या
धरण्या च दूर्वादलश्यामलाङ्ग्या ।
कलत्रद्वयेनामुना तोषिताय
त्रिलोकीगृहस्थाय विष्णो नमस्ते ॥ ९ ॥

शरीरं कलत्रं सुतं बन्धुवर्गम्
वयस्यं धनं सद्म भृत्यं भुवं च ।
समस्तं परित्यज्य हा कष्टमेको
गमिष्यामि दुःखेन दूरं किलाहम् ॥ १० ॥

जरेयं पिशाचीव हा जीवितो मे
मृजामस्थिरक्तं च मांसं बलं च ।
अहो देव सीदामि दीनानुकम्पिन्
किमद्धापि हन्त त्वयोद्भासितव्यम् ॥ ११ ॥

कफव्याहतोष्णोल्बणश्वासवेग–
व्यथाविस्फुरत्सर्वमर्मास्थिबन्धाम् ।
विचिन्त्याहमन्त्यामसह्यामवस्थाम्
बिभेमि प्रभो किं करोमि प्रसीद ॥ १२ ॥

लपन्नच्युतानन्त गोविन्द विष्णो
मुरारे हरे नाथ नारायणेति ।
यथाऽनुस्मरिष्यामि भक्त्या भवन्तम्
तथा मे दयाशील देव प्रसीद ॥ १३ ॥

नमो विष्णवे वासुदेवाय तुभ्यम्
नमो नारसिंहस्वरूपाय तुभ्यम् ।
नमः कालरूपाय संहारकर्त्रे
नमस्ते वराहाय भूयो नमस्ते ॥ १४ ॥

नमस्ते जगन्नाथ विष्णो नमस्ते
नमस्ते गदाचक्रपाणे नमस्ते ।
नमस्ते प्रपन्नार्तिहारिन् नमस्ते
समस्तापराधं क्षमस्वाखिलेश ॥ १५ ॥

मुखे मन्दहासं नखे चन्द्रभासम्
करे चारुचक्रं सुरेशादिवन्द्यम् ।
भुजङ्गे शयानं भजे पद्मनाभम्
हरेरन्यदैवं न मन्ये न मन्ये ॥ १६ ॥

भुजङ्गप्रयातं पठेद्यस्तु भक्त्या
समाधाय चित्ते भवन्तं मुरारे ।
स मोहं विहायाशु युष्मत्प्रसादात्
समाश्रित्य योगं व्रजत्यच्युतं त्वाम् ॥ १७ ॥

***

९. सङ्कटनाशविष्णुस्तोत्रम्

(पद्मपुराणांतर्गतम्)

नमो मत्स्यकूर्मादिनानास्वरूपैः
सदा भक्तकार्योद्यतायार्तिहन्त्रे ।
विधात्रादिसर्गस्थितिध्वंसकर्त्रे
गदाशंखपद्मारिहस्ताय तेऽस्तु ॥ १ ॥

रमावल्लभायाऽसुराणां निहन्त्रे
भुजङ्गारियानाय पीताम्बराय ।
मखादिक्रियापाककर्त्रेऽघहन्त्रे
शरण्याय तस्मै नताः स्मो नताः स्मः ॥ २ ॥

नमो दैत्यसन्तापितामर्त्यदुःखा–
चलध्वंसदंभोलये विष्णवे ते ।
भुजङ्गेशतल्पेशयायार्कचन्द्र–
द्विनेत्राय तस्मै नताः स्मो नताः स्मः ॥ ३ ॥

सङ्कटनाशनं नाम स्तोत्रमेतत् पठेन्नरः ।
स कदाचिन्न सङ्कष्टैः पीड्यते कृपया हरेः ॥ ४ ॥

***

१०. अच्युताष्टकम्

(श्री शंकराचार्यकृतम्)

अच्युतं केशवं रामनारायणम्
कृष्णदामोदरं वासुदेवं विभुम् ।
श्रीधरं माधवं गोपिकावल्लभम्
जानकीनायकं रामचन्द्रं भजे ॥ १ ॥

अच्युतं केशवं सत्यभामाधवम्

माधवं श्रीधरं राधिकाऽराधितम् ।
इन्दिरामन्दिरं चेतसा सुन्दरम्
देवकीनन्दनं नन्दजं सन्दधे ॥ २ ॥

विष्णवे जिष्णवे शङ्खिने चक्रिणे
रुक्मिणीरागिणे जानकीजानये ।
वल्लवीवल्लभायार्चितायात्मने
कंसविध्वंसिने वंशिने ते नमः ॥ ३ ॥

कृष्ण गोविन्द हे राम नारायण
श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्द हे माधवाधोक्षज
द्वारकानायक द्रौपदीरक्षक ॥ ४ ॥

राक्षसक्षोभितः सीतयाशोभितो
दण्डकारण्यभूपुण्यताकारणः
लक्ष्मणेनान्वितो वानरैस्सेवितो ऽ–
गस्त्यसंपूजितो राघवः पातु माम् ॥ ५ ॥

धेनुकारिष्टकोऽनिष्टकृत् द्वेषिणाम्
केशिहा कंसहृद्वंशिकावादकः ।
पूतनाशोषकः सूरजाखेलनो
बालगोपालकः पातु मां सर्वदा ॥ ६ ॥

विद्युदुद्योतवत् प्रस्फुरद्वाससम्
प्रावृडंभोदवत् प्रोल्लसद्विग्रहम् ।
वन्ययामालया शोभितोरस्थलम्
लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ॥ ७ ॥

कुञ्चितैः कुन्तलैः भ्राजमाननम्
रत्नमौलिं लसत्कुण्डलं गण्डयोः ।

हारकेयूरकं कङ्कणप्रोज्ज्वलं
किङ्किणीमञ्जुलं श्यामलं तं भजे ॥ ८ ॥

अच्युतस्याष्टकं यः पठेदिष्टदम्
प्रेमतः प्रत्यहं पूरुषस्सम्पृहम् ।
वृत्ततस्सुन्दरं कर्तृविश्वंभरम्
तस्य वश्यो हरिर्जायते सत्वरम् ॥ ९ ॥

***

११. दुःखमोचकश्रीमदच्युताष्टकम्
(श्री शंकराचर्यकृतम्)

अच्युताच्युत हरे परमात्मन्
रामकृष्ण पुरुषोत्तम विष्णो ।
वासुदेव भगवन्ननिरुद्ध
श्रीपते शमय दुःखमशेषम् ॥ १ ॥

विश्वमङ्गल विभो जगदीश
नन्दनन्दन नृसिंह नरेन्द्र ।
मुक्तिदायक मुकुन्द मुरारे
श्रीपते शमय दुःखमशेषम् ॥ २ ॥

रामचन्द्र रघुनायक देव
दीननाथ दुरितक्षययकारिन् ।
यादवेन्द्र यदुभूषण यज्ञ
श्रीपते शमय दुःखमशेषम् ॥ ३ ॥

देवकीतनय दुःखदवाग्ने
राधिकारमण रम्य सुमूर्ते ।
दुःखमोचक दयार्णव नाथ
श्रीपते शमय दुःखमशेषम् ॥ ४ ॥

गोपिकावदनचन्द्रचकोर
नित्य निर्गुण निरन्जन जिष्णो ।
पूर्णरूप जयशंकरशर्व
श्रीपते शमय दुःखमशेषम् ॥ ५ ॥

गोकुलेश गिरिधारणधीर
यामुनाच्छतटखेलन वीर ।
नारदादि मुनिवन्दितपाद
श्रीपते शमय दुःखमशेषम् ॥ ६ ॥

द्वारकाधिप दुरन्तगुणाब्धे
प्राणनाथ परिपूर्ण भवारे ।
ज्ञानगम्य गुणसागर ब्रह्मन्
श्रीपते शमय दुःखमशेषम् ॥ ७ ॥

दुष्टनिर्दलन देव दयालो
पद्मनाभ धरणीधर धन्विन् ।
रावणान्तक रमेश मुरारे
श्रीपते शमय दुःखमशेषम् ॥ ८ ॥

अच्युताष्टकमिदं रमणीयम्
निर्मितं भवभयं विनिहन्तुम् ।
यः पठेत् विषयवृत्तिनिवृत्तिम्
जन्मदुःखमखिलं स जहाति ॥ ९ ॥

***

१२. श्री हरिस्तोत्रम्

(प्रह्लादकृतं)

हरिर्हरतिपापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छताऽपि संस्पृष्टो दहत्येव हि पावकः ॥ १ ॥

स गङ्गा स गया सेतुः स काशी स च पुष्करम् ।
जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥ २ ॥

वाराणस्यां कुरुक्षेत्रे नैमिशारण्य एव च ।
यत्कृतं तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ३ ॥

प्रिथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
तानि सर्वाण्यशेषाणि हरिरित्यक्षरद्वयम् ॥ ४ ॥

गवां कोटि सहस्राणि हेमकन्यासहस्रकम् ।
दत्तं स्यात् तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ५ ॥

ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।
अधीतस्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ६ ॥

अश्वमेधैर्महायज्ञैः नरमेधैस्तथैव च ।
इष्टं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ७ ॥

प्राणप्रयाणपाथेयं संसारव्याधिनाशनम् ।
दुःखात्यन्तपरित्राणं हरिरित्यक्षरद्वयम् ॥ ८ ॥

बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ।
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥ ९ ॥

हर्यष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
आयुष्यं दीर्घमारोग्यं यशोवृद्धिं स गच्छति ॥ १० ॥

प्रह्लादेन कृतं स्तोत्रं दुःखसागरशोषणम् ।

यः पठेत् स नरो याति तद्विष्णोः परमं पदम् ॥ ११ ॥

***

१३. श्री हर्यष्टकम्

(ब्रह्मानन्दविरचितम्)

जगज्जालपालं कनत्कण्ठमालम्
शरच्चन्द्रफालं महादैत्यकालम् ।
तमोनीलकायं दुरावारमायम्
सुपद्मासहायं भजेऽहं भजेऽहम् ॥ १ ॥
सदांभोधिवासं गले पुष्पहासम्
जगत्सन्निवासं शतादित्यभासम् ।
गदाचक्रहस्तं लसत्पीतवस्त्रम्
हसच्चारुवक्त्रं भजेऽहं भजेऽहम् ॥ २ ॥

रमाकण्ठहारं श्रुतिव्रातसारम्
जलान्तर्विहारं धराभारहारम् ।
चिदानन्दरूपं मनोज्ञस्वरूपम्
धृतानेकरूपं भजेऽहं भजेऽहम् ॥ ३ ॥

जराजन्महीनं परानन्दपीनम्
समाधानलीनं सदैवानवीनम् ।
जगज्जन्महेतुं सुरानीककेतुम्
त्रिलोकैकसेतुं भजेऽहं भजेऽहम् ॥ ४ ॥

कृताम्नायगानं खगाधीशयानम्
विमुक्तेर्निदानं हतारातिमानम् ।
स्वभक्तानुकूलं जगद्वृक्षमूलम्
निरस्तार्तशूलं भजेऽहं भजेऽहम् ॥ ५ ॥

समस्तामरेशं द्विरेफाभकेशम्
जगद्बिम्बलेशं हृदाकाशदेशम् ।
सदा दिव्यदेहं विमुक्ताखिलेहम्
सुवैकुण्ठगेहं भजेऽहं भजेऽहम् ॥ ६ ॥

सुरालीबलिष्ठं त्रिलोकीवरिष्ठम्
गुरूणां गरिष्ठं स्वरूपैकनिष्ठम् ।
सदा युद्धधीरं महावीरधीरम्
भवांभोधितीरं भजेऽहं भजेऽहम् ॥ ७ ॥

रमावामभागं तलानग्ननागम्
कृताधीनयागं गतारागरागम् ।
मुनीन्द्रैस्सुगीतं सुरैस्संपरीतम्
गुणौघैरतीतं भजेऽहं भजेऽहम् ॥ ८ ॥

इदं यस्तु नित्यं समाधाय चित्तम्
पठेदष्टकं कष्टहारं मुरारेः ।
स विष्णोर्विशोकं ध्रुवं याति लोकम्
जराजन्मशोकं पुनर्विन्दते नो ॥ ९ ॥

१४. श्री हरिनामाष्टकम्

(ब्रह्मानन्दविरचितम्)

श्रीकेशवाच्युत मुकुन्द रथाङ्गपाणे
गोविन्द माधव जनार्दन दानवारे ।
नारायणामरपते त्रिजगन्निवास
जिह्वे जपेति सततं मधुराक्षराणि ॥ १ ॥

श्रीदेवदेव मधुसूदन शार्ङ्गपाणे
दामोदरार्णवनिकेतन कैटभारे ।

विश्वंभाराभरणभूषित भूमिपाल
जिह्वे जपेति सततं मधुराक्षराणि ॥ २ ॥

श्रीपद्मलोचन गदाधर पद्मनाभ
पद्मेश पद्मपद पावन पद्मपाणे ।
पीताम्बराम्बररुचे रुचिरावतार
जिह्वे जपेति सततं मधुराक्षराणि ॥ ३ ॥

श्रीकान्त कौस्तुभधरार्तिहराब्जपाणे
विष्णो त्रिविक्रम महीधर धर्मसेतो ।
वैकुण्ठवास वसुधाधिप वासुदेव
जिह्वे जपेति सततं मधुराक्षराणि ॥ ४ ॥

श्रीनारसिंह नरकान्तक कान्तमूर्ते
लक्ष्मीपते गरुडवाहन शेषशायिन् ।
केशीप्रणाशन सुकेश किरीटमौले
जिह्वे जपेति सततं मधुराक्षराणि ॥ ५ ॥

श्रीवत्सलाञ्छन सुरर्षभ शङ्खपाणे
कल्पान्तवारिधिविहार हरे मुरारे ।
यज्ञेश यज्ञमय यज्ञभुगादिदेव
जिह्वे जपेति सततं मधुराक्षराणि ॥ ६ ॥

श्रीराम रावणरिपो रघुवंशकेतो
सीतापते दशरथात्मज राजसिंह ।
सुग्रीवमित्र मृगवेधन चापपाणे
जिह्वे जपेति सततं मधुराक्षराणि ॥ ७ ॥

श्रीकृष्ण वृष्णिवर यादव राधिकेश
गोवर्द्धनोद्धरण कंसविनाश शौरे ।

गोपाल वेणुधर पाण्डुसुतैकबन्धो
जिह्वे जपेति सततं मधुराक्षराणि ॥ ८ ॥

इत्यष्टकं भगवतः सततं नरो यः
नामाङ्कितं पठति नित्यमनन्यचेताः ।
विष्णोः परं पदमुपैति पुनर्न जातु
मातुः पयोधररसं पिबतीह सत्यम् ॥ ९ ॥

***

१५. श्री हरिशरणाष्टकम्

(श्री ब्रह्मानन्दविरचितम्)

ध्येयं वदन्ति शिवमेवहि केचिदन्ये
शक्तिं गणेशमपरे तु दिवाकरं वै ।
रूपैस्तु तैरपि विभासि यतस्त्वमेव
तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ १ ॥

नो सोदरो न जनको जननी न जाया
नैवात्मजो न च कुलं विपुलं बलं वा ।
संदृश्यते न किल कोऽपि सहायको मे
तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ २ ॥

नोपासिता मदमपास्य मया महान्तः
तीर्थानि चास्तिकधिया नहि सेवितानि ।
देवार्चनं च विधिवन्नकृतं कदापि
तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ ३ ॥

दुर्वासना मम सदा परिकर्षयन्ति
चित्तं शरीरमपि रोगगणा दहन्ति ।
सञ्जीवनं च परहस्तगतं सदैव

तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ ४ ॥

पूर्वं कृतानि दुरितानि मया तु यानि
स्मृत्वाऽखिलानि हृदयं परिकंपते मे ।
ख्याता च ते पतितपावनता तु यस्मात्
तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ ५ ॥

दुःखं जरामरणजं विविधाश्च रोगाः
काकश्वसूकरजनिर्निरये च पातः ।
ते विस्मृतेर्फलमिदं विततं हि लोके
तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ ६ ॥

नीचोऽपि पापवलितोऽपि विनिन्दितोऽपि
ब्रूयात् तवाहमिति यस्तु किलैकवारम् ।
तं नेष्यसीश निजलोकमिति व्रतं ते
तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ ७ ॥

वेदेषु धर्मवचनेषु तथागमेषु
रमायणेऽपि च पुराणकदम्बके वा ।
सर्वत्र सर्व विधिना गदितस्त्वमेव
तस्मात् त्वमेव शरणं मम शङ्खपाणे ॥ ८ ॥

***

१६. श्री जगन्नाथपञ्चकम्

रक्ताम्भोरुहदर्पभञ्जनमहासौन्दर्यनेत्रद्वयम्
मुक्ताहारविलंबिहेममकुटं रत्नोज्ज्वलत् कुण्डलम् ।
वर्षामेघसमाननीलवपुषं ग्रैवेयहारान्वितम्
पश्र्वे चक्रधरं प्रसन्नवदनं नीलाद्रिनाथं भजे ॥ १ ॥

फुल्लेन्दीवरलोचनं नवघनश्यामाभिरामाकृतिम्

विश्वेशं कमलाविलासविलसत् पादारविन्दद्वयम् ।
दैत्यारिं सकलेन्दुमण्डितमुखं चक्राब्जहस्तद्वयम्
वन्दे श्री पुरुषोत्तमं प्रतिदिनं लक्ष्मीनिवासालयम् ॥ २ ॥

उद्यन्नीरदनीलसुन्दरतनुं पूर्णेन्दुबिम्बाननम्
राजीवोत्पलपत्रनेत्रयुगलं कारुण्यवारांनिधिम् ।
भक्तानां सकलार्तिनाशनकरं चिन्ताब्धिचिन्तामणिम्
वन्दे श्री पुरुषोत्तमं प्रतिदिनं नीलाद्रिचूडामणिम् ॥ ३ ॥

नीलाद्रौ शङ्खमध्ये शतदलकमले रत्नसिंहासनस्थम्
सर्वालङ्कारयुक्तं नवघनरुचिरं संयुतं चाग्रजेन ।
भद्राया वामभागे रथचरणयुतं ब्रह्मरुद्रेन्द्रवन्द्यम्
वेदानां सारमीशं सुजनपरिवृतं ब्रह्मतातं स्मरामि ॥ ४ ॥

दोर्भ्यां शोभितलाङ्गलं समुसलं कादम्बरीचञ्चलम्
रत्नाढ्यं वरकुण्डलं भुजबलेनाक्रान्तभूमण्डलम् ।
वज्राभामलचारुगण्डयुगलं नागेन्द्रचूडोज्ज्वलम्
संग्रामे चपलं शशाङ्कधवलं श्रीकामपालं भजे ॥ ५ ॥

***

१७. पाण्डुरङ्गाष्टकम्

(श्री शंकराचार्यकृतम्)

महायोगपीठे तटे भीमरथ्याः
वरं पुण्डरीकाय दातुं मुनीन्द्रैः ।
समागत्य तिष्ठन्तमानन्दकन्दम्
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ १ ॥

तटिद्वाससं नीलमेघावभासम्
रमामन्दिरं सुन्दरं चित्प्रकाशम् ।
वरं त्विष्टकायां समन्यस्तपादम्

परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ २ ॥

प्रमाणं भवाब्धेरिदं मामकानाम्
नितंबः कराभ्यां धृतो येन तस्मात् ।
विधातुर्वसत्यै धृतो नाभिकोशः
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ ३ ॥

स्फुरत् कौस्तुभालङ्कृतं कण्ठदेशे
श्रिया जुष्टकेयूरकं श्रीनिवासम् ।
शिवं शान्तमीड्यं वरं लोकपालम्
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ ४ ॥

शरच्चन्द्रबिम्बाननं चारुहासम्
लसत्कुण्डलाक्रान्तगण्डस्थलाङ्गम् ।
जपारागबिम्बाधरं कञ्जनेत्रम्
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ ५ ॥

किरीटोज्ज्वलत् सर्वदिक्प्रान्तभागम्
सुरैरर्चितं दिव्यरत्नैरनर्घैः ।
त्रिभङ्गाकृतिं बर्हमाल्यावतंसम्
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ ६ ॥

विभुं वेणुनादं चरन्तं दुरन्तम्
स्वयं लीलया गोपवेषं दधानम् ।
गवां वृन्दकानन्ददं चारुहासम्
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ ७ ॥

अजं रुक्मिणीप्राणसञ्जीवनम् तम्
परं धाम कैवल्यमेकं तुरीयम् ।
प्रसन्नं प्रपन्नार्तिहं देवदेवम्
परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ ८ ॥

स्तवं पाण्डुरङ्गस्य वै पुण्यदं ये
पठन्त्येकचित्तेन भक्त्या च नित्यम् ।
भवांभोनिधिं तेऽपि तीर्त्वाऽन्तकाले
हरेरालयं शाश्वतं प्राप्नुवन्ति ॥ ९ ॥

***

१८. गोविन्दाष्टकम्

(श्री शंकराचार्यकृतम्)

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशम्
गोष्ठप्राङ्गणरिङ्गणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारम्
क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥ १ ॥

मृत्स्नामत्सीहेति यशोदाताडनशैशवसन्त्रासम्
व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम् ।
लोकत्रयपुरमूलस्तंभं लोकालोकमनालोकम्
लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम् ॥ २ ॥

त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नम्
कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ।
वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासम्
शैवं केवलशान्तं प्रणमत गोविन्दं परमानन्दम् ॥ ३ ॥

गोपालं भूलीलाविग्रहगोपालं कुलगोपालम्
गोपीखेलनगोवर्द्धनधृतिलीलालालितगोपालम् ।
गोभिर्निगदितगोविन्दस्फुटनामानं बहुनामानम्
गोपीगोचरदूरं प्रणमत गोविन्दं परमानन्दम् ॥ ४ ॥

गोपीमण्डलगोष्ठीभेदं भेदावस्थमभेदाभम्
शश्वत्गोखुरनिर्द्धूतोद्धत धूलीधूसरसौभाग्यम् ।
श्रद्धाभक्तिगृहीतानन्दमचिन्त्यं चिन्तितसद्भावम्
चिन्तामणि महिमानं प्रणमत गोविन्दं परमानन्दम् ॥ ५ ॥

स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढम्
व्यादित्सन्तीरथ दिग्वस्त्रा ताः दातुमुपाकर्षन्तम् ।
निर्द्धूतद्वयशोकविमोहं बुद्धं बुद्धेरन्तस्थम्
सत्तामात्रशरीरं प्रणमत गोविन्दं परमानन्दम् ॥ ६ ॥

कान्तं कारणकारणमादिमनादिं कालघनाभासम्
कालिन्दीगतकालियशिरसि सुनृत्यन्तं मुहुरत्यन्तम् ।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नम्
कालत्रयगतिहेतुं प्रणमत गोविन्दं परमानन्दम् ॥ ७ ॥

वृन्दावनभुवि वृन्दारकगणवृन्दाराधित पादाब्जम्
कुन्दाभामलमन्दस्मेरसुधानन्दं सुमहानन्दम् ।
वन्द्याशेषमहामुनिमानसवन्द्यानन्दपदद्वन्द्वं
वन्द्याशेषगुणाब्धिं प्रणमत गोविन्दं परमानन्दम् ॥ ८ ॥

गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेतो यो
गोविन्दाच्युत माधव विष्णो गोकुलनायक कृष्णेति ।
गोविन्दाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघो
गोविन्दं परमानन्दामृतमन्तःस्थं स समभ्येति ॥ ९ ॥

***

१९. श्री रङ्गनाथस्तोत्रम्

(श्री शंकराचार्यविरचितम्)

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे फणिपतिशयने शेषपर्यंकभागे ।

निद्रामुद्राभिरामं कटिनिकटशिरःपार्श्वविन्यस्तहस्तम्
पद्माधात्रीकराभ्यां परिचितचरणं रङ्गराजं भजेऽहम् ॥ १ ॥

आनन्दरूपे निजबोधरूपे
ब्रह्मस्वरूपे श्रुतिमूर्तिरूपे ।
शशांकरूपे रमणीयरूपे
श्रीरङ्गरूपे रमतां मनो मे ॥ २ ॥

कावेरितीरे करुणाविलोले
मन्दारमूले धृतचारुचेले ।
दैत्यान्तकालेऽखिललोकलीले
श्रीरङ्गलीले रमतां मनो मे ॥ ३ ॥

लक्ष्मीनिवासे जगतां निवासे
हृत्पद्मवासे रविबिम्बवासे ।
कृपानिवासे गुणबृन्दवासे
श्रीरङ्गवासे रमतां मनो मे ॥ ४ ॥

ब्रह्मादिवन्द्ये जगदेकवन्द्ये
मुकुन्दवन्द्ये सुरनाथवन्द्ये ।
व्यासादिवन्द्ये सनकादिवन्द्ये
श्रीरङ्गवन्द्ये रमतां मनो मे ॥ ५ ॥

ब्रह्माधिराजे गरुडाधिराजे
वैकुण्ठराजे सुरराजराजे ।
त्रैलोक्यराजेऽखिललोकराजे
श्रीरङ्गराजे रमतां मनो मे ॥ ६ ॥

अमोघमुद्रे परिपूर्णनिद्रे
श्रीयोगनिद्रे ससमुद्रनिद्रे ।
श्रितैकभद्रे जगदेकनिद्रे

श्रीरङ्गभद्रे रमतां मनो मे ॥ ७ ॥

स चित्रशायी भुजगेन्द्रशायी
नन्दाङ्कशायी कमलाङ्कशायी ।
क्षीराब्धिशायी वटपत्रशायी
श्रीरङ्गशायी रमतां मनो मे ॥ ८ ॥

इदं हि रङ्गं त्यजतामिहाङ्गम्
पुनर्नचाङ्कं यदि चाङ्गमेति ।
पाणौ रथाङ्गं चरणेम्बु गाङ्गम्
याने विहङ्गं शयने भुजङ्गम् ॥ ९ ॥

रङ्गनाथाष्टकं पुण्यम्
प्रातरुत्थाय यः पठेत् ।
सर्वान् कामानवाप्नोति
रङ्गिसायुज्यमाप्नुयात् ॥ १० ॥

२०. श्री सुदर्शनाष्टकम्

(श्री वेङ्कटनायकप्रणीतम्)

प्रतिभटश्रेणिभीषण वरगुणस्तोम भूषण
जनिभय स्थानतारण जगदवस्थानकारण ।
निखिलदुष्कर्मकर्शन निगमसद्धर्मदर्शन
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ १ ॥

शुभजगदूपमण्डन सुरगणत्रासखण्डन
शतमख ब्रह्मवन्दित शतपथब्रह्मनन्दित ।
प्रथित विद्वत्–सपक्षित भवदहिर्बुध्न्यलक्षित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ २ ॥

स्फुटतटिज्जालपिञ्जर पृथुतरज्वालपञ्जर

परिगतप्रत्नविग्रह परिमितप्रज्ञदुर्ग्रह ।
प्रहरण ग्राममण्डित परिजनत्राण पण्डित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ३ ॥

निजपदप्रोत सद्गण निरुपधि स्फीत षड्गुण
निगमनिर्व्यूढवैभव निजपरव्यूहवैभव ।

हरिहयद्वेषि दारण हरपुरप्लोषकारण
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ४ ॥

दनुजविस्तार कर्तन जनितमिस्राविकर्तन
दनुजविद्या निकर्तन भजदविद्या निवर्तन ।
अमरहृष्टस्वविक्रम समरजुष्टभ्रमिक्रम
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ५ ॥

प्रतिमुखालीढबन्धुर पृथुमहाहेतिदन्तुर
विकटमायाबहिष्कृत विविधमाला परिष्कृत ।
पृथुमहायन्त्र तन्त्रित दृढदयातन्त्रयन्त्रित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ६ ॥

महित संपत्–सदक्षर विहित संपत्–षडक्षर
षडारचक्रप्रतिष्ठित सकलतत्वप्रतिष्ठित ।
विविधसङ्कल्पकल्पक विबुधसङ्कल्पकल्पक
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ७ ॥

भुवननेतस्त्रयीमय सवन तेजस्त्रयीमय
निरवधिस्वादुचिन्मय निखिलशक्ते जगन्मय ।
अमित विश्वक्रियामय शमित विष्वग्–भयामय
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥ ८ ॥

द्विचतुष्कमिदं प्रभूतसारं पठतां वेङ्कटनायकप्रणीतम् ।

विषमेऽपि मनोरथः प्रधावन् न विहन्येत रथाङ्गधुर्यगुप्तः ॥ ९ ॥

***

२१. दशावतारस्तोत्रम्

(जयदेवकृतं, अष्टपदी अन्तर्गतम्)

प्रलयपयोधिजले धृतवानसि वेदम्
विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर
जय जगदीश हरे ॥ १ ॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणिधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप
जय जगदीश हरे ॥ २ ॥

वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलङ्ककलेव निमग्ना ।
केशव धृतसूकररूप
जय जगदीश हरे ॥ ३ ॥

तव करकमलवरे नखमद्भुतशृङ्गम्
दलितहिरण्यकशिपुतनुभृङ्गम् ।
केशव धृतनरहरिरूप
जय जगदीश हरे ॥ ४ ॥

छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनित जनपावन ।
केशव धृतवामनरूप
जय जगदीश हरे ॥ ५ ॥

क्षत्रियरुधिरमये जगदपगतपापम्
स्नपयसिपयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप
जय जगदीश हरे ॥ ६ ॥

वितरसि दिक्षु रणे दिक्पतिकमनीयम्
दशमुखमौलिबलिं रमणीयम् ।
केशव धृतरघुपतिवेष
जय जगदीश हरे ॥ ७ ॥

वहसि वपुषि विशदे वसनं जलदाभम्
हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधररूप
जय जगदीश हरे ॥ ८ ॥

निन्दसि यज्ञविधेरहह श्रुतिजातम्
सदयहृदय दर्शितपशुघातम् ।
केशव धृतबुद्धशरीर
जय जगदीश हरे ॥ ९ ॥

म्लेच्छनिवहनिधने कलयसि करवालम्
धूमकेतुमिव किमपि करालम् ।
केशव धृतकल्किशरीर
जय जगदीश हरे ॥ १० ॥

श्रीजयदेवकवेरिदमुदितमुदारम्
शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप
जय जगदीश हरे ॥ ११ ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते

दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कुलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ १२ ॥

***

२२. श्री लक्ष्मीनृसिंहस्तोत्रम्

(श्री शंकराचार्यविरचितम्)

श्रीमत् पयोनिधिनिकेतन चक्रपाणे
भोगीन्द्रभोगमणिरञ्जितपुण्यमूर्ते ।
योगीश शाश्वत शरण्य भवाब्धिपोत
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ १ ॥

ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि–
सङ्घट्टिताङ्घ्रिकमलामलकान्तिकान्त ।
लक्ष्मीलसत्कुचसरोरुहराजहंस
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ २ ॥

संसारघोरगहने चरतो मुरारे
मारोग्रभीकरमृगप्रवरार्दितस्य ।
आर्तस्यमत्सरनिदाघनिपीडितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ३ ॥

संसारकूपमतिघोरमगाधमूलम्
संप्राप्य दुःखशतसर्पसमाकुलस्य ।
दीनस्य देव कृपणापदमागतस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ४ ॥

संसारसागरविशालकरालकाल–
नक्रग्रहग्रसननिग्रह विग्रहस्य ।
व्यग्रस्य रागरसनोर्मिनिपीडितस्य

लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ५ ॥

संसारवृक्षमघबीजमनन्तकर्म–
शाखाशतं करणपत्रमनङ्गपुष्पम् ।
आरुह्यदुःखफलितं पततो दयालो
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ६ ॥

संसारसर्पघनवक्त्रभयोग्रतीव्र–
दंष्ट्राकरालविषदग्द्धविनष्टमूर्तेः ।
नागारिवाहन सुधाब्धिनिवास शौरे
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ७ ॥

संसारदावदहनातुरभीकरोरु–
ज्वालावलीभिरतिदग्धतनूरुहस्य ।
त्वत्पादपद्मसरसीशरणागतस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ८ ॥

संसारजालपतितस्य जगन्निवास
सर्वेन्द्रियार्थबडिशार्थझषोपमस्य ।
प्रोत्खण्डितप्रचुरतालुकमस्तकस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ९ ॥

संसारभीकरकरीन्द्रकराभिघात–
निष्पिष्टमर्म वपुषः सकलार्तिनाश ।
प्राणप्रयाणभवभीतिसमाकुलस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ १० ॥

अन्धस्य मे हृतविवेकमहाधनस्य
चौरैः प्रभो बलिभिरिन्द्रियनामधेयैः ।
मोहांधकारकुहरे विनिपातितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ११ ॥

लक्ष्मीपते कमलनाभ सुरेश विष्णो
वैकुण्ठ कृष्ण मधुसूदन पुष्कराक्ष ।
ब्रह्मण्य केशव जनार्दन वासुदेव
देवेश देहि कृपणस्य करावलम्बम् ॥ १२ ॥

यन्माययोजितवपुः प्रचुरप्रवाह–
मग्नार्थमत्र निवहोरुकरावलम्बम् ।
लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन
स्तोत्रं कृतं सुखकरं भुवि शंकरेण ॥ १३ ॥

***

२३. श्रीनरसिंहाष्टकम्

श्रीमदकलङ्क परिपूर्ण शशिकोटि
श्रीधर मनोहर सटापटलकान्त ।
पालय कृपालय भवाम्बु निमग्नम्
दैत्यवरकाल नरसिंह नरसिंह ॥ १ ॥

पदकमलावनत–पातकिजनानाम्
पातक दवानल पतत्रि वरकेतो ।
भावन परायण भवार्तिहरया माम्
पाहि कृपयैव नरसिंह नरसिंह ॥ २ ॥

तुङ्गनखपङ्क्ति दलितासुरवरासृक्–
पङ्कनव कुङ्कुम विपङ्किल महोरः ।
पण्डित निधान कमलालय नमस्ते
पङ्कज निषण्ण नरसिंह नरसिंह ॥ ३ ॥

मौलिषु विभूषणमिवामरवराणाम्
योगि हृदयेषु च शिरस्सु निगमानाम् ।
राजदरविन्द रुचिरं पदयुगं ते

धेहि मम मूर्ध्नि नरसिंह नरसिंह ॥ ४ ॥

वारिजविलोचन मदन्तिम दशायाम्
क्लेशविवशीकृत समस्तकरणायाम् ।
एहि रमयासह शरण्य विहगानाम्
नाथमधिरुह्य नरसिंह नरसिंह ॥ ५ ॥

हाटक किरीट वरहार वनमाला
तारशना मकर कुण्डल मणीन्द्रैः ।
भूषितमशेषनिलयं तव वपुर्मे
चेतसि चकास्तु नरसिंह नरसिंह ॥ ६ ॥

इन्दुरवि पावक विलोचन रमाया–
मन्दिर महाभुज लसद्वर रथाङ्ग ।
सुन्दर चिराय रमतां त्वयि मनो
नन्दित सुरेश नरसिंह नरसिंह ॥ ७ ॥

माधव मुकुन्द मधुसूदन मुरारे
वामन नृसिंह शरणं भव नतानाम् ।
कामद घृणिन् निखिलकारण नयेयम्
कालममरेश नरसिंह नरसिंह ॥ ८ ॥

अष्टकमिदं सकल पातकभयघ्नम्
कामदमशेषदुरितामयरिपुघ्नम् ।
यः पठति सन्ततमशेषनिलयं ते
गच्छति पदं स नरसिंह नरसिंह ॥ ९ ॥

***

२४ . श्री नृसिंहपञ्चामृतस्तोत्रम्

(श्रीरामकृतम्)

अहोबिलं नारसिंहं गत्वा रामः प्रतापवान् ।
नमस्कृत्वा श्रीनृसिंहं अस्तौषीत् कमलापतिम् ॥ १ ॥

गोविन्द केशव जनार्दन वासुदेव
विश्वेश विश्व मधुसूदन विश्वरूप ।
श्री पद्मनाभ पुरुषोत्तम पुष्कराक्ष
नारायणाच्युत नृसिंह नमो नमस्ते ॥ २ ॥

देवाः समस्ताः खलु योगिमुख्याः
गन्धर्व विद्याधर किन्नराश्च ।
यत्पादमूलं सततं नमन्ति
तं नारसिंहं शरणं गतोऽस्मि ॥ ३ ॥

वेदान् समस्तान् खलु शास्त्रगर्भान्
विद्याबले कीर्तिमतीं च लक्ष्मीम् ।
यस्य प्रसादात् सततं लभन्ते
तं नारसिंहं शरणं गतोऽस्मि ॥ ४ ॥

ब्रह्मा शिवस्त्वं पुरुषोत्तमश्च
नारायणोऽसौ मरुतां पतिश्च ।
चन्द्रार्क वाय्वग्नि मरुद्गणाश्च
त्वमेव तं त्वां सततं नतोऽस्मि ॥ ५ ॥

स्वप्नेऽपि नित्यं जगतां त्रयाणाम्
स्रष्टा च हन्ता विभुरप्रमेयः ।
त्राता त्वमेकस्त्रिविधो विभिन्नः
तं त्वां नृसिंहं सततं नतोऽस्मि ॥ ६ ॥

राघवेणकृतं स्तोत्रं पञ्चामृतमनुत्तमम् ।
पठन्ति ये द्विजवराः तेषां स्वर्गस्तु शाश्वतः ॥ ७ ॥

***

२५. श्रीविष्णुशतनामस्तोत्रम्

वासुदेवं हृषीकेशं वामनं जलशायिनम् ।
जनार्दनं हरिं कृष्णं श्रीवक्षं गरुडध्वजम् ॥ १ ॥

वराहं पुण्डरीकाक्षं नृसिंहं नरकान्तकम् ।
अव्यक्तं शाश्वतं विष्णुं अनन्तमजमव्ययम् ॥ २ ॥

नारायणं गदाध्यक्षं गोविन्दं कीर्तिभाजनम् ।
गोवर्द्धनोद्धरं देवं भूधरं भुवनेश्वरं ॥ ३ ॥

वेत्तारं यज्ञपुरुषं यज्ञेशं यज्ञवाहकम् ।
चक्रपाणिं गदापाणिं शङ्खपाणिं नरोत्तमम् ॥ ४ ॥

वैकुण्ठं दुष्टदमनं भूगर्भं पीतवाससम् ।
त्रिविक्रमं त्रिकालज्ञं त्रिमूर्तिं नन्दिकेश्वरं ॥ ५ ॥

रामं रामं हयग्रीवं भीमं रौद्रं भवोद्भवम् ।
श्रीपतिं श्रीधरं श्रीशं मङ्गलं मङ्गलायुधम् ॥ ६ ॥

दामोदरं दमोपेतं केशवं केशिसूदनम् ।
वरेण्यं वरदं विष्णुं आनन्दं वसुदेवजम् ॥ ७ ॥

हिरण्यरेतसं दीप्तं पुराणं पुरुषोत्तमम् ।
सकलं निष्कलं शुद्धं निर्गुणं गुणशाश्वतम् ॥ ८ ॥

हिरण्यतनुसङ्काशं सूर्यायुतसमप्रभम् ।
मेघश्यामं चतुर्बाहुं कुशलं कमलेक्षणम् ॥ ९ ॥

ज्योतिरूपमरूपं च स्वरूपं रूपसंस्थितम् ।

सर्वज्ञं सर्वरूपस्थं सर्वेशं सर्वतोमुखम् ॥ १० ॥

ज्ञानं कूटस्थमचलं ज्ञानदं परमं प्रभुम् ।
योगीशं योगनिष्णातं योगिनं योगरूपिणम् ॥ ११ ॥

ईश्वरं सर्वभूतानां वन्दे भूतमयं प्रभुम् ।
इति नामशतं दिव्यं वैष्णवं खलु पापहम् ॥ १२ ॥

व्यासेन कथितं पूर्वं सर्वपापप्रणाशनम् ।
यः पठेत् प्रातरुत्थाय स भवेत् वैष्णवो नरः
सर्वपापविशुद्धात्मा विष्णुसायुज्यमाप्नुयात् ॥ १३ ॥

***

२६. श्री वेङ्कटेश द्वादशनामस्तोत्रम्

वेङ्कटेशो वासुदेवः वारिजासनवन्दितः ।
स्वामिपुष्करणीवासः शङ्खचक्रगदाधरः ॥ १ ॥

पीतांबरधरो देवः गरुडारूढशोभितः ।
विश्वात्मा विश्वलोकेशः विजयो वेङ्कटेश्वरः ॥ २ ॥

एतत् द्वादश नामानि त्रिसन्ध्यं यः पठेन्नरः ।
सर्वपापविनिर्मुक्तो विष्णोस्सायुज्यमाप्नुयात् ॥ ३ ॥

***

२७. श्रीवेङ्कटेशमङ्गलस्तोत्रम्

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥ १ ॥

लक्ष्मीसविभ्रमालोकसद्मविभ्रमचक्षुषे ।

चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम् ॥ २ ॥

श्रीवेङ्कटाद्रिशृङ्गाय मङ्गलाभरणाङ्घ्रये ।
मङ्गलानां निवासाय वेङ्कटेशाय मङ्गलम् ॥ ३ ॥

सर्वावयवसौन्दर्यसंपदा सर्वचेतसाम् ।
सदा सम्मोहनायास्तु वेङ्कटेशाय मङ्गलम् ॥ ४ ॥

नित्याय निरवद्याय सत्यानन्द चिदात्मने ।
सर्वान्तरात्मने श्रीमद् वेङ्कटेशाय मङ्गलम् ॥ ५ ॥

स्वतः सर्वविदे सर्वशक्तये सर्वशेषिणे ।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गलम् ॥ ६ ॥

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने ।
प्रपन्नपरतत्वाय वेङ्कटेशाय मङ्गलम् ॥ ७ ॥

अकालतत्वविश्रान्तावात्मानमनुपश्यताम् ।
अतृप्तामृतरूपाय वेङ्कटेशाय मङ्गलम् ॥ ८ ॥

प्रायः स्वचरणौ पुंसां शरण्यत्वेन पाणिना ।
कृपया दर्शयते श्रीमद् वेङ्कटेशाय मङ्गलम् ॥ ९ ॥

दयामृततरङ्गिण्याः तरङ्गैरतिशीतलैः ।
अपाङ्गैः सिञ्चते विश्वं वेङ्कटेशाय मङ्गलम् ॥ १० ॥

स्रग्भूषाम्बरहेतीनां सुषमावहमूर्तये ।
सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गलम् ॥ ११ ॥

श्रीवैकुण्ठविरक्ताय स्वामिपुष्करणीतटे ।

रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥ १२ ॥

श्रीमद् सुन्दरजामातृमुनिमानसवासिने ।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥ १३ ॥

नमः श्रीवेङ्कटेशाय शुद्धज्ञानस्वरूपिणे ।
वासुदेवाय शान्ताय श्रीनिवासाय मङ्गलम् ॥ १४ ॥

***

२८. पञ्चायुधस्तोत्रम्

स्फुरत्सहस्रारशिखातितीव्रं सुदर्शनं भास्करकोटितुल्यम् ।
सुरद्विषांप्राणविनाशि विष्णोश्चक्रं सदाऽहं शरणं प्रपद्ये ॥ १ ॥

विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ता ।
तं पाञ्चजन्यं शशिकोटिशुभ्रं शङ्खं सदाऽहं शरणं प्रपद्ये ॥ २ ॥

हिरण्मयीं मेरुसमानसारां कौमोदकीं दैत्यकुलैकहन्त्रीम् ।
वैकुण्ठवामाग्रकराभिमृष्टां गदां सदाऽहं शरणं प्रपद्ये ॥ ३ ॥

रक्षोऽसुराणांकठिनोग्रकण्ठच्छेदक्षरच्छोणितदिग्धधारम् ।
तं नन्दकं नाम हरेः प्रदीप्तं खड्गं सदाऽहं शरणं प्रपद्ये ॥ ४ ॥

यज्ज्यानिनादश्रवणात्सुराणां चेतांसि निर्मुक्तभयानि सद्यः ।
भवन्ति दैत्याऽशनि बाणवर्षि शार्ङ्गं सदाऽहं शरणं प्रपद्ये ॥ ५ ॥

इमं हरेः पञ्चमहायुधानां स्तवं पठेद्योनुदिनं प्रभाते ।
समस्त दुःखानि भयानि सद्यः पापानि नश्यन्ति सुखानि सन्ति ॥ ६ ॥

वने रणे शत्रुजलाग्निमध्ये यदृच्छयापत्सु महा भयेषु ।
इदं पठन् स्तोत्रमनाकुलात्मा सुखी भवेत् तत्कृत सर्वरक्षः ॥ ७ ॥

***

२९. द्वादशनामपञ्जरम्

पुरस्तात् केशवः पातु चक्री जाम्बूनदप्रभः ।
पश्चान्नारायणः शङ्खी नीलजीमूतसन्निभः ॥ १ ॥

इन्दीवरदलश्यामो माधवोर्ध्वं गदाधरः ।
गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥ २ ॥

उत्तरे हलभृद्विष्णुः पद्मकिञ्जल्कसन्निभः ।
आग्नेय्यामरविन्दाभो मुसली मधुसूदनः ॥ ३ ॥

त्रिविक्रमः खड्गपाणिः निर्ऋत्यां ज्वलनप्रभः ।
वायव्यां वामनो वज्री तरुणादित्यदीप्तिमान् ॥ ४ ॥

ऐशान्यां पुण्डरीकाभः श्रीधरः पट्टसायुधः ।
विद्युत्प्रभो हृषीकेशः स बाह्यान् दिशि मुद्गरी ॥ ५ ॥

हृत्पद्मे पद्मनाभो मे सहस्रार्कसमप्रभः ।
सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः ॥ ६ ॥

इन्द्रगोपकसङ्काशः पाशहस्तोऽपराजितः ।
स बाह्याभ्यन्तरं देहं व्याप्य दामोदर स्थितः ॥ ७ ॥

एवं सर्वत्रमच्छिद्रं नामद्वादशपञ्जरम् ।
प्रविष्टोऽहं न मे किञ्चिद्भयमस्ति कदाचन ॥ ८ ॥
भयन्नास्ति कदाचन ओं नम इति ।

३०. श्रीमुकुन्दमाला

(श्रीकुलशेखरकृता)

वन्दे मुकुन्दमरविन्ददलायताक्षम्
कुन्देन्दुशङ्खदशनं शिशुगोपवेषम् ।
इन्द्रादिदेवगणवन्दितपादपीठम्
वृन्दावनालयमहं वसुदेवसूनुम् ॥ १ ॥

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे–
त्यालापनं प्रतिपदं कुरु मे मुकुन्द ॥ २ ॥

जयतु जयतु देवो देवकीनन्दनोऽयम्
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गः
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ ३ ॥

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिः त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात् ॥ ४ ॥

श्रीगोविन्दपदांभोजमधुनो महदद्भुतम् ।
तत्पायिनो न मुञ्चन्ति मुञ्चन्ति पदपायिनः ॥ ५ ॥

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुंभीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्या रामा मृदुतनुलतानन्दनेनापि रन्तुम्
भावे भावे हृदयभवने भावयेयं भवन्तम् ॥ ६ ॥

नास्था धर्मे न च वसुनिचये नैव कामोपभोगे
यद्यद्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादांभोरुहयुगगता निश्चला भक्तिरस्तु ॥ ७ ॥

दिवि वा भुवि वा ममास्तु वसो
नरके वा नरकान्तक प्रकामम् ।
अवधीरित शारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ॥ ८ ॥

कृष्ण त्वदीय पदपङ्कजपञ्जरान्त–
रद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ९ ॥

सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरमेह चित्त रन्तुं ।
सुखकरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥ १० ॥

मा भैर्मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातनाः
तेऽमी न प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणम्
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ ११ ॥

भवजलधिगतानां द्वन्द्ववाताहतानाम्
सुतदुहितृकलत्रत्राण भारार्दितानाम् ।
विषमविषयतोये मज्जतामप्लवानाम्
भवति शरणमेको विष्णुपोतो नाराणाम् ॥ १२ ॥

भवजलधिमगाधं दुस्तरं निस्तरेयम्
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिज दृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ १३ ॥

तृष्णातोये मदनपवनोद्धूतमोहोर्मिजाले
दारावर्ते तनयसहजग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादांभोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ १४ ॥

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरम्
पाणिद्वन्द्व समर्चयाऽच्युतकथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम् ॥ १५ ॥

हे मर्त्याः परमं हितं शृणुत वो वक्ष्यामि संक्षेपतः
संसारार्णवमापदूर्मिबहुलं सम्यक् प्रविश्य स्थिताः ।
नानाज्ञानमपास्य चेतसि नमो नारायणायेत्यमुम्
मन्त्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ॥ १६ ॥

बद्धेनाञ्जलिना नतेनशिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयनेनोद्गीर्णबाष्पाम्बुना ।
नित्यं त्वच्चरणारविन्दयुगलध्यानामृतास्वादिनाम्
अस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥ १७ ॥

भक्तापायभुजङ्गगारुडमणिः त्रिलोक्यरक्षामणिः
गोपीलोचनचातकाम्बुदमणिः सौदर्यमुद्रामणिः ।
यः कान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः
श्रेयो दैवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ १८ ॥

शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसंपूज्यमन्त्रम्

संसारोत्तारमन्त्रं समुपचिततमस्सङ्घनिर्याणमन्त्रम् ।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसंदष्टसंत्राणमन्त्रम्
जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ॥ १९ ॥

व्यामोहप्रशमौषधं मुनिमनोवृतिप्रवृत्यौषधम्
दैत्येन्द्रार्तिहरौषधं त्रिजगतां सञ्जीवनैकौषधम् ।
भक्तात्यन्तहितौषधं भवभयप्रध्वंसनैकौषधं
श्रेयः प्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥ २० ॥

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्यभृत्य परिचारकभृत्यभृत्य–
भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ २१ ॥

इदं शरीरं परिणामपेशलम्
पतत्यवश्यं श्लथसन्धिजर्जरम् ।
किमौषधैः क्लिश्यति मूढ दुर्मते
निरामयं कृष्णरसायनं पिब ॥ २२ ॥

नमामि नारायण पादपङ्कजम्
करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलम्
स्मरामि नारायणतत्वमव्ययम् ॥ २३ ॥

श्रीनाथ नारायण वासुदेव
श्रीकृष्ण भक्तप्रिय चक्रपाणे ।
श्रीराम पद्माक्ष हरे मुरारे
श्रीरङ्गनाथाय नमो नमस्ते ॥ २४ ॥

***

श्री लक्ष्मीस्तोत्राणि

विषयसूची

पृष्ठसंख्या

१.	श्री महालक्ष्म्यष्टकम्	२७४
२.	कनकधारास्तोत्रम्	२७५
३.	विजयलक्ष्मीस्तोत्रम्	२७८
४.	श्रीस्तुतिः	२७९
५.	श्री लक्ष्मीध्यानम्	२८२

***

१. श्री महालक्ष्म्यष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तुते ॥ १ ॥

नमस्ते गरुडारूढे कोलासुरभयंकरी ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तुते ॥ २ ॥

सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तुते ॥ ३ ॥

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्ति प्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तुते ॥ ४ ॥

आद्यंतरहिते देवि आद्यशक्ति महेश्वरि ।
योगजे योगसंभूते महालक्ष्मि नमोऽस्तुते ॥ ५ ॥

स्थूलसूक्ष्म महारौद्रे महाशक्ति महोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तुते ॥ ६ ॥

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातः महालक्ष्मि नमोऽस्तुते ॥ ७ ॥

श्वेतांबरधरे देवि नानालंकारभूषिते ।
जगत्स्थिते जगन्मातः महालक्ष्मि नमोऽस्तुते ॥ ८ ॥

महालक्ष्यष्टकं स्तोत्रं यः पठेत् भक्तिमान्नरः ।

सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥ ९ ॥

एककाले पठेन्नित्यं महापापविनाशनं ।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥ १० ॥

त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनं ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥ ११ ॥

***

२. कनकधारास्तोत्रम्

(श्रीशंकराचार्यविरचितम्)

अङ्गं हरेः पुलकभूषणमाश्रयन्ती
भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।
अंगीकृताखिलविभूतिरपांगलीला
मांगल्यदास्तु मम मंगलदेवतायाः ॥ १ ॥

मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपाप्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसंभवायाः ॥ २ ॥

आमीलिताक्षमधिगम्य मुदा मुकुन्दं
आनन्दकन्दमनिमेषमनंगतन्त्रम् ।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं
भूत्यै भवेन्मम भुजंगशयांगनायाः ॥ ३ ॥

बाह्वन्तरे मधुजितः श्रितकौस्तुभे या
हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला
कल्याणमावहतु मे कमलालयायाः ॥ ४ ॥

कालाम्बुदालिललितोरसि कैटभारेः
धाराधरे स्फुरति या तटिदङ्गनेव ।
मातुस्समस्तजगतां महनीयमूर्तिः
भद्राणि मे दिशतु भार्गवनन्दनायाः ॥ ५ ॥

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात्
माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मयापतेत्तदिह मन्थरमीक्षणार्धं
मन्दालसं च मकरालयकन्यकायाः ॥ ६ ॥

विश्वामरेन्द्रपदविभ्रमदानदक्षं
आनन्दहेतुरधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्धं
इन्दीवरोदरसहोदरमिन्दिरायाः ॥ ७ ॥

इष्टा विशिष्टमतयोऽपि यया दयार्द्र–
दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ॥ ८ ॥

दद्याद्दयानुपवनो द्रविणाम्बुधारां
अस्मिन्नकिञ्चनविहंगशिशौ विषण्णे ।
दुष्कर्मघर्ममपनीय चिराय दूरं
नारायणप्रणयिनीनयनाम्बुवाहः ॥ ९ ॥

गीर्देवतेति गरुडध्वजसुन्दरीति
शाकंभरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥ १० ॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै
रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ ११ ॥

नमोऽस्तु नालीकनिभाननायै
नमोऽस्तु दुग्धोदधिजन्मभूम्यै ।
नमोऽस्तु सोमामृतसोदरायै
नमोऽस्तु नारायणवल्लभायै ॥ १२ ॥

नमोऽस्तु हेमाम्बुजपीठिकायै
नमोऽस्तु भूमण्डलनायिकायै ।
नमोऽस्तु देवादिदयापरायै
नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥ १३ ॥

नमोऽस्तु देव्यै भृगुनन्दनायै
नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदरवल्लभायै ॥ १४ ॥

नमोऽस्तु कान्त्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।
नमोऽस्तु देवादिभिरर्चितायै
नमोऽस्तु नन्दात्मजवल्लभायै ॥ १५ ॥

सम्पत्करणि सकलेन्द्रियनन्दनानि
साम्राज्यदानविभवानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरितहरणोद्यतानि
मामेव मातरनिशं कलयन्तु मान्ये ॥ १६ ॥

यत्कटाक्षसमुपासनाविधिः
सेवकस्यसकलार्थसंपदः ।
सन्तनोतिवचनाङ्गमानसैः
त्वां मुरारि हृदयेश्वरीं भजे ॥ १७ ॥

सरसिजनिलये सरोजहस्ते
धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १८ ॥

दिग्घस्तिभिः कनककुम्भमुखावसृष्ट–
स्वर्वाहिनीविमलचारुजलाप्लुताङ्गीम् ।
प्रातर्नमामि जगतां जननीमशेष–
लोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ॥ १९ ॥

कमले कमलाक्षवल्लभे त्वं
करुणापूरतरङ्गितैरपाङ्गैः ।
अवलोकय मामकिञ्चनानां
प्रथमं पात्रमकृत्रिमं दयायाः ॥ २० ॥

स्तुवन्ति ये स्तुतिभिरमीभिरन्वहं
त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतरभाग्यभागिनः
भवन्ति ते भुवि बुधभाविताशयाः ॥ २१ ॥

***

३. विजयलक्ष्मीस्तवं

(अगस्त्यकृतं)

जय पद्मविशालाक्षि जय त्वं श्रीपतिप्रिये ।
जय मातर्महालक्ष्मि संसारार्णवतारिणि ॥ १ ॥

महालक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि ।
हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥ २ ॥

पद्मालये नमस्तुभ्यं नमस्तुभ्यं च सर्वदे ।
सर्वभूतहितार्थाय वसुवृष्टिं सदा कुरु ॥ ३ ॥

जगन्मातर्नमस्तुभ्यं नमस्तुभ्यं दयानिधे ।
दयावति नमस्तुभ्यं विश्वेश्वरि नमोऽस्तु ते ॥ ४ ॥

नमः क्षीरार्णवसुते नमस्त्रैलोक्यधारिणि ।
रक्ष त्वं देवदेवेशि देवदेवस्य वल्लभे ॥ ५ ॥

दारिद्र्यात् त्राहि मां लक्ष्मि कृपां कुरु ममोपरि ।
नमस्त्रैलोक्यजननि नमस्त्रैलोक्यपावनि ॥ ६ ॥

ब्रह्मादयो नमन्ते त्वां जगदानन्ददायिनि ।
विष्णुप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते ॥ ७ ॥

आर्तिहन्त्रि नमस्तुभ्यं समृद्धिं कुरु मे सदा ।
अब्जवासे नमस्तुभ्यं चापलायै नमो नमः ॥ ८ ॥

चञ्चलायै नमस्तुभ्यं ललितायै नमो नमः ।
नमः प्रद्युम्नजननि मातस्तुभ्यं नमो नमः ॥ ९ ॥

परिपालय भो मातः मां तुभ्यं शरणागतम्
शरण्ये त्वां प्रपन्नोऽस्मि कमले कमलालये ।
त्राहि त्राहि महालक्ष्मि परित्राणपरायणे ॥ १० ॥

लक्ष्मि त्वद्गुणकीर्तनेन कमलाभूर्यात्यलं जिह्मतां
रुद्राद्या रविचन्द्रदेवपतयो वक्तुं न चैव क्षमाः ।
अस्माभिस्तवरूपलक्षणगुणान् वक्तुं कथं शक्यते
मातर्मां परिपाहि विश्वजननि कृत्वा ममेष्टं ध्रुवम् ॥ ११ ॥

***

४. श्रीस्तुतिः

(श्री वेदान्तदेशिकविरचितम्)

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणः त्वां शरण्यां प्रपद्ये ॥ १ ॥

आविर्भावः कलशजलधावध्वरे वापि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षस्थलं वा ।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम् ॥ २ ॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामनितरगतिः स्तोतुमाशंसमानः।
सिद्धारम्भः सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ३ ॥

यत् सङ्कल्पात् भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रलयरचना जङ्गमाजङ्गमानाम् ।
तत् कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवती पादलाक्षारसाङ्कम् ॥ ४ ॥

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम् ।

शेषश्चित्तं विमलमनसां मौलयश्च श्रुतीनां
संपद्यन्ते विहरणविधौ यस्य शय्याविशेषाः ॥ ५ ॥

उद्देश्यत्वं जननि भजतोरुझितोपाधिगन्धं
प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात् ।
पद्मे पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन् मानसं नः ॥ ६ ॥

पश्यन्तीषु श्रुतिषु परितः सूरिबृन्देनसार्धं
मध्येकृत्य त्रिगुणफलकं निर्मितस्थानभेदम् ।
विश्वाधीशप्रणयिनि सदा विभ्रमद्यूतवृत्तौ
ब्रह्मेशाद्या दधति युवयोरक्षशार प्रचारम् ॥ ७ ॥

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति ।
यन्नामानि श्रुतिपरिपणान्येवमावर्तयन्तो
नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे ॥ ८ ॥

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किंतैरन्तःकलहमलिनैः किञ्चिदुत्तीर्यमग्नैः ।
त्वत्संप्रीत्यै विहरति हरौ सम्मुखीनां श्रुतीनां
भावारूढौ भगवति युवां दैवतं दंपती नः ॥ ९ ॥

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य विष्णोः
आचख्युस्त्वां प्रियसहचरीमैकमत्योपपन्नां ।
प्रादुर्भावैरपि समतनुः प्राक्तमन्वीयसे त्वम्
दूरेक्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ॥ १० ॥

धत्ते शोभां हरिमरकते तावकीमूर्तिराद्या
तन्वी तुङ्गस्तनभरनता तप्तजांबूनदाभा ।

यस्यां गच्छत्युदयविलयैर्नित्यमानन्दसिन्धा–
विच्छावेगोल्लसितलहरी विभ्रमं व्यक्तयस्ते ॥ ११ ॥

आसंसारं विततमखिलं वाङ्मयं यद्विभूतिः
यद्भ्रूभङ्गात् कुसुमधनुषः किङ्करो मेरुधन्वा ।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥ १२ ॥

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णां
अम्भोराशेरधिगतसुधासंप्लवादुत्थितां त्वाम् ।
पुष्पासार स्थगितभुवनैः पुष्कलावर्तकाद्यैः
कॢप्तारम्भाः कनककलशैरभ्यषिञ्चन् गजेन्द्राः ॥ १३ ॥

आलोक्य त्वाममृतसहजे विष्णुवक्षस्थलस्थाम्
शापाक्रान्ताः शरणमगमन् सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत् कटाक्षैः
सर्वाकारस्थिरसमुदयां संपदं निर्विशन्ति ॥ १४ ॥

आर्तत्राणव्रतिभिरमृतासारनीलाम्बुवाहैः
अम्भोजानामुषसिमिषतामन्तरंगैरपांगैः ।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते संपदोघाः ॥ १५ ॥

योगारम्भत्वरितमनसो युष्मदैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम् ।
तेषां भूमेर्धनपतिगृहादंबरादंबुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥ १६ ॥

श्रेयस्कामा कमलनिलये चित्रमाम्नायवाचां
चूडापीडं तव पदयुगं चेतसा धारयन्तः ।

छत्रछाया सुभगशिरसश्चामरस्मेरपार्श्वाः
श्लाघाशब्दश्रवणमुदिताः स्रग्विणः सञ्चरन्ति ॥ १७ ॥

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
दूरीकर्तुं दुरितनिवहं त्यक्तुमाद्यामविद्याम् ।
अंब स्तंबावधिक जननग्रामसीमान्तरेखां
आलंबन्ते विमलमनसो विष्णुकान्ते दयां ते ॥ १८ ॥

जाताकाङ्क्षा जननि युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तवच कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् ॥ १९ ॥

सेवे देवि त्रिदशमहिलामौलिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां संपदां पादपद्मम् ।
यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २० ॥

सानुप्रासप्रकटितदयैः सान्द्रवात्सल्यदिग्धैः
अंब स्निग्धैरमृतलहरीलब्धसब्रह्मचर्यैः ।
घर्मे तापत्रयविरचिते गाढतप्तं क्षणं मां
आकिञ्चन्यग्लपितमनघैरार्द्रयेथाः कटाक्षैः ॥ २१ ॥

संपद्यन्ते भवभयतमोभानवस्त्वत् प्रसादात्
भावाः सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतः शीतलोदारशीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥ २२ ॥

माता देवि त्वमसि भगवान् वासुदेवः पिता मे
जातः सोहं जननि युवयोरेकलक्ष्यं दयायाः ।
दत्तो युष्मत् परिजनतया देशिकैरप्यतस्त्वं

किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥ २३ ॥

कल्याणानामविकलनिधिः कापि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
संपद्दिव्या मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थना कामधेनुः ॥ २४ ॥

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्
कलिकलुषनिवृत्यै कल्प्यमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत् पठन्तः
सकलकुशलसीमाः सर्वभौमा भवन्ति ॥

५. श्रीलक्ष्मीध्यानम्

सिन्दूरारुणकान्तिमब्जवसतिं सौन्दर्यवारांनिधिं
कोटीराङ्गदहारकुण्डलकटीसूत्रादिभिर्भूषिताम् ।
हस्ताब्जैर्वसुपत्रमब्जयुगलादर्शंवहन्तीं परां
आवीतां परिवारिकाभिरनिशं ध्याये प्रियां शार्ङ्गिणः ॥ १ ॥

भूयात् भूयो द्विपद्माभयवरदकरा तप्तकार्तस्वराभा
रत्नौघाबद्धमौलिर्विमलतरदुकूलार्तवालेपनाढ्या ।
नाना कल्पाभिरामा स्मितमधुरमुखी सर्वगीर्वाणवनद्या
पद्माक्षी पद्मनाभोरसिकृतवसतिः पद्मगा श्री श्रिये वः ॥ २ ॥

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिस्सेवितां
पार्श्वे पङ्कजशङ्खपद्मनिधिभिर्युक्तां सदा शक्तिभिः ॥ ३ ॥

***

श्री धर्मशास्तास्तोत्राणि

विषयसूची

		पृष्ठसंख्या
१.	धर्मशस्तृपंचकम्	२८५
२.	श्री धर्मशास्तुः अष्टकं १	२८५
३.	धर्मशास्तुःस्तुतिदशकम्	२८७
४.	श्री भूतनाथस्तोत्रदशकम्	२८८
५.	श्री धर्मशास्तृभुजंगस्तोत्रम्	२८९
६.	शास्तापंचकम्	२९१
७.	शास्ता अष्टकम् २	२९२

***

१. धर्मशास्तृपञ्चकम्

पादारविन्दभक्तलोकपालनैकलोलुपं
सदारपार्श्वमात्मजादिमोदकं सुराधिपम् ।
उदारमादिनाथभूतनाथमद्भुतात्मवैभवं
सदा रवीन्दुकुण्डलं नमामि भाग्यसम्भवम् ॥ १ ॥

कृपाकटाक्षवीक्षणं विभूतिवेत्रभूषणं
सुपावनं सनातनादिसत्यधर्मपोषणम् ।
अपारशक्तियुक्तमात्मलक्षणं सुलक्षणं
प्रभामनोहरं हरीशभाग्यसम्भवं भजे ॥ २ ॥

मृगासनं वरासनं शरासनं महौजसं
जगद्धितं समस्तभक्तचित्तरङ्गसंस्थितम् ।
नगाधिराजराजयोगपीठमध्यवर्तिनं
मृगाङ्कशेखरं हरीशभाग्यसम्भवं भजे ॥ ३ ॥

समस्तलोकचिन्तितप्रदं सदा सुखप्रदं
समुत्थितापदन्धकारकृन्तनं प्रभाकरम् ।
अमर्त्यनृत्तगीतवाद्यलालसं मदालसं
नमस्करोमि भूतनाथमादिधर्मपालकम् ॥ ४ ॥

चराचरान्तरस्थित प्रभामनोहर प्रभो
सुरासुरार्चिताङ्घ्रिपद्म भूतनायक ।
विराजमानवक्त्र भक्तमित्र वेत्रशोभित
हरीशभाग्यजात साधुपारिजात पाहि माम् ॥ ५ ॥

***

२. श्रीधर्मशास्तुः अष्टकम्

बन्धूकबन्धुररुचिं कलधौतभासं
पञ्चाननं दुरितवञ्चनधीरमीशम् ।
पार्श्वद्वयाकलितशक्तिकटाक्षचारुं
नीलोत्पलार्चिततनुं प्रणतोऽस्मि देवम् ॥ १ ॥

कल्याणवेषरुचिरं करुणानिधानं
कन्दर्पकोटिसदृशं कमनीयभासम् ।
कान्ताद्वयाकलितपार्श्वमघारिमाद्यं
शास्तारमेव सततं प्रणतोऽस्मि नित्यम् ॥ २ ॥
यो वा स्मरेदरुणकुङ्कुमपङ्कशोण–
गुंजापिनद्धकचभारलसत्किरीटम् ।
शास्तारमेव सततं स तु सर्वलोकान्
विस्मापयेन्निजविलोकनतो नितान्तम् ॥ ३ ॥

पञ्चेषुकैटभविरोधितनूभवं तं
आरूढदन्तिपरमादृतमन्दहासम् ।
हस्ताम्बुजैरविरतं निजभक्तहंसे
ष्वृद्धिं परां हि ददतं भुवनैकवन्द्यम् ॥ ४ ॥

गुंजामणिस्रगुपलक्षितकेशहस्तं
कस्तूरिकातिलकमोहनसर्वलोकम् ।
पञ्चाननाम्बुजलसत् घनकर्णपाशं

शास्तारमम्बुरुहलोचनमीशमीडे ॥ ५ ॥

पञ्चाननं दशभुजं धृतहेतिदण्डं
धारावतादपि च रूष्णिकमालिकाभिः ।
इच्छानुरूपफलदोऽस्म्यहमेव भक्ते–
ष्वित्थं प्रतीतविभवं भगवन्तमीडे ॥ ६ ॥

स्मेराननाद् भगवतः स्मरशासनाच्च
मायागृहीतमहिलावपुषो हरेश्च ।
यः संगमे समुदभूत् जगतीह तादृग्
देवं नतोऽस्मि करुणालयमाश्रयेऽहम् ॥ ७ ॥

यस्यैव भक्तजनमत्र गृणन्ति लोके
किं वा मयः किमथवा सुरवर्धकिर्वा ।
वेधाः किमेष ननु शम्बर एष वा किं
इत्येव तं शरणमाशुतरं व्रजामि ॥ ८ ॥

***

३. धर्मशास्तृस्तुतिदशकम्

आशानुरूपफलदं चरणारविन्द–
भाजामपारकरुणार्णवपूर्णचन्द्रम् ।
नाशाय सर्वविपदामपि नौमि नित्यं
ईशानकेशवभुवं भुवनैकनाथम् ॥ १ ॥

पिञ्छावलीवलयिताकलितप्रसून–
संजातकान्तिभरभासुरकेशभारम् ।
शिञ्जानमञ्जुमणिभूषितरञ्जिताङ्गं
चन्द्रावतंसहरिनन्दनमाश्रयामि ॥ २ ॥

आलोलनीललललितालकहाररम्यं
आकम्रनासमरुणाधरमायताक्षम् ।
आलम्बनं त्रिजगतां प्रमथाधिनाथं
आनम्रलोकहरिनन्दनमाश्रयामि ॥ ३ ॥

कर्णावलम्बिमणिकुण्डलभासमान–
गण्डस्थलं समुदिताननपुण्डरीकम् ।
अर्णोजनाभहरयोरिव मूर्तिमन्तं
पुण्यातिरेकमिव भूतपतिं नमामि ॥ ४ ॥

उद्दण्डचारुभुजदण्डयुगाग्रसंस्थ–
कोदण्डबाणमहितान्तमदान्तवीर्यम् ।
उद्यत्प्रभापटलदीप्रमदभ्रसारं
नित्यं प्रभापतिमहं प्रणतो भवामि ॥ ५ ॥

मालेयपङ्कसमलङ्कृतभासमान–
दोरन्तरालतरलामलहारजालम् ।
नीलातिनिर्मलदुकूलधरं मुकुन्द–
कालान्तकप्रतिनिधिं प्रणतोऽस्मि नित्यम् ॥ ६ ॥

यत्पादपङ्कजयुगं मुनयोऽप्यजस्रं
भक्त्या भजन्ति भवरोगनिवारणाय ।
पुत्रं पुरान्तकमुरान्तकयोरुदारं
नित्यं नमाम्यहममित्रकुलान्तकं तम् ॥ ७ ॥

कान्तं कलायकुसुमद्युति लोभनीय–
कान्तिप्रवाहविलसत् कमनीयरूपम् ।
कान्तातनूजसहितं निखिलामयौघ
शान्तिप्रदं प्रमथनाथमहं नमामि ॥ ८ ॥

भूतेश भूरिकरुणामृतपूरपूर्ण–
वारान्निधे वरद भक्तजनैकबन्धो ।
पायात् भवान् प्रणतमेनमपारघोर–
संसारभीतमिह मामखिलामयेभ्यः ॥ ९ ॥

हे भूतनाथ भगवन् भवदीयचारु–
पादाम्बुजे भवतु भक्तिरचञ्चला मे ।
नाथाय सर्वजगतां भजतां भवाब्धि–
पोताय नित्यमखिलाङ्गभुवे नमस्ते ॥ १० ॥

***

४. श्रीभूतनाथस्तोत्रदशकम्

पाण्ड्यभूपतीन्द्रपूर्वपुण्यमोहनाकृते
पण्डितार्चिताङ्घ्रिपुण्डरीक पावनाकृते ।
पूर्णचन्द्रतुण्डवेत्रदण्डवीर्यवारिधे
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ १ ॥

आदिशंकराच्युतप्रियात्मसम्भव प्रभो
आदिभूतनाथ साधुभक्तचिन्तितप्रद ।
भूतिभूष वेदघोषपारितोषशाश्वत
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ २ ॥

पञ्चबाणकोटिकोमलाकृते कृपानिधे
पञ्चगव्यपायसान्नपानकादिमोदक ।
पञ्चभूतसञ्चयप्रपञ्चभूतपालक
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ ३ ॥

चन्द्रसूर्यवीतिहोत्रनेत्रनेत्रमोहन
सान्द्रसुन्दरस्मितार्द्र केसरीन्द्रवाहन ।
इन्द्रवन्दनीयपाद साधुवृन्दजीवन

पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ ४ ॥

वीरबाहुवर्णनीयवीर्यशौर्यवारिधे
वारिजासनादिदेववन्द्य सुन्दराकृते ।
वारणेन्द्रवाजिसिंहवाह भक्तशेवधे
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ ५ ॥

अत्युदारभक्तचित्तरङ्गनर्तनप्रभो
नित्यशुद्धनिर्मलाद्वितीय धर्मपालक ।
सत्यरूप मुक्तिरूप सर्वदेवतात्मक
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ ६ ॥

सामगानलोल शान्तशील धर्मपालक
सोमसुन्दरास्य साधुपूजनीयपादुक ।
सामदानभेददण्डशास्त्रनीति बोधक
पूर्णपुष्कल समेत भूतनाथ पाहि माम् ॥ ७ ॥

सुप्रसन्नदेवदेव सद्गतिप्रदायक
चित्प्रकाश धर्मपाल सर्वभूतनायक ।
सुप्रसिद्ध पञ्चशैलसन्निकेतनर्तक
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ ८ ॥

शूलचापबाणखड्गवज्रशक्ति शोभित
बालसूर्यकोटिभासुराङ्ग भूतसेवित ।
कालचक्र संप्रवृत्ति कल्पना समन्वित
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ ९ ॥

अद्भुतात्मबोधसत्सनातनोपदेशक
बुद्बुदोपमप्रपञ्चविभ्रमप्रकाशक ।
सप्रथप्रगल्भचित् प्रकाश दिव्यदेशिक
पूर्णपुष्कला समेत भूतनाथ पाहि माम् ॥ १० ॥

***

५. श्रीधर्मशास्तृभुजंगस्तोत्रम्

श्रितानन्द चिन्तामणि श्रीनिवासं
सदा सच्चिदानन्दपूर्णप्रकाशम् ।
उदारं सुदारं सुराधारमीशं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १ ॥

विभुं वेदवेदान्तवेद्यं वरिष्ठं
विभूतिप्रदं विश्रुतं ब्रह्मनिष्ठम् ।
विभास्वत्प्रभावप्रभं पुष्कलेष्टं
परं ज्योतिरूपं भजे भूतनाथम् ॥ २ ॥

परित्राणदक्षं परब्रह्मसूत्रं
स्फुरच्चारुगात्रं भवध्वान्तमित्रम् ।
परं प्रेमपात्रं पवित्रं विचित्रं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ३ ॥

परेशं प्रभुं पूर्णकारुण्यरूपं
गिरीशाधिपीठोज्वलच्चारुदीपम् ।
सुरेशादिसंसेवितं सुप्रतापं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ४ ॥

हरीशानसंयुक्तशक्त्यैकवीरं
किरातावतारं कृपापाङ्गपूरं ।
किरीटावतंसोज्ज्वलत् पिञ्छभारं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ५ ॥

गुरुं पूर्णलावण्यपादादिकेशं
गरीयं महत्कोटिसूर्यप्रकाशं ।
कराम्भोरुहन्यस्तवेत्रं सुरेशं

परं ज्योतिरूपं भजे भूतनाथम् ॥ ६ ॥

महायोगपीठे ज्वलन्तं महान्तं
महावाक्यसारोपदेशं सुशान्तम् ।
महर्षिप्रहर्षप्रदं ज्ञानकन्दं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ७ ॥

महारण्यमन्मानसान्तर्निवासान्
अहंकारदुर्वारहिंस्रामृगादीन् ।
हरन्तं किरातावतारं चरन्तं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ८ ॥

पृथिव्यादिभूतप्रपञ्चान्तरस्थं
पृथग्भूतचैतन्यजन्यं प्रशस्तम् ।
प्रधानं प्रमाणं पुराणप्रसिद्धं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ९ ॥

जगज्जीवनं पावनं भावनीयं
जगद्व्यापकं दीपकं मोहनीयं ।
सुखाधारमाधारभूतं तुरीयं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १० ॥

इहामुत्र सत्सौख्यसंपन्निदानं
महद्योनिमव्याहतात्माभिधानम् ।
महत् पुण्डरीकायनं दीप्यमानं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ११ ॥

त्रिकालस्थितं सुस्थिरं ज्ञानसंस्थं
त्रिधामादिमूर्त्यात्मकं ब्रह्मसंस्थम् ।

त्रयीमूर्तिमार्तिच्छिदं शक्तियुक्तं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १२ ॥

इडापिङ्गलासुषुम्ना विशन्तं
स्फुटं ब्रह्मरन्ध्रस्वतन्त्रं सुशान्तं ।
दृढं नित्यनिर्वाणमुद्भासयन्तं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १३ ॥

अणुब्रह्मपर्यन्त जीवैक्यबिम्बं
गुणाकारमत्यन्तभक्तानुकम्पम् ।
अनर्घं शुभोदर्कमात्मावलम्बं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १४ ॥

***

६. शास्तापञ्चरत्नम्

लोकवीरं महापूज्यं सर्वरक्षाकरं विभुम् ।
पार्वती हृदयानन्दं शास्तारं प्रणमाम्यहम् ॥ १ ॥

विप्रपूज्यं विश्ववन्द्यं विष्णुशम्भोः प्रियं सुतम् ।
क्षिप्रप्रसादनिरतं शास्तारं प्रणमाम्यहम् ॥ २ ॥

मत्तमातङ्गगमनं कारुण्यामृतपूरितम् ।
सर्वविघ्नहरं देवं शास्तारं प्रणमाम्यहम् ॥ ३ ॥

अस्मत्कुलेश्वरं देवं अस्मच्छत्रुविनाशनम् ।
अस्मदिष्टप्रदातारं शास्तारं प्रणमाम्यहम् ॥ ४ ॥

पाण्ड्येशवंशतिलकं केरले केलिविग्रहम् ।
आर्तत्राणपरं देवं शास्तारं प्रणमाम्यहम् ॥ ५ ॥

पञ्चरत्नाख्यमेतद्यो नित्यं शुद्धः पठेन्नरः ।
तस्य प्रसन्नो भगवान् शास्ता वसति मानसे ॥ ६ ॥

***

७. शास्ता अष्टकम्

हरिवरासनं विश्वमोहनं
हरितदीश्वराऽऽराध्यपादुकम् ।
अरिविमर्दनं नित्यनर्तनं
हरिहरात्मजं देवमाश्रये ॥ १ ॥

चरणकीर्तनं शक्तमानसं
भरणलोलुपं नर्तनालयम् ।
अरुणभासुरं भूतनायकं
हरिहरात्मजं देवमाश्रये ॥ २ ॥

प्रणय सत्यका प्राणनायकं
प्रणतकल्पकं सुप्रभाञ्चितं ।
प्रणवमन्दिरं कीर्तनप्रियं
हरिहरात्मजं देवमाश्रये ॥ ३ ॥

तुरगवाहनं सुन्दराननं
वरगदायुधं देववर्णितम् ।
गुरुकृपाकरं कीर्तनप्रियं
हरिहरात्मजं देवमाश्रये ॥ ४ ॥

त्रिभुवनार्चितं देवतात्मकं
त्रिनयनप्रभुं दिव्यदेशिकम् ।
त्रिदशपूजितं चिन्तितप्रदं
हरिहरात्मजं देवमाश्रये ॥ ५ ॥

भवभयापहं भावुकावहं

भुवनमोहनं भूतिभूषणम् ।
धवलवाहनं दिव्यवारणं
हरिहरात्मजं देवमाश्रये ॥ ६ ॥

कलमृदुस्मितं सुन्दराननं
कलभकोमलं गात्रमोहनम् ।
कलभकेसरीवाजिवाहनं
हरिहरात्मजं देवमाश्रये ॥ ७ ॥

श्रितजनप्रियं चिन्तितप्रदं
श्रुतिविभूषणं साधुजीवनम् ।
श्रुतिमनोहरं गीतलालसं
हरिहरात्मजं देवमाश्रये ॥ ८ ॥

***

श्री आञ्जनेयस्तोत्राणि

विषयसूची

	पृष्ठसंख्या
१. श्री हनुमत्पंचरत्नस्तोत्रम्	२९५
२. श्री आन्ञ्जनेयस्तोत्रम्	२९५
३. श्री हनुमत्स्तोत्रम	२९७
४. आपदुद्धरणहनुमत्स्तोत्रम्	२९७
५. श्री हनुमत्भुजंगस्तोत्रम्	२९९
६. वीरविंशतिक्व्यं श्री हनुमत्स्तोत्रम्	३०१

***

१. श्री हनुमत्पञ्चरत्नस्तोत्रम्

(श्री शंकराचार्यकृतम्)

वीताखिलविषयेच्छं जातानन्दाश्रुपुलकमत्यच्छम् ।
सीतापतिदूताख्यं वातात्मजमद्यभावये हृद्यम् ॥ १ ॥

तरुणारुणमुखकमलं करुणारसपूरपूरितापाङ्गम् ।
सञ्जीवनमाशासे मञ्जुलमहिमानमञ्जनाभाग्यम् ॥ २ ॥

शंबरवैरिशरातिगमम्बुजदलविपुललोचानोदारम् ।
कम्बुगलमनिलदिष्टं बिम्बज्वलितोष्ठमेकमालम्बे ॥ ३ ॥

दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः ।
दारितदशमुखकीर्तिः पुरतो मम भातु हनुमतो मूर्तिः ॥ ४ ॥

वानरनिकराध्यक्षं दानवकुलकुमुदरविकरसदृशम् ।
दीनजनावनदीक्षं पवनतपःपाकपुंजमद्राक्षम् ॥ ५ ॥

एतत् पवनसुतस्य स्तोत्रं
यः पठति पञ्चरत्नाख्यम् ।
चिरमिह निखिलान् भोगान् भुक्त्वा
श्रीरामभक्तिमान् भवति ॥ ६ ॥

***

२. श्री आञ्जनेयस्तोत्रम्

(उमामहेश्वरसंवादात्मकम्)

शृणु देवि प्रवक्ष्यामि स्तोत्रं सर्वभयापहम् ।
सर्वकामप्रदं नृणां हनूमत्स्तोत्रमुत्तमम् ॥ १ ॥

तप्तकाञ्चनसंकाशं नानारत्नविभूषितम् ।
उद्यत्बालार्कवदनं त्रिनेत्रं कुण्डलोज्ज्वलम् ॥ २ ॥

मौञ्जीकौपीनसंयुक्तं हेमयज्ञोपवीतिनम् ।
पिङ्गलाक्षं महाकायं टङ्कशैलेन्द्रधारिणम् ॥ ३ ॥

शिखानिक्षिप्तवालाग्रं मेरुशैलाग्रसंस्थितम् ।
मूर्तित्रयात्मकं पीनं महावीरं महाहनुम् ॥ ४ ॥

हनुमन्तं वायुपुत्रं नमामि ब्रह्मचारिणम् ।
त्रिमूर्त्यात्मकमात्मस्थं जपाकुसुमसन्निभम् ॥ ५ ॥

नानाभूषणसंयुक्तं आञ्जनेयं नमाम्यहम् ।
पञ्चाक्षरस्थितं देवं नीलनीरदसन्निभम् ॥ ६ ॥

पूजितं सर्वदेवैश्च राक्षसान्तं नमाम्यहम् ।
अचलद्युतिसङ्काशं सर्वालङ्कारभूषितम् ॥ ७ ॥

षडक्षरस्थितं देवं नमामि कपिनायकम् ।
तप्तस्वर्णमयं देवं हरिद्राभं सुरार्चितम् ॥ ८ ॥

सुन्दरांसाब्जनयनं त्रिनेत्रं तं नमाम्यहम् ।
अष्टाक्षराधिपं देवं हीरवर्णसमुज्ज्वलम् ॥ ९ ॥

नमामि जनतावन्द्यं लङ्काप्रासादभञ्जनम् ।

अतसीपुष्पसङ्काशं दशवर्णात्मकं विभुम् ॥ १० ॥

जटाधरं चतुर्बाहुं नमामि कपिनायकम् ।
द्वादशाक्षरमन्त्रस्य नायकं कुन्तधारिणम् ॥ ११ ॥

अङ्कुशं च दधानं तं कपिवीरं नमाम्यहम् ।
त्रयोदशाक्षरयुतं सीतादुःखनिवारणम् ॥ १२ ॥

पीतवर्णं लसत्कायं भजे सुग्रीवमन्त्रिणम् ।
मालामन्त्रात्मकं देवं चित्रवर्णं चतुर्भुजम् ॥ १३ ॥

पाशाङ्कुशाभयकरं धृतटङ्कं नमाम्यहम् ।
सुरासुरगणैः सर्वैः संस्तुतं प्रणमाम्यहम् ॥ १४ ॥

एवं ध्यायन्नरो नित्यं सर्वपापैः प्रमुच्यते ।
प्राप्नोति चिन्तितं कार्यं शीघ्रमेव न संशयः ॥ १५ ॥

३. श्रीहनुमत्स्तोत्रम्

अक्षादिराक्षसहरं दशकण्ठदर्प–
निर्मूलनं रघुवराङ्घ्रिसरोजभक्तम् ।
सीताविषह्यदुःखनिवारकं तं
वायोः सुतं गिलितभानुमहं नमामि ॥ १ ॥

मां पश्य पश्य हनुमन् निजदृष्टिपातैः
मां रक्ष रक्ष परितो रिपुदुःखवर्गात् ।
वश्यां कुरु त्रिजगतीं वसुधाधिपानां
मे देहि देहि महतीं वसुधां श्रियं च ॥ २ ॥

आपद्भ्यो रक्ष सर्वत्र आञ्जनेय नमोऽस्तु ते ।
बन्धनं छिन्धि मे नित्यं कपिवीर नमोऽस्तु ते ॥ ३ ॥

दुष्टरोगान् हन हन रामदूत नमोऽस्तु ते ।
उच्चाटय रिपून् सर्वान् मोहनं कुरु भूभुजाम् ॥ ४ ॥

विद्वेषिणो मारय त्वं त्रिमूर्त्यात्मक सर्वदा ।
सञ्जीवपर्वतोद्धार मनोदुःखं निवारय ॥ ५ ॥

घोरानुपद्रवान् सर्वान् नाशयाक्षासुरान्तक ।
एवं स्तुत्वा हनूमन्तं नरः श्रद्धासमन्वितः ॥ ६ ॥

पुत्रपौत्रादिसहितः सर्वसौख्यमवाप्नुयात् । ७ ।

४. आपदुद्धरणहनुमत्स्तोत्रम्

(विभीषणकृतम्)

वामे करे वैरिभिदं वहन्तं
शैलं परे शृङ्खलहारिटङ्कम् ।
दधानमच्छच्छवि यज्ञसूत्रं
भजे ज्वलत्कुण्डलमाञ्जनेयम् ॥ १ ॥

सुपीतकौपीनमुदञ्चितांगुलिं
समुञ्ज्वलन् मौञ्ज्यजिनोपवीतिनम् ।
सकुण्डलं लम्बशिखासमावृतं
तमाञ्जनेयं शरणं प्रपद्ये ॥ २ ॥

आपन्नाखिललोकार्तिहारिणे श्रीहनूमते ।
अकस्मादागतोत्पातनाशनाय नमोऽस्तु ते ॥ ३ ॥

सीताविमुक्तश्रीरामशोकदुःखभयापह ।
तापत्रितयसंहारिन् आञ्जनेय नमोऽस्तु ते ॥ ४ ॥

आधिव्याधिमहामारीग्रहपीडापहारिणे ।
प्राणापहर्त्रे दैत्यानां रामप्राणात्मने नमः ॥ ५ ॥

संसारसागरावर्तौ कर्तव्यभ्रान्तचेतसाम् ।
शरणागतमर्त्यानां शरण्याय नमोऽस्तु ते ॥ ६ ॥

राजद्वारि बिलद्वारि प्रवेशे भूतसङ्कुले ।
गजसिंहमहाव्याघ्र चोरभीषणकानने ॥ ७ ॥

शरणाय शरण्याय वातात्मज नमोऽस्तु ते ।
नमः प्लवगसैन्यानां प्राणभूतात्मने नमः ॥ ८ ॥

रामेष्टं करुणापूर्णं हनूमन्तं भयापहम् ।
शत्रुनाशकरं भीमं सर्वाभीष्टफलप्रदम् ॥ ९ ॥

प्रदोषे वा प्रभाते वा ये स्मरन्त्यञ्जनासुतम् ।
अर्थसिद्धिं यशः कीर्तिं प्राप्नुवन्ति न संशयः ॥ १० ॥

कारागृहे प्रयाणे च संग्रामे देशविप्लवे ।
ये स्मरन्ति हनूमन्तं तेषां नास्ति विपद्सदा ॥ ११ ॥

वज्रदेहाय कालाग्निरुद्रायामिततेजसे ।
ब्रह्मास्त्रस्थंभनायास्मै नमः श्री रुद्रमूर्तये ॥ १२ ॥

जप्त्वा स्तोत्रमिदं मन्त्रं प्रतिवारं पठेन्नरः ।
राजस्थाने सभास्थाने प्राप्तवादे जपेत् ध्रुवम् ॥ १३ ॥

विभीषणकृतं स्तोत्रं यः पठेत् प्रयतो नरः ।
सर्वापद्भ्यो विमुच्येत नात्र कार्या विचारणा ॥ १४ ॥

मर्कटेश महोत्साह सर्वशोकविनाशक ।

शत्रून् संहर मां रक्ष श्रियं दासाय देहि मे ॥ १५ ॥

***

५. श्री हनुमत्भुजंगस्तोत्रम्

(श्री शंकराचार्यकृतम्)

स्फुरद्विद्युदुल्लासवालाग्रघण्टा–
झणत्कारनादप्रवृद्धाट्टहासम्
भजे वायुसूनुं भजे रामदूतं ।
भजे वज्रदेहं भजे भक्तबन्धुम् ॥ १ ॥

प्रपन्नानुरागं प्रभाकाञ्चनाङ्गं
जगत्गीतशौर्यं तुषाराद्रिशौर्यम् ।
तृणीभूतहेतिं रणोद्यद्विभूतिं
भजे वायुपुत्रं पवित्रात् पवित्रम् ॥ २ ॥

भजे रामरम्भावनी नित्यवासं
भजे बालभानुप्रभाचारुहासम् ।
भजे चन्द्रिकाकुन्दमन्दारभासं
भजे सन्ततं रामभूपालदासम् ॥ ३ ॥

भजे लक्ष्मणप्राणरक्षातिदक्षं
भजे तोषितानेकगीर्वाणपक्षं ।
भजे घोरसंग्रामसीमाहताक्षं
भजे रामनामातिसंप्राप्तरक्षम् ॥ ४ ॥

मृगाधीशनाथं क्षितिक्षिप्तपादं
घनाक्रान्तजङ्घं कटिस्थोडुसङ्घम् ।
वियद्व्याप्तकेशं भुजाश्लेषिताशं
जयश्री समेतं भजे रामदूतम् ॥ ५ ॥

चलद्वालघातभ्रमच्चक्रवालं

कठोराट्टहासप्रभिन्नाब्धिकाण्डम् ।
महासिंहनादाद्विशीर्णत्रिलोकं
भजे चाञ्जनेयं प्रभुं वज्रकायम् ॥ ६ ॥

रणे भीषणे मेघनादे सनादे
सरोषं समारोप्यसौमित्रिमंसे ।
घनानां खगानां सुराणां च मार्गे
नटन्तं ज्वलन्तं हनूमन्तमीडे ॥ ७ ॥

नखध्वस्त जंभारि दम्भोलिधारं
भुजाग्रेण निर्धूत कालाग्रदण्डम् ।
पदाघातभीताहि जाताऽधिवासं
रणक्षोणिदक्षं भजे पिङ्गलाक्षम् ॥ ८ ॥

महाभूतपीडां महोत्पातपीडां
महाव्याधिपीडां महाधिप्रपीडाम् ।
हरत्याशु ते पादपद्मानुरक्तिः
नमस्ते कपिश्रेष्ठ रामप्रियाय ॥ ९ ॥

सुधासिन्धुमुल्लङ्घ्य सान्द्रे निशीथे
सुधा चौषधीस्ताः प्रगुप्तप्रभावाः ।
क्षणे द्रोणशैलस्य पृष्ठे प्ररूढाः
त्वया वायुसूनो किलानीय दत्ताः ॥ ९ ॥

समुद्रं तरङ्गादिरौद्रं विनिद्रो
विलङ्घ्योडुसङ्घं स्तुतो मर्त्यसंघैः ।
निरातङ्कमाविश्य लङ्कां विशङ्को
भवानेव सीतावियोगापहारी ॥ १० ॥

नमस्ते महासत्वबाहाय नित्यं

नमस्ते महावज्रदेहाय तुभ्यम् ।
नमस्ते पराभूतसूर्याय तुभ्यं
नमस्ते कृतामर्त्यकार्याय तुभ्यम् ॥ ११ ॥

नमस्ते सदा ब्रह्मचर्याय तुभ्यं
नमस्ते सदा वायुपुत्राय तुभ्यम् ।
नमस्ते सदा पिङ्गलाक्षाय तुभ्यं
नमस्ते सदा रामभक्ताय तुभ्यं ॥ १२ ॥

हनूमत्भुजंगप्रयातं प्रभाते
प्रदोषे दिवा चार्द्धरात्रेऽपि मर्त्यः ।
पठन् भक्तियुक्तः प्रमुक्ताघजालः
नराः सर्वदा रामभक्तिं प्रयान्ति ॥ १३ ॥

***

६. वीरविंशतिकाव्यं श्रीहनुमत्स्तोत्रम्

(उमापति कविविरचितम्)

लांगूलमृष्टवियदम्बुधिमध्यमार्ग–
मुत्प्लुत्य यान्तममरेन्द्रमुदो निदानम् ।
आस्फालितस्वकभुजस्फुटिताद्रिकाण्डं
द्राङ्मैथिलीनयननन्दनमद्य वन्दे ॥ १ ॥

मध्येनिशाचरमहाभयदुर्विषह्यं
घोराद्भुतव्रतमिदं यददश्चचार ।
पत्ये तदस्य बहुधापरिणामदूतं
सीतापुरस्कृततनुं हनुमन्तमीडे ॥ २ ॥

यः पादपङ्कजयुगं रघुनाथपत्न्या
नैराश्यरूषितविरक्तमपि स्वरागैः ।
प्रागेव रागि विदधे बहु वन्दमानो
वन्देऽञ्जनाजनुषमेव विशेषतुष्ट्यै ॥ ३ ॥

ताञ्जानकीविरहवेदनहेतुभूतान्
द्रागाकलय्य सदशोकवनीयवृक्षान् ।
लङ्कालकानिव घनानुदपाटयद्य–
स्तं हेमसुन्दरकपिं प्रणमामि पुष्ट्यै ॥ ४ ॥

घोषप्रतिध्वनितशैलगुहासहस्र–
संभ्रान्तनादितवलन्मृगनाथयूथम् ।
अक्षक्षयक्षणविलक्षितराक्षसेन्द्र–
मिन्द्रं कपीन्द्रपृतनावलयस्य वन्दे ॥ ५ ॥

हेलाविलङ्घितमहार्णवमप्यमन्दं
घूर्णद्गदाविहतिविक्षतराक्षसेषु ।
स्वम्मोदवारिधिमपारमिवेक्षमाणं
वन्देऽहमक्षयकुमारकमारकेशम् ॥ ६ ॥

जम्भारिजित्प्रसभलम्बितपाशबन्धं
ब्रह्मानुरोधमिव तत्क्षणमुद्वहन्तम् ।
रौद्रावतारमपि रावणदीर्घदृष्टि–
सङ्कोचकारणमुदारहरिं भजामि ॥ ७ ॥

दर्पोन्नमन्निशिचरेश्वरमूर्धचञ्च–
त्कोटीरचुम्बि निजबिम्बमुदीक्ष्य हृष्टम् ।
पश्यन्तमात्मभुजयन्त्रणपिष्यमाण–
तत्कायशोणितनिपातमपेक्षि वक्षः ॥ ८ ॥

अक्षप्रभृत्यमरविक्रमवीरनाश–
क्रोधादिव द्रुतमुदञ्चितचन्द्रहासाम् ।
निद्रापिताभ्रघनगर्जनघोरघोषैः
संस्थम्भयन्तमभिनौमि दशास्यमूर्तिम् ॥ ९ ॥

आशंस्यमानविजयं रघुनाथधाम
शंसन्तमात्मकृतभूरिपराक्रमेण ।
दौत्ये समागमसमन्वयमादिशन्तं
वन्दे हरेः क्षितिभृतः पृतनाप्रधानम् ॥ १० ॥

यस्यौचितीं समुपदिष्टवतोऽधिपुच्छं
दम्भान्धितां धियमपेक्ष्य विवर्धमानः ।
नक्तञ्चराधिपतिरोषहिरण्यरेता
लङ्कां दिधक्षुरपतत्तमहं वृणोमि ॥ ११ ॥

क्रन्दन्निशाचरकुलां ज्वलनावलीढैः
साक्षाद्गृहैरिव बहिः परिदेवमानाम् ।
स्तब्धस्वपुच्छतटलग्नकृपीटयोनि–
दन्दह्यमाननगरीं परिगाहमानाम् ॥ १२ ॥

मूर्तैर्गृहासुभिरिव द्युपुरं व्रजद्भि–
र्व्योम्नि क्षणं परिगतं पतगैर्ज्वलद्भिः ।
पीताम्बरं दधतुमुच्छ्रितदीप्ति पुच्छं
सेनां वहद्विहगराजमिवाहमीडे ॥ १३ ॥

स्थम्भीभवत्स्वगुरुवालधिलग्नवह्नि–
ज्वालोल्ललद्ध्वजपटामिव देवतुष्ट्यै ।
वन्दे यथोपरि पुरो दिवि दर्शयन्त–
मद्यैव रामविजयाजिकवैजयन्तीम् ॥ १४ ॥

रक्षक्षयैकचितकक्षकपूश्रितौ यः
सीताशुचो निजविलोकनतो मृतायाः ।
दाहं व्यधादिव तदन्त्यविधेयभूतं
लाङ्गूलदत्तदहनेन मुदे स नोऽस्तु ॥ १५ ॥

आशुद्धये रघुपतिप्रणयैकसाक्ष्ये
वैदेहराजदुहितुः सरिदीश्वराय ।
न्यासं ददानमिव पावकमापतन्त-
मब्धौ प्रभञ्जनतनूजनुषं भजामि ॥ १६ ॥

रक्षस्स्वतृप्तिरुडशान्तिविशेषशोण-
मक्षक्षयक्षणविधानुमितात्मदाक्ष्यम् ।
भास्वत्प्रभातरविभानुभरावभासं
लङ्काभयङ्करममुं भगवन्तमीडे ॥ १७ ॥

तीर्त्वोदधिं जनकजार्पितमाप्य चूडा-
रत्नं रिपोरपि पुरं परमस्य दग्ध्वा ।
श्रीरामहर्षगलदश्वभिषिच्यमानं
तं ब्रह्मचारिवरवानरमाश्रयेऽहम् ॥ १८ ॥

यः प्राणवायुजनितो गिरिशस्य शान्तः
शिष्योऽपि गौतमगुरुर्मुनिशंकरात्मा ।
हृद्यो हरस्य हरिवद्धरितां गतोऽपि
धीधैर्यशास्त्रविभवेऽतुलमाश्रये तं ॥ १९ ॥

स्कन्धेऽधिवाह्य जगदुत्तरगीतिरीत्या
यः पार्वतीश्वरमतोषयदाशुतोषम् ।
तस्मादवाप च वरानपरानवाप्यान्
तं वानरं परमवैष्णवमीशमीडे ॥ २० ॥

उमापतेः कविपतेः स्तुतिर्बाल्यविजृम्भिता ।
हनूमतस्तुष्टयेऽस्तु वीरविंशतिकाभिधा ॥ २१ ॥

***